Complete

Kalamadhava

कालमाधव

॥

३/१३

41/3

382

माध०
॥२॥

॥श्रीमन्महागणाधिपतये नमः॥ श्रीरस्तु॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्र
मे॥ यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं॥ १॥ सोहं प्राप्य विवेकतीर्थपदवीमा
म्नायतीर्थे परं मज्जन्सज्जनसंगपुण्यतीर्थनिपुणः सद्वृत्ततीर्थं श्रयन्॥ लब्ध्वामाक
लयन्प्रभावलहरीं श्रीभारतीतीर्थतो विद्यातीर्थमुपाश्रयन्हृदि भजे कंठम श्री
व्याहतं॥ २॥ सत्यैकव्रतपालको द्विगुणधीस्त्यथश्च तुर्वेदी तापंचस्कंधसहः ष
कती षडन्वयदृढः सप्तांगः सर्वसहः॥ अष्टव्यक्तिपकलाधरो नवनिधिः पुष्यद्दशप्र
त्ययः स्मार्त्तोद्धायधुरंधरो विजयते श्रीबुक्कणक्ष्मापतिः॥ ३॥ व्याख्याय माधवा
चार्यो धर्मान्पाराशरानथ॥ तदनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः॥ ४॥ व्या
मूढानामिह तनुभृतां जाह्नवीतीर्थमेकं विद्यातीर्थप्रसूतिविमलं सद्विवेकोदया
नां॥ सर्वेषां प्रतप्रथमसुखदं भारतीतीर्थमाहुस्तद्ब्रावाम्नो विपुलमनसो निर्ण
येनाक्तिरस्ति॥ ५॥ अर्थेनुक्रम्यते श्लोके निखिलो निर्णिनीषितः॥ तावत्तेवानु ॥२॥

तिष्ठासुर्नैः संदेहः प्रवर्तितः॥ ६॥ ततो मीमांसुचित्तस्य समाधानायत पुनः॥ विचरिष्ये यथान्या
यं श्रुतिस्मृतिवचोबलात्॥ पंचप्रकरणान्यत्र तेषूपोद्घातपो द्वावत्सरौ॥ प्रतिपच्छिष्टतिथयो न
क्षत्रादिरितिक्रमात्॥ उपोद्घाते कालसत्वं तस्यैनिर्णीययोग्यता॥ ईश्वरो नित्यकालात्माविं
तनीयः स कर्मसु॥ जन्यकाले द्वमुख्यत्वमुक्रमे तच्चतुष्टयं॥ अद्वायनं तु मासाश्च पक्षः प्रकर
णांतरे॥ अद्रः पंचविधः चांद्रो वृत्तादौ तिलकादिके॥ सुजन्मादिव्रते सौरो गोसत्रादिषु साव
नः॥ त्रयोप्याचार्यसेवादौ विकल्प्यंते निजेच्छया॥ आयुर्दायेतु नाक्षत्रो बार्हस्पत्योधिवत्स
रः॥ चांद्राणां प्रभवादीनां पंचके पंचके युगे॥ संपरीदान्विदित्येतछब्दपूर्वास्तुवत्सराः॥
तिलोयवो वस्त्रधान्ये रजतं दीयते त्वतु॥ उत्तरकर्मणिरांते च ज्योयने दक्षिणोत्तरे॥ वसंताद्रैतवो द्वि
द्विधा चांद्राः सौराश्च चांद्रजाः॥ चैत्राद्या अथ मीनाद्या मेषाद्या वा विवस्वतः॥ तेषु प्राधानादय
स्तद्वषण्मृतिनिवृत्तपूजनं॥ मासास्तु सावनः सौरश्चांद्रो नाक्षत्र इत्यमी॥ दर्शांतः पौर्णिमांतो
वा चांद्रौ सोवैत्र्यविप्रयोः॥ सौरो राशुः सावनस्तु युक्तज्योतिषिके परः॥ माघादिमासभेदे
षु तिलदानादयः स्मृताः॥ चांद्रोधिमासो संक्रांतः सौ तभवतिचोत्तरे॥ असंक्रा

प्राध०
॥२॥

तावेकवर्षे द्वौ चेत्संउसर्पआदिमः॥क्षयमासो द्विसंक्रांतः सबार्हस्पतिसंज्ञकः॥त्रयस्त्वन्या वि
वाहादौ संसर्पांहस्पती उभौ॥शुद्धौ श्रौते तथा स्मार्ते मलमासो विविच्यते॥काम्यारंभं तत्स
माप्तिं मलमासे विवर्जयेत्॥आरब्धं मलमासात्प्राक् कृच्छ्रं सत्रादिकं तु यत्॥तत्समाप्यं साव
नस्य मासस्यानतिलंघनात्॥आरंभात्त्वा समासेऽर्थ मध्ये स्यात्स्वेन्मलिम्लुचः॥प्रवृत्तमखि
लं काम्यं तदनुष्ठेयमेव तत्॥कारीर्यादिस्तु यत्काम्यं तस्यारंभसमापने॥कार्ये कालविलंबस्य
प्रतीक्ष्याय असंभवात्॥अनन्यगतिकं नित्यं अग्निहोत्रादि न त्यजेत्॥गत्यंतरयुतं नित्यं सो
मयागादि वर्जयेत्॥अगतिग्रहणस्नानं जातेष्टिर्गतिसंयुता॥द्वयं नैमित्तिकं तस्यात्व्यव
स्था नित्यवन्मता॥शुद्धमासमृतानां स्यान्मलिने प्रथमाद्विकं॥मलमासमृतानां तु मलेऽस्या
द्वाद्विकोत्तरं॥देवे मुख्यः शुक्लपक्षः कृष्णः पित्र्ये विशिष्यते॥तत्तीयेत्तु प्रकरणे वृद्धिता प्रतिप
त्तिथिः॥प्रतिपन्नाम विज्ञेया चंद्रस्य प्रथमा कला॥शुक्लपक्षे विशेषेण द्वं कृष्णपक्षे विधिः सरे
त्॥शुद्धा विद्धा तिथिः शुद्धा हीनोऽति च॥ध्यान्यया हीना॥उदये पूर्वया तिथ्या विध्यते त्रिमुहू
र्तकैः॥सा यंत्वुत्तरया तद्वन्न्यूनया नानुविध्यते॥वेध्याच्च त्रिमुहूर्तैव नन्यूना वेधं यमहे

॥शिव॥
॥२॥

ति॥ कुहूधायां नास्ति संदेहो दैवे पित्र्ये च कर्मणि॥ उपवासश्चैकभक्तं नक्तं चायाचितं व्रतं॥ दा
नं च षड्विधं दैवं कर्मादत्र विविच्यते॥ एकोद्दिष्टं पार्वणं च पित्र्यं द्विविधमीर्यते॥ शुक्लपक्षे
ऽदर्शविद्धा कृष्णे विद्धा द्वितीयया॥ उपोष्या प्रतिपच्छुक्ला मुख्या स्यादापराह्णिकी॥ तदभावे तु
सायाह्नव्यापिनी प्रतिगृह्यतां॥ प्रातः संगवमध्याह्नापराह्णाः सायमित्यसौ॥ अत्राह्नः पंच
धा भागो मुख्यो द्व्यादिभागतः॥ अभावेपि प्रतिपदः संकल्पः प्रातरिष्यते॥ तिथिस्त्रियामगा
वा कृच्छ्रे तिथ्यंते पारणं भवेत्॥ बलयुक्तस्य वे तु पूर्वं स्वरूपवासवदाचरेत्॥ मुख्यतिथ्यंतरायेतु
तिथिक्षयेपि गृह्यतां॥ क्षुधाधिक्यात्तु कृच्छ्रमापि पूर्वासं पूर्तिसंभवात्॥ गृहीतव्यात्वेकभक्ते मध्या
ह्नव्यापिनी तिथिः॥ परेद्युरेव पूर्वेद्युरेवं व्याप्तिर्दिनद्वये॥ नोभयत्रोभयत्रांशे साम्ये वैषम्य इति
त्यमी॥ षट् पक्षास्तत्र चैककव्याप्तौ सैवात्र गृह्यतां॥ दिनद्वयेपि तद्व्याप्तावव्याप्तौ चैकदेश
तः॥ समव्याप्तौ च पूर्वैव वैषम्येप्यधिकेष्यतां॥ अन्यांगस्यैकभक्तस्य कालव्याप्त्यनुसारतः॥
उपवासप्रतिनिधेस्तिथिः स्यादुपवासवत्॥ प्रदोषव्यापिनी नक्ते तिथ्यव्याप्तिर्दिनद्वये॥ अ
व्याप्तिवैषम्यांशेन व्याप्तिः स्यात्सर्वथोत्तरा॥ सौरनक्ते तु सायाह्नव्यापिनी न प्रदोषगा॥ अया

माध०
।।३।।

स्थितेपि तिथयः स्वीकार्या उपवासवत् ।। सोदयत्रिमुहूर्त्ता यां कुर्याद्दानव्रतानि च ।। उभयत्र तथा
त्वेनु पूर्वैव स्यात्तदनुष्ठितिः ।। ८ परत्रैव तथात्वं चेत्सर्वोग्राह्या तिथिक्षये ।। तिथेः साम्ये च वृद्धौ च ग्रा
ह्यता तिथिरुत्तरा ।। अस्यार्थः एकदेशस्य व्याप्तौ पूर्वैव ग्राह्यता ।। एकोद्दिष्टे तु मध्याह्नयुक्तास्या
देकभक्तवत् ।। एकदेशोस्तमव्याप्तौ क्षये पूर्वान्यथोत्तरा ।। कुतपाद्यपराह्णांतव्याप्तिराद्विकउ
त्तमा ।। तदभावे पराह्णस्य व्याप्तिकालग्राह्यतां तिथिः ।। क्षये पूर्वोत्तरा वृद्धौ व्याप्तिश्चेदपराह्णयोः ।।
न्याय्यैस्तिथिगौरवक्षयादूर्ध्वतिथेस्तथा ।। साम्ये तूर्ध्वतिथेर्ग्राह्यापरा विद्धैव वृद्धिवत् ।। नक्ष
त्रात्यपराह्णे चेत्सर्वास्या कुतपो यथा ।। वैषम्ये नैकदेशस्य व्याप्तौ ग्राह्या महत्त्वतः ।। साम्येन चेक्ष
येसर्वापरास्याद्वृद्धिसाम्ययोः ।। वृद्धिसाम्यक्षयाग्राह्या तिथिर्गानोर्ध्वगोदृह ।। द्वितीयाद्यास्तु पर्व
तास्तूर्यप्रकरणोदिताः ।। संचारणीयः साम्याद्धिः तिथिषु प्रतिपन्नयः ।। क्वचित्क्वचिद्विशेषोस्ति
सोयमत्राभिधीयते ।। पूर्वेद्युरसति प्रातः परेद्युस्त्रिमुहूर्त्तगा ।। सा द्वितीयापरापोष्या पूर्वविद्धा ।।त्रिव।।
तथापरा ।। रंभतृतीया पूर्वास्यादुत्तरास्याद्वतांतरे ।। परेद्युर्न्नास्ति चेत्सर्वैर्विद्धाप्यस्तु व्रतांत ।।३।।
रा ।। मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे ।। क्षुधाधिकायामप्येवं गणयोगप्रशंसनात् ।। चतुर्थ्यस्तु

माध० ॥४॥

तिञ्च॥ शुद्धायामपि विद्धायां न संभाव्योत्तरा तिथिः॥ शुद्धाधिकायां योगश्चेदेकस्मिन्वा दिनद्वये॥ नैकयो-
गोस्ति संदेहो द्वियोगे प्रथमं दिनं॥ सदा निशीथे पूर्वाद्युत्तमो मध्यमोधमः॥ योगस्त्रिधापि पूर्वेद्युः
संपूर्णत्वादुपोषणं॥ विद्धाधिकायामप्येकदिने योगे स गृह्यतां॥ द्वयोर्योगस्त्रिधा भिन्नो निशी-
थे व्याप्तिभेदतः॥ तद्व्याप्तिर्दिन एकस्मिन्नुभयोर्नोभयोरपि॥ एकस्मिंश्चेत्तद्दिनं स्यात् पक्षयोरन्त्ययोः
परं॥ बुधे सोमे जयंती च द्वारे सातिप्रफलप्रदा॥ तिथ्यृक्षयोर्द्वयो रंते तदुत्तमं पारणं भवेत्॥ एकस्यांते
मध्यमं स्यादुत्सवांते धमं स्मृतं॥ यस्मिन्वर्षे जयंत्याख्ययोगो जन्माष्टमी तदा॥ अंतर्भूता जयं-
त्यां स्याद्वृक्षयोगप्रशस्तितः॥ नवमी पूर्वविद्धैव पक्षयोरुभयोरपि॥ दशा पूर्वोत्तरा शुक्लादशम्ये-
वं व्यवस्थिता॥ जयंतीव्रतवन्नित्यं काम्यं चैकादशीव्रतं॥ अरुणोदयवेधोत्र वैष्णवस्योदयस्तथा॥
उक्तो द्वादशमी वेधो वैष्णवः स्मार्तयोः क्रमात्॥ कलाकाष्ठादिवेधोपि ग्राह्यो त्रिमुहूर्तवत्॥ वैष्णवा
न साध्यागमोक्तादीक्षां प्राप्तो हि वैष्णवः॥ विद्धा स्यात्स्मार्तवैष्णवेन शुद्धाप्याधिक्यसंभवे॥ एकादशी
द्वादशी वाधिका चेत्स्यात्तां दिनं॥ पूर्वं ग्राह्यं तूत्तरं स्यादिति वैष्णवनिर्णयः॥ एकादशी द्वादशी चेत्सु
मयं वर्धते यदा॥ तदा पूर्वदिनं त्याज्यं स्मार्तैर्ग्राह्यं परं दिनं॥ एकादशीमात्रवृद्धौ गृहियत्योर्व्यव- ॥ शिव ॥
स्थितिः॥ उपोष्याग्रहिभिः पूर्वा यतिभिस्तूत्तरा तिथिः॥ द्वादशीमात्रवृद्धौ तु शुद्धा विद्धैव व्यवस्थिते॥ ॥४॥

शुद्धा पूर्वोत्तरा विद्धा स्मार्ते निर्णय ईदृशः॥ श्रवणेन युता चेत्स्याद्द्वादशी सा हि वैष्णवे॥ स्मार्तैश्चोप-
षणीया स्यात्त्यजेदेकादशीं तदा॥ उपवासव्रतादन्यव्रते साधमुहूर्तकैः॥ सप्तमिर्दशमीविद्धामेता-
मिकादशीं त्यजेत्॥ द्वादशी पूर्वविद्धैव ~~वा~~ निखिलेषु व्रतेष्वपि॥ शुक्लात्रयोदशी पूर्वा परा कृष्णा त्रयो-
दशी॥ अलाभे सापि पूर्वैव पूर्वानंगत्रयोदशी॥ या शुक्ला गृह्यते पूर्वा गृह्यतां सापराह्णिकी॥ चतु-
र्दश्युत्तरा शुक्ला पूर्वा कृष्णा चतुर्दशी॥ उभयोर्द्विमुहूर्तैव याद्या नंतव्रते तिथिः॥ शुक्लापि रात्रित्रियुक्ता
स्याच्चैत्रश्रावणमासयोः॥ शुक्लासर्वापि पूर्वैव यदा स्यादपराह्णिकी॥ प्रदोषे वा निशीथे वा द्वयोर्वा
या स्ति सा भवेत्॥ शिवरात्रिव्रतं तत्र द्वयोः संतापशस्यते॥ तदभावे निशीथैकव्याप्तासापि परिगृह्य-
तां॥ तस्या अभासंभवे ग्राह्या प्रदोषव्यापिनी तिथिः॥ तिथ्यंते पारणं यामत्रयदर्वाक् समापने॥ अ-
न्यथा पारणं प्रातरन्यतिथ्युपवासवत्॥ पूर्वविद्धैव सावित्रीव्रते पंचदशी तिथिः॥ नोझ्या द्वादशभि-
तस्यस्युश्चेन्न च परेहनि॥ व्रतांतरापि सर्वोपि परेहन्येव सर्वदा॥ श्राद्धे पराह्णकालीनो दर्श आ-
ह्निकवन्मतः॥ दिनद्वयेप्येकदेशे व्याप्तौ ग्राह्यो महत्त्वतः॥ तुल्यत्वे चेदेकदेशे क्षये पूर्वोन्यथोत्तरः॥
कृत्स्नव्याप्तौ द्वयोरह्नोरुत्तरः स्थितिवृद्धितः॥ साम्ये न पित्र्यवस्था स्यान्न स्याच्चेदपराह्णयोः॥

पूर्वेद्युः साग्निकः कुर्यादपरेद्युर्निरग्निकः ॥ पर्वप्रतिपदोः संधिर्मध्याह्नाद्वा ततः पुरा ॥ अंशौ त्वाधानं पूर्वेद्दिने
माध० ॥५॥ यागः संधिदिने भवेत् ॥ ऊर्ध्वं मध्याह्नतः संधावन्वाधानं दिने हि ॥ इष्टं परदिने कुर्यादन्यो वाजसनेयि
नः ॥ यस्तु वाजसनेयी स्यात्तस्य संधिदिनात्पुरा ॥ न क्वाप्यन्वाहुतिः किंतु सदा संधिदिने हि सा ॥ संधि
श्चेत्संगवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः ॥ सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिः ॥ वृद्धिः प्रति
पदायास्ति तदूर्ध्वं पर्वणि क्षिपेत् ॥ क्षयस्याप्यर्धं तथाप्यस्ति ह्रासं संधिर्निश्चीयतां सदा ॥ बौधायनमतेद
र्शश्राद्धं चेद्विधिर्विशिष्यते ॥ द्वितीया त्रिमुहूर्तान्वा प्रतिपद्यापराह्णिकी ॥ अथ न्वाधानं चतुर्दश्यां दर्शस्त्विः
लोपि वर्धयेत् ॥ दर्शश्राद्धं तथा कार्यमिति बौधायनोदितं ॥ इष्ट्या विकृतिः सर्वा पर्वण्येव तिथिनिर्णयः ॥
पंचमे तु प्रकरणे पूर्वार्द्धे भाद्रनिर्णयः ॥ उत्तरार्धे कालभेदात्कर्मभेदोपदेशनं ॥ यस्मिन्नस्तमियाद्भा
नुस्तं नक्षत्रमुपोषणे ॥ मुख्यं तस्यासंभवे तु गृहीतव्यं निशीथयुक् ॥ उपवासे यदृक्षं स्यात्तद्दिनके
कर्मस्वयोः ॥ उदये त्रिमुहूर्तस्थं नक्षत्रं व्रतदानयोः ॥ दिनद्वये तथा सत्तु पूर्वस्यां तु व्रतं ततः ॥ श्रवत्ता
तूत्तरं स्याद्यदुपाकरणकर्मणि ॥ पित्र्ये तु तिथिवत्सर्वो नक्षत्रस्यापि निर्णयः ॥ पूर्वस्यादुपवासादावुत्त
रा व्रतदानयोः ॥ योगः श्राद्धे कर्मकालव्यापकः परिगृह्यते ॥ करणं यद्दिने तत्र व्याप्तं रात्रौ यदा तु ॥शिव॥
- - - दा ॥ दिनद्वये क्रमेणाभ्यामुपवासः प्रसिध्यति ॥ वारेषु संक्रमाभावाद्गृहीतव्यं यथास्थि ॥५॥

परोपोष्या गणनाथव्रतस्य तु ॥ मध्याह्नव्यापिनी पूज्या तद्वन्नागचतुर्थ्यपि ॥ परेद्युरेव मध्याह्न
व्याप्तौ विघ्नस्य सोत्तरा ॥ अन्यथा पूर्वविद्धैव मातृयोगप्रशस्तितः ॥ पूर्वेद्युरेव तद्व्याप्तौ पूर्वा सर्प
प्रिया तिथिः ॥ नो चेत्सर्पस्य पंचम्या योगो यत्र प्रशस्यते ॥ गौर्या शुद्धजया पश्चान्नागविद्धा निषिध्य
ते ॥ सर्वत्र पंचमी पूर्वा ग्राह्या स्कंदव्रते परा ॥ नागविद्धा स्कंदषष्ठी सा निषिद्धा व्रतं तदे ॥ उत्तरस्या
अलाभे तु नागविद्धापि गृह्यतां ॥ विना द्वादशनाडीभिर्नागवेधो न दोषकृत् ॥ सप्तमी पूर्वविद्धैव व्रते
षु निखिलेष्वपि ॥ अलाभे पूर्वविद्धायाः परविद्धापि गृह्यते ॥ व्रतमात्रेऽष्टमी कृष्णा पूर्वा शु
क्लाष्टमी परा ॥ दूर्वाष्टमी तु शुक्लापि पूर्वविद्धा विधीयते ॥ पक्षद्वयेऽप्युत्तरैव शिवशक्तिमहोत्सवे ॥
ज्येष्ठर्क्षयोगे पूर्वापि ग्राह्या ज्येष्ठाख्यव्रते तिथिः ॥ मध्याह्नादूर्ध्वमृक्षं चेत्सा परेद्युः सा प्रशस्यते ॥ ज्येष्ठ
र्क्षभानुवाराभ्यां युक्ताष्टम्यति दुर्लभा ॥ जयंत्याख्यव्रतं भिन्नं कृष्णजन्माष्टमीव्रतात् ॥ शुद्धा
च सप्तमीविद्धेत्येवं जन्माष्टमी द्विधा ॥ सप्तमी चेन्निशीथात्प्राक् विद्धा शुद्धान्यथा भवेत् ॥ शुद्धा
या नास्ति संदेहो विद्धायास्त्रिविधेष्यते ॥ निशीथयोगः पूर्वेद्युरपरेद्युर्द्वयोरपि ॥ पूर्वैव प्रथमे पक्षे परे
वोत्तरपक्षयोः ॥ अष्टमी रोहिणीयुक्ता जयंती सा चतुर्विधा ॥ शुद्धा शुद्धाधिके त्येवं विद्धा विद्धाधिके

तं॥आसन्ननाड्यः संक्रांते पुण्याः स्नानादिकर्मसु॥चरेषु कर्कटे पूर्वा मकरे विंशतिः परा॥वर्तमाना
तुलामेषे नाड्युभयतो दश॥वृषभादौ स्थिरे पुण्याः प्राक्पश्चादपि षोडश॥मिथुनादौ द्विःस्व
भावे तु सप्त षष्टिनाडिकाः॥अहः संक्रमणे रात्राववनुष्ठाननिषेधतः॥उक्तौ कालौ व्यवस्थाप्यौ ते
द्वे पूर्वपश्चिमौ॥रात्रौ संक्रमणे भानोर्दिनार्धं स्नानदानयोः॥अर्धरात्रादधस्तस्मिन्मध्या
ह्नस्योपरि क्रिया॥ऊर्ध्वसंक्रमणे चोर्ध्वमुदयात्प्रहरद्वयं॥पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः
प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ॥कर्कटे मकरे रात्राववश्याचारादनुष्ठितिः॥पूर्णिमाप्रति
पत्संधौ राहुः संपूर्णमंडलं॥ग्रसते चेद्द्रुमं केचिद्दर्शप्रतिपदंतरे॥ग्रस्यमाने भवेत्स्नानं ग्रस्ते
होमो विधीयते॥मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते॥सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्
यं॥चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विना॥अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे॥भुं
जीत संगवे चेत्स्यान्न पूर्वं भुंजीमाचरेत्॥ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत्॥ग्रस्तावे
वास्तमानं तु रवींदू प्राप्नुतो यदि॥तयोः परेद्युरुभयोः स्नात्वाभ्यवहतेन्नरः॥इति द्वंद्वनिर्णयं न्य
न्यायैर्विवरातुमध्योधर्मः॥ ॥इति परिभाषा॥ ॥ननु नापमुद्धर्मः सफलः। कालस्य

माध०
॥६॥

गगनकुसुमायमानत्वात्॥ तदेतत्परमरहस्यमभिजाननः कपिलमहामुनिस्तत्वानि विवेक्तु
कामः कालमुपेक्ष्यान्याप्येवं पंचविंशतितत्वानि विवेचयति रूपयामास। मूलप्रकृतिरविक
तिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति॥ न चैते
ष्वेव तत्वेषु कालस्योत्तभावो मुनिनाविवक्षित इति शंकनीयं। त्वदभिमतस्य कालस्य यथोक्त
पंचविंशतितत्वानां च परस्परमसंगतविलक्षणत्वात्॥ तथाहि॥ चिरक्षिप्रादिव्यवहारस्या
साधारणो हेतुः काल इति भवदभिमतं काललक्षणं तत्वानां त्वनीदृशानि लक्षणानि सत्वरज
स्तमोगुणानां साम्यावस्था मूलप्रकृतिः॥ महदहंकारपंचतन्मात्राख्यानां सप्तानां प्रकृतिवि
कृतीनां मध्ये अध्यनिश्चयस्यवसायहेतुर्महत्तत्वं॥ अभिमानहेतुरहंकारः॥ शब्दस्पर्शरूपर
सगंधात्मकानि पंचतन्मात्राणि॥ पृथिव्यादिपंचमहाभूतानामेकादशेंद्रियाणां च षोडशानां वि
काराणां लक्षणानि प्रसिद्धानि॥ अप्रकृतिरविकृतिः पुरुषश्चिदात्मकः॥ न ह्येवंलक्षणेषु तत्वे
षु कालस्यांतर्भावः संभाव्यते नापि षड्विंशतितत्वांतरं मुनिरनुमन्यते॥ कथं तर्हि मुनिप्रणीता
नि तत्वानि आर्याभिः संगृह्णन् ईश्वरकृष्णो बहिः करणीतरसीकारणविच्छिन्न कालं व्या

॥शिव॥
॥६॥

माध० ॥८१॥ त् उक्तलक्षणाभावात् अहोस्वित् प्रमाणाभावात् अथवा प्रयोजनाभावात् अथवा तत्त्वगतपंचविंशति
संख्यापर्यासपादष्टवेनावसिताष्टद्वाजाउयात् ॥ न प्रथमः ॥ कालनिराकरणसूत्रस्य मुनिनाप्रणीतस्या
नुपलंभात् ॥ न द्वितीयः अतिप्रसंगात् ऋग्वेदादिप्रोक्तानां ज्योतिष्टोमादीनामायुर्वेद धनुर्वेद गांधर्व
वेद प्रोक्तानां मोषधशास्त्रस्वरादीनां चासंगृहीतत्वेन तेष्वपि भूयतः प्रद्वेषः केन कार्यते ॥
अथ तेषां विशिष्ट्या संशये हेपि सुखदुःखमोहात्मकत्वेन गुणत्रयांतर्भावादस्य वा थोत्संशय इत्युच्येत
तर्हि कालस्याप्यसो न दुर्वार इति तद्इति बुद्धिं समाधत्स्व कालस्य गुणत्रयपरिणामत्वाभावयवत्वम
निमित्तंघटादेरिव प्रसज्येतेति त्वेत् न नित्यनिरवयवकाव्नतत्वाभिनिवेशावतो वैशेषिकादेः पतत्वयं
वज्रप्रहारः शिरसि ॥ वेदवादिनां तु नाकापि क्षतिः कालस्यापि सावयवत्वयोः प्रत्यक्षश्रुतावुपलभ्य
मानत्वात् तैत्तिरीयशाखायां नारायणीयकालोत्पत्त्यानात् सर्वे निमेषा जज्ञिरे विद्युतः पुरुषा
दधि ॥ कला मुहूर्ताः काष्ठाश्च अहोरात्राश्च सर्वशः अर्धमासा मासा ऋतवः संवत्सराः कल्पंतामिति ॥
तस्यामेव शाखायां आरुणकेतुकचयनब्राह्मणे ॥ सावयवत्वं श्रूयते उक्तो वैवो वासांसि च कालावयवं ॥शिव॥
वानामितः प्रतिचेति ॥ इतोस्मादनुवाकात् प्रतिचेति इतोस्मादधस्तनेष्वनुवाकेषु कालावयवाना ॥८॥

मत्तूनां ध्यातव्यो वैषमुक्तं शास्त्राणि चोक्तानीत्यर्थः ॥ नित्यत्वनिरवयवत्वाभिधायिनो वैशेषिका
दिशास्त्रस्याप्रमत्तादेवताइति वदापेक्षिकनित्यतायामंतर्धानशब्दमुपेतयक्षराक्षसादिस्पर्शव
त्संस्पर्शयोग्यावयवशून्यतायां च तात्पर्यं वर्णनीयं ॥ ॥एवं च सति विरोधाधिकरणन्यायोत्रा
नुगृहीतो भवति ॥ तस्य च न्यायस्य संग्रहकावेतौ श्लोकौ औदुंबरी वेष्टनीया सर्वा वेषा स्मृतिर्मि
तिः ॥ अमितिर्वेति संदेहे मितिः स्याद्दृष्टकादिवत् ॥ औदुंबरीस्पर्शान्नू गायेदिति प्रत्यक्षवेदतः ॥ वि
रोधान्मूलवेदस्यानुमानास्यनमानतेति ॥ अयमर्थः ॥ अध्वरे महावेद्यां सदोनामकस्य मंडपस्य
मध्ये काचिदुदुंबरशाखा स्तंभत्वेन निहिता भवति ॥ तामुद्दिश्य वस्त्रवेष्टनं स्मर्यते ॥ औदुंबरी सर्वा
वेष्टयितव्येति ॥ तत्र संशयः ॥ एषा स्मृतिः प्रमाणं न वेति ॥ तत्र पूर्वाधिकरणे अष्टकाः कर्तव्या इत्य
स्याः स्मृतेर्मूलवेदानुमापकत्वेन प्रामाण्यमुक्तं तेनैव न्यायेन सर्ववेष्टनस्मृतिः प्रमाणमिति ॥ पूर्वप
क्षः ॥ औदुंबरीं स्पृष्ट्वोद्गायेदिति प्रत्यक्षश्रुतौ स्पर्शो भिधीयते न चासौ सर्ववेष्टने सत्युपपद्यते तथा त
च सर्ववेष्टनस्मृतिर्मूलभूतवेदानुमानस्य प्रत्यक्षश्रुतिविरुद्धस्य कालात्ययापदिष्टत्वेन निर्मूलत्वा
वेष्टनस्मृतिर्न प्रमाणमिति सिद्धांत इति ॥ अथ मन्यसे ॥ महता तपसा राध्यानिश्वं तत्प्रसादलब्धं सर्व

माध०
॥८॥

तत्त्वपदः कणादमहामुनिर्वेदतात्पर्यं सम्यग्वेदेति वेदस्यैवमंदमतिप्रतिपादिनातीतादर्थांतरमुक्ते
तव्यमिति॥ एवमपि यस्य प्रसादादयं सर्वे स्तनामलं भत स एव शिवो मुख्यः सर्वे त इति तन्मतानु
सारेण कणादमतस्यैवान्यथानयनमस्ते तमनुचितं॥ शिवो हि सर्वेष्वागमेषु षट्त्रिंशति तत्त्वा
नि निरूपयेन् कालतत्त्वस्याप्रतिमंगीचकार निखिलशैवागमसारमायाभिः संगृह्णानो भोजरा
जः शुद्धानि पंचविंशति तत्त्वानि शिवशक्तिसदाशिवेश्वरविद्याख्यानि निर्दिश्यैतानि दर्शयन् श
मायाकार्यत्वोक्तिपूर्वकमेव कालं निरदिक्षत् जगतः कृतये जगत्कर्तृतार्थमायातस्तत्त्वपंचकं भ
वति॥ कालो नियतिश्च तथा कला च विद्या च रागश्चेति तानि मस्या सहितान्येकादशतत्त्वानि स
ख्यप्रसिद्धपंचविंशतितत्त्वानि वोदिव्यक्रमेण विवृण्वन्निदमाह॥ नानाविधशक्तिमयी सा जन
यति कालतत्त्वमेवादौ॥ भाविभवद्भूतमयं कलयति जगदेतदंत॥ कालोंत इति॥ तच्च द्वकाकार इ
त्यव्याख्येयो॥ नन्वेष कालो नैयायिकादिभिर्नित्यो भ्युपगत अतस्तत्र भाविभवद्भूतमय इति भूता आ
दिरूपेण त्रिविधत्वाच्चेन्नानेनास्यानित्यत्वं सिद्धमिति भावः॥ केन कार्येणास्य सिद्धिः अत ॥शिव॥
आह॥ कलयति जगदेत कालोंत इति॥ चिरक्षिप्रादिप्रत्ययोपाधिद्वारेण कलयत्याक्षिपतीत्यर्थ इति ॥८॥

र्व॰जहारसंप्रतकालं वा त्रिकालमाभ्यंतरं करणमिति॥ परप्रसिद्ध्या परो बोधनीय इति न्या
येनायं व्यवहारो न तु स्वसिद्धांताभिप्रायेणेति वदामः॥ अत एवैतद्व्याख्यानं व्याचक्षाणा वाचस्पति
मिश्रास्तत्त्वकौमुद्यामेवमाहुः कालस्तु वैशेषिकाभिमत एको नागतातीतादिभेदप्रवर्त्तयितु
मर्हति तस्मादयं येरुपाधिभेदैरतीतानागतादिभेदभावं प्रतिपद्यते संभूय त एवोपाधयो व्य
वहारहेतवः कृतमंतर्गडुना कालेनेति सांख्याचार्याः तस्मान्न कालरूपतत्त्वांतराभ्युपगम
इति॥ अथोच्यते॥ भूतकालो वर्तमानकालो भविष्यकाल इति एवं त्रिष्वपि भूतादिष्वनुगतः काल
प्रत्यय एकमनुगतं कालतत्त्वमंतरेणानुपपन्न इति॥ तत्र पदार्थप्रत्ययवदुपपत्ते यथा भवन्म
ते द्रव्यपदार्थो गुणपदार्थ इति षट्सु भावेषु चतुर्षु भावेष्वप्यनुगतः पदार्थप्रत्यय एकमनुगतंप
दार्थं दृष्टाच्य तत्त्वांतरमंतरेणाप्युपपन्नः तथा कालप्रत्ययः कुतो नोपपद्येत तस्मा
न्निस्तत्त्वं कालं निर्णेतुं महानयमुद्यमः प्रेक्षावच्छिरोमणेर्माध्वाचार्यस्य न कथंचिदप्युपप
न्न इत्येवं प्राप्ते ब्रूमः॥ आयुष्मतश्चैतस्यैवं निरूढकालतत्त्वे यः प्रद्वेषः स कस्य हेतोरिति व
क्तव्यं॥ किं कपिलमहामुनिना निराकृतत्वात्॥ किं वा सांख्यशास्त्रप्रणेतृषु तत्त्वेष्वसंगृहीततत्त्वा

दृष्टं प्रत्यक्षश्रुतिसहकृते रागमेः कणादस्य। स्मृत्यस्य बाधे सत्युत्तरमीमांसायां द्वितीयाध्यायप्र
थमाधिकरणन्यायेनानुगृह्यते तस्य संग्रहः कावेतौ श्लोकौ॥ सांख्यस्मृत्यास्तु संकोचो न वा वे
दसमन्वये धर्मादिः सावकाशत्वं स्यं कोच्येन वकाशाया॥ प्रत्यक्षश्रुतिमूलाभिर्मन्वादिस्मृतिभिः
स्मृतिरमूलापि ला बाध्या न संकोचो न या ततः इति॥ अयमर्थः॥ ऋग्वेदादिभिरग्निहोत्रादि
धर्मो ब्रह्मणो जगत्कारणत्वं च प्रतीयते॥ सांख्यस्मृत्यादिभिस्तु प्रधानस्य जगत्कारणत्वं प्रति
पादयति॥ तत्र तया स्मृत्या वेदस्य संकोचोऽस्ति न वेति संशये स्मृतिः जगत्कारणमेतरेण
निरवकाशत्वात्प्राबल्यं वेदस्य तु धर्मेऽपि चरितार्थत्वाद्दौर्बल्यं॥ ततस्तत्स्मृत्यनुसारेण वेदः सं
कुचित इति पूर्वपक्षः॥ प्रत्यक्षश्रुतिभिर्बह्वीभिरनुगृहीता बह्वो मन्वादिस्मृतयो ब्रह्मकारणतामा
चक्षते सांख्यस्मृतिस्त्वेकाकिनी मूलहीना चेति दुर्बलत्वात्सैव बाध्या अतो नास्ति वेदस्य संकोच इ
ति राद्धान्त इति। अथ तार्किकत्वाभिमानग्रहग्रहीतः सन्नपरवक्ता एवं ब्रूषे ॥ भूतादीनामौपा
धिकानां कालविशेषाणामेवोत्पत्तिर्न तु निरुपाधिकस्य मुख्यकालस्येति॥ तर्हि कपर्दिकानेव

माध० ॥९॥

षणप्रवृत्तश्चिंतामणिमलभंतेसेतस्य यासिष्ठरामायणप्रोक्तस्याभाणकस्यत्वमेवविषयोभूः
यतसाधर्म्यन्नानायदृव्याण्यनिच्छिन्नपरंब्रह्मलत्वमेवागमःव्यवहारहेतुनांभूतादिकालवि
न्नौषाणामाधारःस्वयंव्यवहारातितोनित्योनिरवयवोमुख्यःकालोयःसपरमात्मैषतथाच
श्वेताश्वतराआमनंतिहाकालकालोगुणीसर्वविद्यस्तदृतिआस्तांनित्यत्वानित्यत्वासावयवत्व
चिंता।सर्वथाप्यस्तिसांख्यतत्वेष्वार्थिकःकालस्यसंग्रहःसाक्षात्स्वग्रहाभावस्तुज्योतिशामा
द्दिवत्।प्रकृतिपुरुषविवेकानुपयोगादित्यवगंतव्यं॥तृतीयश्चतुर्थपक्षौतुभवतोवैशेषिक
परिच्छयगंधोपिनास्तीतिप्रकटतवैशेषिकग्रंथेषुसर्वेष्वपिकालप्रकरणेतल्लक्षणस्यतत्सा
धकानुमानस्यचप्रपंचितत्वात्प्रमाणेतराणितुकालसाधकानिश्रुत्येवापन्यस्तानितथातै
त्तिरीयाआरुणाकेतुकेचसामनंति॥स्मृतिःप्रत्यक्षमैतिह्यंमनुमानचतुष्टयं।एतैरादित्यमं
डलंसर्वैरेवविधास्यतेइति॥तत्रस्मृतिरनुमेयश्रुतिमूलंमन्वादिग्रंथः।प्रत्यक्षंश्रोत्रग्रा ॥शिव॥
ह्योकृत्रिमोवेदाख्योक्षरराशिः।योगिप्रत्यक्षं[illegible]पनिषदाभिमतसाक्षिप्रत्यक्षंएतिह्यमिति ॥९॥

माध०

॥१०॥ कालइतिबर्ध्यंचाः॥अहमेवकालोनाहंकालेतितेत्तिरियकालसंध्याकश्चि संध्यायाः कालइतिसाम
गाः॥ योगशास्त्रेष्वपि संधमविशेषाद्धारणाध्यानसमाधित्रयरूपाद्यो जिनोतितादिकालं
प्रत्यक्षतः॥पश्यंतीत्यभिहितं॥तथाचपातंजलसूत्रं परिणामत्रयसंयमादतीतानागतज्ञानमि
तिसाक्षिप्रत्यक्षमिति अहमस्मिन्कालेविवसामीत्यनुभवस्तावत्सर्वजनीनः नचासौवाह्येंद्रियज
कृतः कालस्यरूपादिहीनत्वात्॥नापिमानसः तार्किकैस्तदनंगीकारात्॥नाप्यनुमानादिज
न्यः परोक्षप्रत्ययत्वात् अतः सामग्र्यभावेप्यापरोक्ष्यदर्शनात्साक्षिप्रत्यक्षमेवोपनिषदाम
न्यंते॥इतिहासेपिमहाभारतेपठ्यते॥प्रहरोघटिकान्यूनोप्रहरोघटिकाधिकोसकालकुत
पोज्ञेयः नामपितॄणांदत्तमक्षय्यमितिपुराणेपि अनादिरेषभगवान्कालोनंतोक्षरःपर
इतिशिष्टाश्चपौर्णमास्यकालेहोमेनैतुकैसंवत्सकान् स्वस्वकुलोचितान्देवताविशेषेभ्यःक्षी
रदध्यादिसमर्पणादिकान्धर्मविशेषान्भानुवारादिकालविशेषेसमाचरंति॥तदेवमने
कप्रमाणप्रमितेकालेप्रमाणाभावारूपश्चतुर्थपक्षः कथमाशंक्यते॥नापिप्रयोजनाभावा ॥शिव॥
दितिपंचमःपक्षोयुज्यते॥तार्किकैस्तावत्सर्वोत्पत्तिनिमित्तकारणत्वमुद्घोषितंलोकेचकृष्या ॥१०॥

द्युपयोगः कालविशेषस्यकृषीवलादिभिर्व्यवह्रियते॥गृहप्रवेशप्रयाणाद्युपयोगोज्योतिःशा
स्त्रप्रसिद्धः॥श्रौतस्मार्तकर्मोपयोगस्तुप्रदर्शयिष्यते॥तस्मात्अध्यक्षोदयकृतस्तत्प्रद
र्श इत्ययंषष्ठः पक्षः पक्षः परिशिष्यते॥तथाचपापात्मनस्तववुध्यपराधंपुण्यात्मनिमाध
वाचार्येसमारोपयन्शिक्षयाद्ज्योसीति॥तदेवंकालस्यप्रत्याख्यानानुमरात्मत्वात्तन्निर्णयो
द्यमः सफलइतिसुस्थितेननुकृतरः कालोत्रनिर्णीयते किं केवलः कालउत कालः॥ननुकि
मित्यप्रसिद्धभाषयाभीषयसि नभीषयाम्यहं किंत्वस्येवकलयितव्यासः केवलःकालःसच
तत्रप्रकाशवच्चतेनपूर्वमुदाहृतः कलयतिजगदेकालोंतइतितादृशःकालोप्युत्पत्तिस्थिति
विनाशकारणत्वेनकलयितव्यः सकाल कालः सच वाशिष्ठरामायणेदर्शितः॥कालो
पिकल्पतेयेनेतिश्रुतिश्चभवतिसर्वविदव्यक्तिदेवेदात्मयोभिधत्तःकालःकालोगुणीसर्व
विद्यः प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबंधहेतुरितिपुराणेपि अनादिरेषभ
गवान्कालोनंतोक्षरःपरः॥सर्वगत्वात्स्वतंत्रत्वात्सर्वात्मत्वान्महेश्वरः॥ब्रह्माणोबहवोरुद्रा
अन्येनारायणादयः॥एकोहिभगवानीशः कालःकविरितिस्मृतेः॥ब्रह्मनारायणेशानांत्र

माध०
॥११॥

याणां प्राकृतो लयः प्रोच्यते कालयोगेन पुनरेव च संभवः॥ परं ब्रह्म च भूतानि वासुदेवोपि शंकरः॥
कालेनैव च सृज्यंते स एव ग्रसते पुनः॥ तस्मात्कालात्मकं विश्वं स एव परमेश्वर इति॥ विष्णुधर्मो
त्तरेपि॥ अनादिनिधनः कालो रुद्रः संकर्षणः स्मृतः॥ कलनात्सर्वभूतानां स कालः परिकीर्तितः॥
कर्षणात्सर्वभूतानां स तु संकर्षणः स्मृतः॥ सर्वभूतशमित्वाच्च स तु रुद्रः प्रकीर्तितः॥ अनादि
निधनत्वेन स महान्परमेश्वर इति॥ ज्योतिःशास्त्रेपि भूतानामंतकृत्कालो कालोन्यः कलना
त्मक इति॥ तत्रैवं सति कालयोर्द्वयोर्मध्ये कः कालो निर्णेतव्यः॥ तस्य धर्मानुष्ठानेष्वनु
हेयत्वादनुपादेयत्वाच्च यस्त्वितरो मासपक्षतिथ्यादिरूपः सोपि ज्योतिःशास्त्र एव सम्यङ्निर्
णीत इति कृतमनया कालनिर्णयप्रवृत्त्येति प्राप्ते ब्रूमः॥ उभयमप्यत्र निर्णेतव्यं कालस्य ज
गदीश्वरस्य सर्वेषु कर्मसु आरंभेष्वनुस्मर्तव्यत्वात्॥ अत एव शिष्टाः पुण्याहवाचने नादावीश्वर
मनुस्मरंति॥ सर्वेषु कालेषु समस्तदेशेष्वशेषकार्येषु तथेश्वरेश्वरः॥ सर्वैः स्वरूपैर्भगवा
ननादिमध्यांतमांगल्यं विदधातु मे हरिः॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु॥ ॥शिव॥
न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतमिति॥ मासादिभेदस्य तु स्वरूपेण निर्णीतत्वेपि श्रौ ॥११॥

हासपुराणादिकं ज्योतिःशास्त्रस्याप्यंतर्भावो द्रष्टव्यः॥ अनुमीयते स्वमूलभूतस्मृतिवाक्यमनेनेत्यनु
मानं शिष्टाचारः तस्य च स्मृत्यनुमापकत्वमाचार्यैः विस्पष्टमभिहितं॥ आचाराच्च स्मृतिं ज्ञात्वा स्मृ
तेश्च श्रुतिकल्पनमिति॥ तदेवं स्मृत्यादिना चतुष्टयं संपन्नं एतैः श्रुतिभिः सर्वैरथादित्यमंडलं प्रमी
यत इति मंत्रस्यार्थः॥ ननु स्मृत्यादीनि मंडले साधकत्वेनात्रोपन्यस्तानि न तु कालसाधकत्वेने
ति चेत्॥ नैवं मंडलस्य सार्वजनीनप्रत्यक्षसिद्धत्वेन तत्र स्मृत्याद्यनुपयोगात् कालविवक्षयैवा
त्र कालनिर्वाहके मंडले तान्युपन्यस्तानि तथा च मंडलकराकलितैः प्रमीयते कालविवक्षायां चोत्त
रमंत्रे श्रुतिस्फुटत्वानंतरो मंत्र एवमाम्नायते॥ सूर्यो मा विमादत्ते सर्वस्माद्भुवनादधि॥ तस्याः
पाकविशेषेण स्मृतं कालविशेषमामिति॥ तस्यायमर्थः॥ भुवनगतं सर्वं सर्वभूतजालमधिर
स्य रसवीर्यपाकादिभिस्तत्र तदनुग्रहसमर्थं मरीचीः सूर्यः स्वीकरोति तत्कृते तद्गतपाकविभे
देन निमेषादिपरार्धपर्यंतं कालविभेदोस्माभिरवगतो भवतीति कालप्रतिपादको मित्र स्मृत्या
तत्र मनुः दीनुदाहरामः॥ कालं कालविभक्तींश्चेति सृष्टिप्रकरणे कालं व्यवजहार॥ याज्ञवल्क्योपि
श्राद्धकालः प्रकीर्तिता इति एवमन्यास्वपि स्मृतिषूदाहार्यं श्रुतिष्वपि॥ कृतं यच्चूनानि चिनेति

तस्मात्कर्मविशेषेण सह कालस्यांगांगिभावो निर्णेतव्यः ॥ यद्यप्यसौ हेमाद्रिप्रभृतिषु ग्रंथे
षु निर्णीतस्तथाप्यनेकत्र विप्रकीर्णस्यैकत्र संग्रहाय प्रयत्नः क्रियते ॥ तदेवं चिकीर्षितस्य
ग्रंथस्य कालस्वरूपो विषयः संग्रहरूपं प्रयोजनं चास्तीत्ययं ग्रंथ आरभ्यते ॥ नित्यो जन्य
श्च कालौ द्वौ तयोराद्यः परमेश्वरः ॥ सो वाङ्मनसगम्योपि देही भक्तानुकंपयेति ॥ नित्यका
लस्य परमेश्वरत्वे प्रमाणं पूर्वमेवोपन्यस्तं परमेश्वरस्य वाङ्मनसागम्यत्वे सर्वे वेदांतास्त
दनुसारस्मृतिपुराणानि तत्त्वेवमनुभवश्च प्रमाणं भक्तानुग्राहिमूर्तिस्वीकारश्च तवलकारा
ख्यसामवेदशाखाविशेषकस्यां विदाख्यायिकायामाम्नायते तस्यां चाख्यायिकायामेवमुक्तं
अग्निवाय्विंद्रादयो देवा ईश्वरानुगृहीताः सर्वत्र विजयमानाः स्वकीयमेवैतत्सामर्थ्यमित्यभि
मन्यतस्तान्बोधयितुमवाङ्मनसगम्यं परमेव ब्रह्म यक्षरूपां चक्षुर्गम्यां काञ्चिन्मूर्तिं धारयि
त्वा प्रादुर्बभूव तया तया सह संवादं कृत्वापि तथापि संचिंत्तावग्निवायू ब्रह्मत्वं नैव बुबुधाते ॥
इंद्रस्तु सात्विकत्वात्तं बुबुध इति वासिष्ठरामायणे मुमुक्षूपाख्याने मुक्तं तमवलोक्यत
सितांभ्रयुः कृद्धो मारयिता रंकालं नाशमुपागतः तदा मनुगृहीतुं कालरुद्रेण स्वरूपेणाविर्भ

माघ०
॥१२॥

भूवेतिषबते।अथकलितरूपोसौकालःकवलितप्रजः॥आधिभौतिकमास्थायवपुर्मुनिमु
निमुपाययौ॥खड्गत्राधरःश्रीमान्कुंडलीकवचान्वितः॥कलुषद्रुमपोद्धारश्चकषद्रुसमन्वितः
मासद्वादशकाद्रूमेभुजद्वादशकोद्भटः॥स्वाहाकारसमयावैवह्निदूतःकिंकरसेनया॥स
मुपेत्यप्रणम्याथैमहाबाहुतरूपितंतंमहामुनिं॥कलपव्हिगाभीरस्वांतपूर्वमावाचह॥त्वमन
त्यततपाविप्रवयंनियतिपालकाः॥तेनसर्वपूज्यस्संपूज्यस्वाधानेतनयेच्छया॥मात्वपक्षपय
बुद्धेकल्पकालमहानलेः॥योनदग्धोस्विनेतस्यकिंत्वन्तापेनधक्ष्यसि॥संसारवत्वयोग्य
स्त्वाभिस्त्रीणीरुद्रकोटयः॥मुक्त्वानिविष्णुवृदानि।केनत्वात्वावयंमुनेभोक्तारोहिवयंवेत्सभोज
नंयुष्मदादयः॥स्वयंनियतिरेषाहिनावयोरेतदाहितमिति॥नचभक्त्यानुजिघृक्षयास्वीव
तामूर्तिरीदृक्सैवेतिकश्चिन्नियमोस्तिसर्वात्मकस्यपरमेश्वरस्यभक्तचित्तप्रियायाःसर्वस्या
अपिमूर्तेस्स्वकीयत्वात्॥अतएवभगवद्गीतायां॥योयोयांयांतनुंभक्तःश्रद्धयार्चितुमिच्छति॥
तस्यतस्याचलांश्रद्धांतामेवविदधाम्यहं॥सतयाश्रद्धयायुक्तस्तस्याराधनमीहते।लभते ॥श्रीवा॥
चततःकामान्मयैवविहितान्हितानिति।विष्णुरुद्रादिश्चेतनमूर्तिवदचेतनमूर्त्तयोपितत्त ॥१२॥

माध०
॥१३॥

पोनिजै स कालः कर्मारंभेष्वनुवर्तनीय इति सिद्धं ॥ अथ जन्मकालं निरूपयामः ॥ ननु कालस्य ज
नत्वे कथं प्रलये कालव्यवहारः प्रलयकालः प्रलयोतीतः प्रलये जातः प्रलयो भावीति च ॥ कालनि
त्यत्ववादिन स्तत्रापि समो दोषः नित्यस्य कालस्य तपनगतिपरिस्पंदाद्युपाधिभिः परिच्छेदस
त्वेतावान् कालइति कालेयत्तावर्णयितव्या ॥ न च प्रलये तदुपाधयः संति तत स्तत्र कथं प्रलय
कालेइयत्ता निर्णयः ॥ अथ सत्कार्यवादिनाभ्युपगमेनोपाधयोपि वासनारूपेण संति तर्हि का
लेप्येतत्समानं ॥ न चैतावतानित्यत्वप्राप्तिः उपाधिषु तदनंगीकारात् ॥ अथ मन्यसे इयत्ता र
हिते काले सृष्टिकाले इयत्तावासनावशादियताव्यवह्रियते ॥ तोपाध्यायत्वदिदृष्टांतः ॥ यथा
कश्चिन्माणवकः त्रिंशद्दीर्घकालवयस्कादध्येतुमुपक्रम्य संवत्सरमधीत्य अस्मदुपाध्याय एक
त्रिंशद्वर्षवयस्क इति अध्ययनरहितेप्यतीतवयस्युपाध्यायत्वं व्यवहरति तद्वदियताव्यवहा
रः एवं तद्धनेनन्यायेन कालरहितप्रलये कालव्यवहारः किं न स्यात् ॥ कालरहितं च प्रलया
दिकं वक्ष्यस्तीति मां द्रष्ट्यादिश्रूरयोभ्युपगच्छतीति यथा च श्रूयते ॥ यज्ञान्यत्रिकालातीतं ॥शिव॥
तदप्योंकार एवेति प्राभाकराश्च पूर्वस्य कालस्य कालत्रयासंस्पर्शीकां विदवस्थामाहुः ॥ तस्मा ॥१३॥

द्ः सुखे जन्यतां ॥ स च सामान्यविशेषाभ्यां द्विविधस्तस्योभयस्येश्वराख्यानि स काल
दुसर्ति मनुराह ॥ कालं कालविभक्तिं च नक्षत्राणि ग्रहांस्तथा ॥ सृष्टिं ससर्ज चैवेमां स्रष्टु
मिच्छन्निमाः प्रजा इति ॥ तत्र यः सामान्यकालः स विशेषेष्वनुगतत्वात्तदपेक्षया नित्यो ग्रहगत्यादि
भिरनुमेयो भूतोत्पत्तिनिमित्तकारणमिति ॥ तार्किकज्योतिषिकादयः प्रतिपेदिरे ॥ तत्र ज्यो
तिषिका आहुः ॥ प्रभवविरतिमध्यतानवंध्यानिलां तं विदितपरमतत्त्वा पश्यते योगिनोपि ॥ तम
हमिह निमित्तं विश्वजन्मात्ययानामनुमितमभिवंदे भग्रहैः कालमीशं ॥ युगवर्षमासदिवसाः
सम प्रवृत्तास्तु चैत्रशुक्लादेः ॥ कालोयमनाद्यंतो ग्रहभैरनुमीयते जन्यमिति ॥ कालविशेषेषु संव
त्सरः प्रधानभूतः अन्ये सर्वे गुणभूताः ॥ तथा चारुणकेतुके समाम्नायते नद्यः प्रभवा काचिदक्ष
य्या स्यंदते यथा ॥ तां नद्योभिसमायांति सोतः सन्निवर्तते ॥ एवं नानासमुत्थानाः कालाः संव
त्सरं श्रिताः ॥ अणुशश्च महशश्च सर्वे समवयंतितं ॥ सर्वैः स सर्वैः समाविष्टः उरुः सन्न निवर्तते इ
ति अयमर्थः ॥ भागीरथीगोदावर्यादिनदीयायं कालः कुतश्चिदविनाशिउत्पत्तिस्थानादुत्प
द्य प्रवहति तन्नोत्पत्तिस्थानं सांख्याः प्रकृतिर्वैशेषिकागमौ नमाया वा श्रुतिरस्य सुदर्शिनि

माध० ॥१४॥

त्यकालात्मकईश्वरो वा भविष्यतीति यथा ॥ तां गंगादिका महानदी अन्याः स्वल्पनद्यो भितः प्रविशंतिस्ता
च प्रविष्टैर्नद्यंतरैः सह विस्तीर्णप्रवाहा संलीनकदाचित्क्षुभ्यंति एवं नानाविधरूपे समुत्पन्नाः काल
भेदाः संवत्सराख्यं कालप्रधानं कालमाश्रिता स्तत्र निमेषाद्याः अयनपर्यंताः कालभेदाः संवत्सरा
दर्वाचः युगाद्याः परार्धपर्यंतास्तु संवत्सरमहांतः ते सर्वे संवत्सरं सम्यक् प्रविशंति अएवं नामवय
वत्वेन प्रवेशः भूयो महतां तु संवत्सरावृत्ति निष्पाद्यानामध्यक्षः संवत्सर इति तत्र प्रवेशो सिध्धीय
ते ॥ तथा च वेदांग ज्योतिर्ग्रंथे पठ्यते ॥ पंचसंवत्सरमयं युगाध्यक्षं प्रजापतिं ॥ दिनर्त्वयनसं
गप्रणम्य शिरसा स्थितइति ॥ स च संवत्सरः तेरणुभिर्महद्भिः सर्वैः समाविष्टो तिदीर्घः सतस्मिन्न
त्व जगतिनो छिद्यत इति ॥ न च वैलक्ष्मेष पर्यवसितं महात्वं तु परार्धेलिथा चलयोरन्यतरप्राधान्य
मुचितं तत्र कथं संवत्सरस्य प्रधान्यमिति चेत् ईश्वरेण प्रथमं सृष्टत्वादिति ब्रूमः ॥ तथा च वाज
सनेयिनः समामनंति सो कामयत द्वितीयो म आत्मा जायेतेति स मनसा वाचा मिथुनं समभवत् तद्य
द्रेत आसीत् संवत्सरो भवद्दिति तस्मात् संवत्सरः प्रधानं अतएव वयं संवत्सरमारभ्य कालविशेषान्नि ॥त्रिव॥
र्णयामः ॥ तत्र संवत्सरायनमृतुर्मासः पक्षस्तिथिर्नक्षत्रमित्येवं विधाः कर्मकालाः यद्यपि पुराणेषु ॥१४॥

फलविशेषार्थिभिरीश्वरत्वेनोपास्याः ॥ तदेतदृग्वेदे समाम्नायते ॥ एवं ह्येव ब्रहृचा महत्युक्थे मीमां
संत एतमग्नावध्वर्यव एतं महाव्रते छंदोगा एतमस्यामेतं दिव्येतं वायावेतमाकाश एतमप्स्वेतमोषधी
ष्वेतं वनस्पतिष्वेतं चंद्रमस्येतं नक्षत्रेष्वेतं सर्वेषु भूतेष्वेति ॥ वाजसनेयिनोपि मंडलब्राह्मणे तमेतम
ग्निरित्यध्वर्यव उपासत इत्यारभ्य पठंति विषमिति सर्पाः सर्प इति सर्पविद ऊर्गिति देवाः रयिरिति
मनुष्याः माया इत्यसुराः स्वधेति पितरो देवयजन इति देवयजनविदो रूपमिति गंधर्वा गंध इत्यप्स
रसः ॥ तं यथा यथोपासते तदेव भवतीति तैत्तिरीया अपि पठंति क्षेम इति वाचि योगक्षेमः प्राणापा
नयोरित्यादि परब्रह्मण्यारोपितं यथा वज्जगदस्ति तेन तेन सर्वेणाप्युपासना य परमेश्वरो
रूपवान् भवतीति हिरण्मयाधिकरणे मनोमयाधिकरणयोः प्रपंचितं ॥ एवं च सति प्रयदा
य कर्मारभते सतदा तत्कर्मोपयुक्तकालात्मकस्येश्वरस्य मूर्तिमिष्टदेवता रूपेणानुस्मरेत् ॥
अएतेवमत्र शास्त्रेषु नानाविधानि ध्यानान्युपदिष्टानि लोकेप्याविद्वदंगना गोपालं सर्वे जना एकै
कां देवतां स्वच्छया पूजयंति ॥ तदेतद्भगवानाह यजंते सात्त्विका देवान् यक्षरक्षांसि राजसाः ॥ प्रेतान्
भूतगणांश्चान्ये यजंते ॥ तामसा जना इति ॥ तस्मादारभ्यमाणकर्मफलदानि जेष्टदेवतास्व

त्स्कमार्कंडेयादीनां युगकल्पादिपरिमितं तपः स्मर्यते तथापि शतसंवत्सरायुष्यो मनुष्यास्तान
धिकृत्य धर्मशास्त्रप्रवृत्तेर्न युगादिनिर्णयोऽत्रोपयुक्तः मनुष्याधिकारत्वं चास्माभिः पाराशरस्मृ
तिव्याख्याने मनुष्याणां हितं धर्ममित्यस्मिन् वचने प्रपंचितं ॥ ये तु कलौ पंचविवर्जयेदित्यादयो मा
नुष्या धर्मास्तेष्वपि न युगादिकं निर्णेतव्यं संदेहाभावात् ॥ न च शतायुषामधिकारे कथं सहस्रसंव
त्सरसत्रश्रुतिरिति शंकनीयं ॥ तत्र संवत्सरशब्दो दिवसपर इति षष्ठाध्यायसप्तमपादे निर्णी
तत्वात् ॥ ये च संवत्सरावृत्तिसाध्या अनंतव्रतादयस्तेष्वपि न संवत्सरादधिकः कश्चित्कालो निर्णेत
व्योऽस्ति अतः संवत्सरमारभ्यार्वाच एव निर्णेतव्याः कर्मांगकालाः न च कालस्य कर्मांगत्वे विवदि
तव्यं सायं जुहोतीति वाक्येनांगत्वप्रतीतेः तत्र कर्मणस्तावदपूर्वविषयत्वात् प्राधान्यमभ्युपगंतव्यं
तथा च कालस्य गुणत्वेनान्वयः परिशिष्यते ॥ अत एव गर्गः ॥ तिथिनक्षत्रवारादि साधनं पुण्यपा
पयोः प्रधानगुणभावेन न स्वातंत्र्येण तेन सादिति ॥ तस्मादंगभूतेषु निर्णेयेषु कालेष्वायवत्वेन
संवत्सरस्याभ्यर्हितत्वादल्पवक्तव्यत्वात्सूचीकटाहन्यायानुसाराच्च स एवादौ निर्णीयत इ
ति स्थितं ॥ इति माधवीये कालनिर्णये उपोद्घातः ॥ एवं प्रथमं प्रकरणं ॥ अथ संवत्सरनिर्णयः ॥ ५

माध०
॥१५॥

संवत्सरो नामायनाद्यवयवयुक्तो ऽवयवी कालविशेषः स च सम्यग्वसन्त्यस्मिन्नयनर्तुमासादय
इति व्युत्पत्तेः स च द्वादशमासात्मकः द्वादश मासाः संवत्सर इति श्रुतेः ॥ मासानां तु चान्द्रसावन
सौराख्येन दिवसभेदेन चान्द्रादित्रैविध्यं वक्ष्यते ॥ मासत्रैविध्येन संवत्सरस्त्रिविधः ॥ तदुक्तं ब्रह्मसि
द्धान्ते ॥ चान्द्रसावनसौराणां मासानां तु प्रभेदतः ॥ चान्द्रसावनसौराश्च त्रयः संवत्सरा अपि ते ॥ त
त्र यश्चान्द्रः संवत्सरः स चैत्रशुक्लप्रतिपदादिः फाल्गुनदर्शान्तः सौरस्तु मेषादिमीनान्तः ॥ सावनः ष
ष्ट्युत्तरशतत्रयाहोरात्रात्मकः ॥ ते च त्रयः संवत्सराः केषुचित्कर्तव्येषु व्यवतिष्ठन्ते केषुचित्तु विकल्प्यं
ते तथा यथा भविष्योत्तराले ॥ संवत्सरसाध्यं तिलकव्रतं पठ्यते ॥ वसंते किंशुकाशोकशोभिते
प्रतिपत्तिथिः ॥ शुक्लास्यां प्रकुर्वीत तस्यां नियममास्थितः ॥ ललाटपट्टे तिलकं कुर्याच्चन्दनपं
कजं ॥ ततः प्रभृत्यनुदिनं तिलकालंकृतं सुखी धार्यं संवत्सरं यावच्छशिनेव नभस्तलमिति ॥ तत्र
संवत्सरश्चान्द्रो ग्रहीतव्यः शुक्लपक्षप्रतिपत्तिथ्योः सल्लिंगत्वात् ॥ नहि शुक्लकृष्णपक्षौ प्रतिपदा ॥शिव॥
दितिथयश्च सौरसावनमासोपजीवनेन प्रवृत्ताः यत्तु नववर्षाणि पञ्च येषां दोषसंवत्सरस्यानं ॥१५॥
तव्रताद्यंगत्वं स्मर्यते ॥ तत्रापि चान्द्र एव संवत्सरः शुक्लपक्षे चतुर्दश्यामित्यादिलिंगात् न च चैत्र

माध॰ ॥२६॥

जायते ॥ म्लेच्छदेशेषु पुरुषस्तन्ममाचक्ष्व वै मुने ॥ मार्कंडेय उवाच ॥ मेषसंक्रमणे भानोः सोम - षासे
रोत्तमः ॥ पूजयेद्धर्मं वदेवं राम तत्र्याख्याया यथाविधि ॥ इत्यारभ्य मीनसंक्रमणे मत्स्यं वासुदेवं च पूजये
दित्यंतेन ग्रंथेन व्रतं विधायांते तदुपसंहृतं कृत्वा व्रतं वत्सरमेतद्दिष्टं म्लेच्छेषु तिर्यक्षु न चापि जन्मे ॥
ति ॥ तथा स्कंदपुराणे धान्यव्रतं पठ्यते ॥ अथातः संप्रवक्ष्यामि धान्यव्रतमनुत्तमं ॥ अयने विषुवे
चैव स्नानं कृत्वा विचक्षण इत्यारभ्य व्रतं विधायैवमुपसंहृतं ॥ एवं संवत्सरे पूर्णे कुर्यादुद्यापनक्रि
यामिति ॥ सावनस्य सत्रादावुपयोगः ॥ तदप्युक्तं विष्णुधर्मोत्तरे ॥ सत्राण्युपासीत यथा सावनेन लोकं
चयस्य ॥ व्यवहारकर्मेति ॥ गोसत्रवैसनत्सरोयय एवं विद्वांसः संवत्सरमुपयंतीत्युभ वं स्येवेति श्रुतौ
गवामयनस्य सत्रस्य संवत्सरनाम्ना व्यवहारात् संवत्सरकालस्तदंगमिति गम्यते ॥ तत्र सावनो गृहीत
व्यः चांद्रसौरयोर्मानयोस्तदनुष्ठानासंभवात् तथाहि ॥ अहोरात्रसाध्य एकः सोमयागो वेदेष्वहः इत्य
भिधीयते तादृशानां अहर्विशेषाणां गणः षडहः स च द्विविधः अभिप्लवः पृष्ठ्यश्चेति तत्र त
थाचत्वारोभिप्लवाः षडहाः एकः पृष्ठ्यः षडह इति षडह इति षडहः पंचकेनैको मासः संपत्स्यते तादृशै ॥त्रिव॥
र्द्वादशभिर्मासैः साध्यः संवत्सरसत्रं तथा च सावनेन न वतिष्ठि चांद्रस्य षड्भिरहोरात्रैर्न्यूनत्वात् सौर ॥१६॥

स्य सपादैः पंचभिरहोरात्रैरधिकत्वात् ननु संवत्सरं यदीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्निति
माघमाससंगतायाममावास्यायां चांद्रतिथौ सत्रायदीक्षा श्रूयते ततश्चांद्रेणैव संवत्सरेण भवितव्यं ॥ मै
वं उक्तदीक्षाकालस्य पूर्वपक्षरूपत्वात् तन्निराकरणं श्रूयते आर्त्तं वा एते संवत्सरस्याभिदीक्षंते ॥
य एकाष्टकायां दीक्षंत इति ननु पक्षांतरमपि चांद्रतिथिमेवोपजीव्य श्रूयते फाल्गुनीपौर्णमास्यां दी
क्षेरन् मुखं वा एतत्संवत्सरस्य फाल्गुनीपौर्णमासी इति ॥ नात्तस्यापि निराकृतत्वात् तस्यैकैव निर्यै
ति हि निराकृतं एकैव निर्या ऐकरवद्दोष इत्यर्थः ॥ ननु पैर्वैसिध्यां तेष्वेवं श्रूयते ॥ चित्रापौर्णमा
स्यां दीक्षेरन् मुखं वा एतत्संवत्सरस्य चित्रापौर्णमासो मुख एतस्य एव संवत्सरमारभ्य दी
क्षंते तस्य काचन निर्या भवति चतुरहे पुरस्तात् पौर्णमास्यै दीक्षेरन् तेषामेकामः संपद्यते इति बाढं
अस्त्येवमंगभूते दीक्षोपक्रमे चांद्रतिथ्युपजीवनं तथापि प्रधानकर्मणि सावनग्रहणे को बाधः ॥
न त्वस्त्येव बाधः ॥ तेषां पूर्वपक्षे स्तुश्रुत्या स्वप्रधानकर्मणि चांद्रस्य शुक्लपक्षस्योपजीवनात् उप
जीव्यतां नाम शुक्लपक्षस्तथापि यथोक्तप्रकारेण कृत्स्नस्य प्रधानकर्मणः सावनमंतरेणानिर्वा
हात् तक्ष एवात्र गृह्यते ॥ अयमेव न्याय उत्सर्गिणीमयने कुंडपायिनामयने तु तत्रास्त्येव पारा चांद्रि

माध०
॥१७॥

यणादौचयोजनीयः॥तेषांगौणत्वंविकृतित्वात्यत्रतुचांद्रादिनियामकंनास्तितत्रवैच्छिकोविकल्पः॥
तथाहिपिप्पलादशाखायांआथर्वणिकभारद्वाजादिकानांमुनीनांविद्याधिकारसिद्धयेगुरू
णापिप्पलादेनादिष्टसंवत्सरवासमामनंति॥भूयएवतपसाब्रह्मचर्येणश्रद्धयावासंवत्सरंस्य
थयथाकामंप्रश्नान्पृच्छतेतिबह्वृचास्त्वेतमेवार्थंव्यतिरेकमुखेनामनंतिनाएताःसंहिता
नानंतेवासिनेप्रब्रूयात्नासंवत्सरवासिनइति॥तैत्तिरीयाश्चारुणकेतुकमग्निंचेष्यमाणस्या
दौत्रिषवणस्नानादिरूपंव्रतमामनंतिसंवत्सरमेतद्व्रतंचरेदिति एवंविधेषुप्रदेशेषु
नियमकाभावाच्चांद्रादिनामद्वानांमन्यतमइच्छयागृहीतव्यः ननुसंवत्सरस्यचांद्रसौर
सावनभेदेनत्रैविध्यमेवांगीकृत्यतत्रस्वरूपविनियोगावुक्तौत्रैविध्यानियमोनयुक्तः अन्ययोर
पिनाक्षत्रबार्हस्पत्ययोःप्रसिद्धयोःसंवत्सरयोर्विद्यमानत्वात्॥तथाचायुर्वेदविदःपठंति॥
सौरबृहस्पतिसावनचांद्राधरनाक्षत्रिकाःक्रमेणस्युः॥मातुलपातालतुलविमलवरांगा
श्चवत्सराःपंचेति॥अस्यायमर्थः॥गणकप्रसिद्धयाक्षरसंख्ययामातुलशब्दःपंचषष्ट्यधि ॥शिव॥
कशतत्रयमात्रत्वेनतावद्दिवसपरिमितःसौरःसंवत्सरः॥पातालशब्दएकषष्ट्यधिकशतत्र ॥१७॥

प्रतिपदुपक्रमाभावाद्वचांद्रत्वंशंकनीयं॥तदुपक्रमस्यसंवत्सरस्यसृष्ट्यपेक्षत्वात्॥अतएवब्रह्म
पुराणेभिहितंचैत्रेमासिजगद्ब्रह्माससर्जप्रथमेहनि॥शुक्लपक्षेसमग्रंतुतदासूर्योदयेसति॥प्रवर्त
यामासतदाकालस्यगणनामपि॥ग्रहान्नागानृतून्मासान्वत्सरान्वत्सराधिपानिति॥चां
द्रसौरसावननक्षत्रेषुप्रवृत्तिनिमित्तान्युच्यंते॥चंद्रकलावृद्धिक्षयप्रयुक्तप्रतिपदादितिथीनांषष्ट्य
धिकचतुःपंचाशदधिकशतत्रयेणनिष्पन्नोयःसचांद्रः॥द्वादशराशिषुसूर्यसंक्रांतिनिष्पन्नोयःस
सौरः॥सावनशब्दोहोरात्रोपलक्षकःसोमयागेसवनत्रयस्याहोरात्रसंपाद्यत्वात्तैश्चसावनैःष
ष्ट्यधिकशतत्रयसंख्याकैःनिष्पन्नोयःससावनः॥एवंचसतिवर्तमानभाद्रपदशुक्लचतुर्दशीमार
भ्यागामिभाद्रपदशुक्लचतुर्दश्याःप्राचीनैस्तिथिसमुदायेचांद्रसंवत्सरत्वमविरुद्धं॥यच्चनिरूढप
शुबंधकप्रकरणेश्रूयते॥तेनसंवत्सरेसंवत्सरेयजेतेतिपशुनासंवत्सरोतीयादितिच॥तत्रापि
चांद्रएवद्रष्टव्यः॥सर्वान्वैकालान्पशुबंधयाज्याभिजयतितेनयक्ष्यमाणोऽमावास्यायांपौर्ण
मास्यांवेतिकल्पसूत्रकारैश्चांद्रतिथौतदनुष्ठानविधानात्सौरस्तुसंवत्सरःसुतजन्मादौवृद्धि
स्मर्यते॥भगवत्कर्मणिनाक्षत्रोयोग्योनोन
व्रताद्यनादावुपयुज्यते॥तच्चव्रतंविष्णुधर्मोत्तरे

यमाहतावद्दिवसपरिमितः काले बृहस्पतेः संवत्सरः अतुलब्धाब्दः षष्ट्यधिकशतत्रयमाहतावद्दि
वसपरिमितः काले बृहस्पतेः सावनः संवत्सरः विमलशाब्दश्चतुःपंचाशदधिकशतत्रयमाचष्टे
तावद्दिवसपरिमितश्चांद्रः संवत्सरः वरंगनाब्दश्चतुर्विंशत्यधिकशतत्रयमाहतावद्दिवसपरि
मितो नाक्षत्रसंवत्सर इति। एवं तद्युक्तः संवत्सरः पंचविधः तत्र नाक्षत्रिकस्य ज्योतिःशास्त्रप्रसिद्धे॥
आयुर्दायादावुपयोगो द्रष्टव्यः बार्हस्पत्यस्तु सिंहसंगत्यबृहस्पत्यादिविशेषमुपजीव्य गोदा
वर्यादिस्नानादावुपयुक्तः अनेन बार्हस्पत्यमानेन कदाचिदधिसंवत्सरो निष्पद्यते॥ तदुक्तमु
त्तरसौरे गुरोर्मध्यमसंक्रांतिहीनो यश्चांद्रवत्सरः॥ अधिसंवत्सरस्तस्मिन्प्रकारयेनत्सवत्रयं। वर्ज
नीयाप्रयत्नेन प्रतिष्ठासर्वलौकिको॥ स्फुटः संक्रांतिहीनश्च केप्याहुः रविमासवद्दिति। मध्यमग
त्यानयनगुरोः संक्रांतिर्यस्मिन्चांद्रसंवत्सरे न विद्यते सोयमधिसंवत्सरं। तत्र बृहस्पतिसवा
दिकं न कार्यं स्फुटगणनया बृहस्पतिः संक्रांतिरहितो यश्चांद्रवत्सरः तस्मिन्नधिकमासवत्काम्या
दिकवर्ज्यमिति केचिन्महर्षयो मन्यते॥ ॥अथ चांद्रसावनवत्सरयोरेले भेदाउच्यंते। संव
– – त्सरः परिवत्सरः इडावत्सरोसि स्युवरोसि इद्वत्सर इत्येते पंचभेदाः तदेतत्सामान्याकारेण संव

माध०
॥१८॥

त्सरादिपंचविधत्वं सावित्रच्चयनगतान्निप्रकाशकमंत्रे पठ्यते ॥ संवत्सरोसि परिवत्सरोसि इदावनु
वत्सरोसि इद्वत्सरोसि इतिइद्वत्सरोनुवत्सर इत्यर्थः ॥ अत एव चातुर्मास्यब्राह्मणे तदधिष्ठातृदेवतारू
पेणैवं श्रूयते ॥ अग्निर्वाव संवत्सरः चंद्रमा इदावत्सरः वायुरनुवत्सर इति ब्रह्मकैवर्तेपि ॥ संवत्सरः
प्रथमो द्वितीयः परिवत्सरः ॥ इदावत्सरस्तृतीयश्चतुर्थश्चानुवत्सरः ॥ इद्वत्सरः पंचमस्तत्संयो युग
संज्ञक इति एतेषां पंचानां नियोगः ॥ विष्णुधर्मोत्तरेभ्युक्तं ॥ संवत्सरे तु दानं तृणानां तिलदानं महा
फलं ॥ परिपूर्ते तथा दानं यवानां द्विजसत्तमाः ॥ इदापूर्वे च वस्त्राणां धान्यानां चानुपूर्वके ॥ इद्वत्सरे च ज
लस्यापि दानं पूर्णं महाफलमिति ॥ तथा तत्रैव तदधिष्ठातृदेवताः पूजारूपो विशेषः पठ्यते ॥ संवत्स
रः स्मृतो वह्निरादित्यः परिवत्सरः ॥ इदापूर्वस्तथा सोमो ह्यनुपूर्वः प्रजापतिः ॥ इद्वत्सरश्च तथा प्रोक्तो
देवदेवो महेश्वरः ॥ तेषां मंडलविन्यासः प्राग्वदेव विधीयते प्राग्वत्तस्यां तु पूजनं कार्यं होमश्च का
र्यो यथाविधीति ॥ प्रभवमारभ्य क्षयांतेषु षष्टिवर्षेषु द्वादश पंचकाः ॥ तत्रैकस्मिन् वर्षप
चके एकैकक्रमेण संवत्सरादयो भवंतीति देतत्सर्वं ज्योतिःशास्त्रादवगंतव्यं ॥ इति सं ॥शिव॥
वत्सरनिर्णयः ॥ ॥ अथायनं ॥ ॥ अयते यात्यनेन ऋतुत्रयेणार्को दक्षिणामासामुत्तरां ॥ ॥१८॥

माध०
॥१९॥

नइति॥ एवं विष्णुधर्मोत्तराभिहितं भानुपदद्वयं वृत्तादीन्ययनकर्तव्यान्युदाहार्याणि॥ इत्ययननि
र्णयः॥ ॥अथ ऋतवो निरूप्यते॥ ॥ऋतुराद्यो ऋतगतानि यस्माद्दतोऽधिष्यन्त्रः॥ रुपर्तिगच्छति
आनेन कपुष्पाधिकासाधारणलिंगमिति वसंतादिकालविशेषः ऋतुः॥ सच षड्विधः॥ षड्वा ऋत
वइति श्रुतेः॥ पंचतु द्वादशमासाः पंचर्तवइति श्रुतं॥ तत्र हेमंतशिशिरयोरेकीकरणं निवक्षितं॥ यज
मानेषु पंचप्रयाजानुमंत्रणमंत्रेषु हेमंतशिशिरयोरेकस्मिन्मंत्रे एकीकरणमुक्तं॥ तथाहि॥ वसंतं
ऋतूनां प्रीणामि ग्रीष्ममृतूनां प्रीणामि वर्षा ऋतूनां प्रीणामि शरदमृतूनां प्रीणामीति चतुर्णां प्रया
जानां पृथक्पृथक् अनुमंत्रणमंत्रानाम्नाय पंचमप्रयाजानुमंत्रणमंत्र एवं श्रूयते॥ हेमंतशिशि
रावृतूनां प्रीणामीति एतदेवाभिप्रेत्य बह्वृचब्राह्मणे पठ्यते॥ द्वादशमासाः पंचर्तवो हेमंतशि
शिरयोः समासेनेति॥ यत्तु अनयोर्मंत्रब्राह्मणयोः द्विवचनं तत्स्वरूपं द्विविधाभिप्राये शिशिरस्य
षष्ठस्यांतिमत्वात्॥ तेनानुमंत्रणीयस्य षष्ठप्रयाजस्याभावाच्च तस्यैव पंचमे हेमंतेंतर्भावो न्यायः॥ मे
अतएव प्रयाजब्राह्मणे वसंतमेव ऋतूनामवरुंधे इत्यादिना चतुरः प्रयाजान् प्रशस्य पंचमे
प्रयाजे केवलेन हेमंतेन प्रसंशासस्वाहाकारं यजति हेमंतमेवावरुंध इति॥ अस्तु नाम यथा तत्पंच ॥शिव॥
संख्या सर्वथा स्वरूपेणाषोढाभिधीयते॥ द्वादशमासात्मके संवत्सरे एकैकस्यार्त्तोर्मासद्वयात्मक ॥१९॥

त्वसति एकादशद्वादशमासयोर्वर्जयितुमशक्यत्वात्॥ षष्ठर्तौ पृथगनुष्ठानविधानात्॥ त
च्चोपरिष्टादुदाहरिष्यामः॥ मासद्वयात्मकत्वं चाग्निचयने ऋतव्येष्टकोपधाने ऋतवेष्टकोप
ब्राह्मणे श्रूयते द्वंद्वमुपदधाति तस्माद्द्वंद्वमृतवइति॥ कस्मिन् ऋतावेकयोर्मासयोर्द्वंद्वं गृहीतव्यमि
ति चेत्॥ वसंतादावनुक्रमेण चैत्रमासादिद्वंद्वमिति ब्रूमः तदेष्टकोपधानमंत्रेषु श्रूयते द्वि
मासांगत्वं॥ तथाच श्रुतिः॥ मधुश्च माधवश्च वासंतिकावृतू शुक्रश्च शुचिश्च ग्रैष्मा
वृतू नभश्च नभस्यश्च वार्षिकावृतू इषश्चोर्जश्च शारदावृतू सहश्च सहस्यश्च हैमंतिका
वृतू तपश्च तपस्यश्च शैशिरावृतू इति॥ एषु वाक्येषु ऋतवइति द्विवचनं ऋतुत्वयपव
मासाभिप्रायं अन्यथा षट्त्वा ऋतवइति श्रूयमाणा षट्संख्या बाध्येत अवयविन ऋतोर्वसंतादेकैकाम
त्वे सौत्रामणिस्तोत्रमंत्रेषु एकवचनेनैव व्यवहारादवगंतव्यं वसंतेन ऋतुना देवा ग्रीष्मेण देवा ऋ
तुनाइत्यादि तत्र पठ्यते॥ तथैवाधानब्राह्मणेपि श्रूयते वसंतो वै ब्राह्मणस्यर्तुः ग्रीष्मो वै राजन्यस्यर्तुः
शरद्वैश्यस्यर्तुः॥ यद्यप्येते षड्ऋतवो घटीयंत्रघटवन्नैरंतर्येण वर्तंते तथापि संवत्सरोपक्रमारूपत्
त्वेन वसंतस्य प्राथम्यं द्रष्टव्यं॥ एतदेवाभिप्रेत्य श्रूयते मुखं वा एतदृतूनां यद्वसंत इति॥ पूर्वोदाहृ

माध०
॥२०॥

तेषु मंत्रब्राह्मणेषु सर्वत्र वसंतोपक्रमात् पाठाच्च वसंतस्य प्राथम्यं ॥ ते च वसंतादय ऋतवः द्विविधाः चां
द्राः सौराश्च चैत्रादयश्चांद्राः मधुश्च माधवश्चेत्यादिना पूर्वं दर्शिताः । तच्च तस्मिन्न चैत्रादयो नोक्ता इति
शंकनीयं ॥ मध्वादिशब्दानां चैत्रादिपर्यायित्वात् । अत एवाहुः । चैत्रमासो मधुः प्रोक्तो वैशाखो माध
वो भवेत् । ज्येष्ठमासस्तु शुक्रः स्यादाषाढः शुचिरुच्यते ॥ नभोमासः श्रावणः स्यान्नभस्यो भाद्र उच्य
ते । इषश्चाश्वियुजो मासः कार्त्तिकश्चोर्जसंज्ञकः ॥ सहोमासो मार्गशिरः सहस्यः पुष्यसंज्ञकः ॥ मा
घमासस्तपः प्रोक्तः तपस्यः फाल्गुनः स्मृत इति । एतेषां चैत्राद्यात्मकानां वसंतादीनां चंद्रगतिपरि
कल्पितत्वाच्चांद्रत्वं ॥ अत एव होतुर्मंत्रे मासाम्नायते चंद्रमाः सद्यो तास ऋतून् कल्पयतीति ॥ तथा
च विशेषः सूर्याचंद्रमसौ प्रकृत्याम्नायते । पूर्वापरं चरतो माययैतौ शिशू क्रीडंतौ परियातो अ
ध्वरं ॥ विश्वान्यन्यो भुवनाभिचष्ट ऋतूनन्यो विदधज्जायते पुनरिति । अत्र पुनर्जायत इति लिंग
दृतुत्वे संविधाताचे । इदं सवगम्यते ॥ ननु चैवं मध्वादीनां द्वादशानां चांद्रमासानां वसंतादृतु
त्वं संसर्पाख्यस्य तु त्रयोदशस्य चांद्रमासस्य कथमृतुषु भिन्नबर्हिस्तन्माससङ्घवश्च चतुर्या हा ॥द्वि॥
ब्राह्मणे मंत्रानुवादपुरःसरमाम्नायते । उपयामगृहीतोसि संसर्पोस्यंहस्पत्याय त्वेति सा हा
॥२०॥

विसृतुत्रयं अयनं ॥ तथा च वाजसनेयिनः पंचाग्निविद्यायां दक्षिणोत्तरमार्गयोः समामनंति ॥ यान् ष
ण्मासान् दक्षिणादित्य प्रतियात् षण्मासानुदगादित्य प्रतियादिति । तथा छंदोगा अप्यधीयते । या
न् षड्दक्षिणैति मासांस्तान् याषडुदङेति मासांस्तानिति । तैत्तिरीया अपि ऋतुग्रहब्राह्मणे पठंति । त
स्मादादित्यः षण्मासान् दक्षिणेनैति षडुत्तरेणेति ॥ एवं चादित्यगतिमुपजीव्यायननिष्पत्तेः सौरमेवे
तत् ॥ अत एव विष्णुधर्मोत्तरे ॥ सौरस्यास्य मधिकृत्योक्तं ऋतुत्रयं चायनमिति केचित्तु चांद्रमासेने
नायनद्वयमभ्युपगच्छंति । मार्गमासादिकैस्त्रिभिरृतुभिः कल्पितः कालः षण्मासात्मकमुत्तराय
णं ज्येष्ठमासादिकं दक्षिणायनमिति ॥ तत्र प्रमाणं ज्योतिःशास्त्रादौ मृग्यं श्रौतस्मार्तकर्मानुष्ठाने तु
मकरकर्कटकसंक्रांत्यादिके एवायनद्वयकाल इति यथोक्त श्रुतिस्मृतिभ्यामवगंतव्यं उत्तरायणस्य
मंथाक्य कर्मांगत्वं कृपवा अधीयते उदगयन आपूर्यमाणपक्षस्य पुण्याहे द्वादशाहमुपमद्गृतीभ
वात्यादि । चौलादीनं उत्तरायणाकर्तव्यता गृह्येषु स्मृतिषु च प्रसिद्धा ॥ सत्यव्रतश्च देवप्रतिष्ठायां
उत्तरायणदक्षिणायनयोर्विधिनिषेधावाह ॥ देवतारामवाप्यादिप्रतिष्ठोदङ्मुखे रवौ दक्षिणाभि
मुखे कुर्वन्न ततः फलमाप्नुयादिति ॥ उग्रदेवतानां दक्षिणायने कर्तव्यां तथा च वैखानससंहि
तायामभिहितं मातृभैरववाराहनारसिंहत्रिविक्रमः महिषासुरहंत्री च स्थाप्या वै दक्षिणाय

मित्रयोदशोमासइत्याहुः ॥ तमेवतत्प्रीणातीति ॥ तथाप्रवर्ग्यब्राह्मणेपि अस्तित्रयोदशोमासइत्या
हुः यः त्रयोदशोपरिधिर्भवति तेनैवत्रयोदशंमासमवरुंधइतितदुक्तं एतत्प्रकारश्चास्माभिर्मल
मासनिर्णयेवक्ष्यते ॥ विद्यतानामत्रयोदशोमासः तस्यकानुपपत्तिः वसंतादृतुस्थितिश्चेत् ॥ उच्य
ते ॥ किमत्रसप्तऋतवः आहोस्वित्तस्योत्कर्षेवषट्कृतभावः उतनुद्वयंतरालवर्त्तीकश्चिदन्यऋतुरुप
न्नतावसप्तमः मासनिर्णयत्रऋतूनांनुघमानइत्यनुमानेरंतर्येणश्रवणात् ॥ नाप्यंतिमः षड्
ऋतवइतिषट्संख्यानिपयमात् वसंतादिवत् मंत्रब्राह्मणयोर्नामांतराश्रवणाच्च ॥ नापिम
ध्यमः मध्यादिषुपाठात् ॥ उच्यते ॥ ययोर्मासयोर्मध्येमलमासोदृश्यतेतयोरेतस्मिस्यांतर्भा
वः तथाचासौ षष्ठिदिवसात्मकोमासिनशुध्यभागद्वयात्मकृइतिमध्यादित्वाद्ववाच्यत्वेनो
त्कृष्टतभोवानकाप्यनुपपत्तिः सौरेष्वृतुषुबोधायनेनमीनमेषयोर्मेषवृषभयोर्वसंतद्
समभिधानान्नामीनादित्वंचयैकल्पिकंवसंतस्यांगीकृतंतथाचतदनुसारेणचोत्तरे
ग्रीष्मादयोपियथायथंविकल्पंतेविनियोगश्चैषांतुविद्वेषाणांश्रुतिस्मृतिपुराणेषु

वगम्यते तत्र श्रुतिः वसंते ब्राह्मणोग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति। स्मृतिरपि वसंते ब्राह्मणमु
पनयीत ग्रीष्मे राजन्यं शरदि वैश्यमिति॥ विष्णुधर्मोत्तरेपि पूर्त्ति व्रते वसंते तु ऋतुषु षट्सु
पृथक् पृथक् पूजा विशेषाः पठिताः॥ तथा तत्रैव वसंते तैलान्नाकुंकुमदीपनादि दानं ग्रीष्मे पानीयादि
दानं चोक्तं॥ देवीपुराणे॥ वर्षासु तिलदानं मुक्तं शरद्यन्नदानं हेमंते वस्त्र अग्निदानं शिशिरे वस्त्र
दानमित्येतानि॥ विष्णुधर्मोत्तर एवोक्तानि एवमन्यदप्युदाहार्यं॥ ॥इति ऋतुनिर्णयः॥ ॥अथ
मासाः॥ तत्र सकारांतमासिति प्रातिपदिकं चंद्रभावितस्याय कालम् इति मासः॥ तदीयत्वं पञ्चदशानां क
लानां क्षयक्षयद्वारेणावगंतव्यं॥ यदिदं मासत्वं सौरसावनयोरनुगतं वक्तव्यं तर्हि वमस्तु॥ मास
परिमाणादित्यस्मात् धातोरयं निष्पन्नो मासशब्दः मास्यते परिमीयते यावता कालेन चंद्रवृद्धिक्षयौ
स चांद्रो मासः यद्वा चंद्रवृद्धिक्षयाभ्यां स्वयमस्यत इति मासः तथा च सिद्धांतशिरोमणौ पठ्यते॥
मास्यंते परिमीयंते स्वकलावृद्धिहानितः॥ मासास्ते स्मृता मासाः त्रिंशत्तिथिसमन्विता इति॥
सूर्यस्य राशिगतिर्यत्र परिमीयते स सौरः॥ अहोरात्राणां त्रिंशतां संख्या परिमीयते यत्र स साव ॥शिव॥
नः॥ तदुक्तं ब्रह्मसिद्धांते॥ चांद्रः शुक्लादिदर्शांतः सावनस्त्रिंशता दिनैः॥ एकराशौ रविर्यावत्का ॥२१॥

मितित्तत्र पौर्णिमास्यंतत्वे श्रुतेः कटाक्षो भूयान् अयो वै पूर्ण आसिंचतीत्यादिना यन्नेन पतत्प्रत्यव
रोहंतित्यंतेनार्थवादप्रपंचेन सदृष्टांतान्वयव्यतिरेकयुक्तेन प्रपंचितत्वात्॥ ननु नोदाहृते वाक्ये
मासांतस्य नियामकं अतिप्रसंगात्॥ तथाहि॥ यतस्यैवानु वाक्यस्याद्ये पक्षांतरमुपन्यस्तं ष
डहैर्मासान्संपाद्याहरुत्सृजंति षडहैर्मासान्संपश्यंतीति तत्र पूर्वन्यायेन षष्ठमहर्मासांतं इति॥ प्र
सज्येत अथ मन्यसे षडहैरिति बहुवचननिर्देशात् पंचभिः षडहैरिति व्याख्यायां न कोपि विरो
ध इति॥ एवमप्यन्यत्रापि प्रसंगो दुर्वारः तथा च वाक्यांतरं श्रूयते अर्धमासैर्मासान्संपाद्याहरु
त्सृजंत्यर्धमासैर्हि मासान्संपश्यंतीति॥ अत्र एकैकार्धमासस्वीकारपक्षस्य मासत्वप्रसंगः बह्व
र्धमासस्वीकारपक्षे त्रयादेर्मासित्वप्रसंगः॥ किंच पूर्वोक्तोप्यतिप्रसंगो दुःपरिहरः॥ एवं षडहैरित्य
त्र षडुपंचकस्वीकारासंभवात् एकैकस्य षडहस्वीकर्तव्यत्वात्॥ उत्तरानुवाके षडहैर्मासान्संपाद्य
यत्सप्तममहस्तस्मिन्नुत्सृजेयुरिति सप्तमत्वाविशेषणात् तस्मादतिप्रसंगद्वयग्रस्तत्वान्न पूर्णो
मासांतः॥ अत्रोच्यते॥ श्रुतिस्मृतिलोकप्रसिद्धिभ्यो मासशब्दस्त्रिंशद्दिनसमूहरूढः॥ श्रु ॥शिवः॥
तयः संवत्सरायनर्तुविषयाः पूर्वमुदाहृताः तत्र संवत्सरस्य द्वादशो भागो मासः अयनस्य षष्ठो ॥२२॥

भागः॥ ऋतुषु द्वयोर्भागयोरन्यतरः स्मृतयस्तु मानेमासस्य नाक्षत्रैः सप्तविंशतिभिर्दिनैः॥ परि
शेषेषु मासेषु मासस्त्रिंशद्दिनैः स्मृतः॥ चांद्रः शुक्लादिदर्शांत इत्यादयोपि लोकेप्याविद्वदंगनागो
पालं मासस्य त्रिंशद्दिनात्मकत्वं प्रसिद्धम् एवं च पक्षस्यार्धमासैः मासानित्यत्र मासशब्दः मासै
कदेशं लक्षयति॥ षडहैरित्यत्र षडहपंचकविवक्षायां न काचिदनुपपत्तिः॥ एकैकषडहविव
क्षायां पूर्ववदेकदेशलक्षणा अस्तीति॥ प्रसंगाभावादुक्तवाक्याभ्यां मासस्यामावास्यांतत्वं प
पौर्णमास्यंतत्वं च विकल्प्यते॥ तत्र प्रथमपक्षे चांद्रः शुक्लादिदर्शांत इत्यादिस्मृतय उदाहार्याः॥ शि
ष्टाचारो बाहुल्येन तत्र प्रसिद्धः द्वितीयपक्षस्योपोद्बलकं लिंगं श्रुतिलिंगं स्मृतिलिंगं च
अथर्वणिकाः सृष्टिप्रकरणे संवत्सरदक्षिणोत्तरायणास्त्रिमासार्धमासपक्षसृष्टिमेवगम
यंति मामनंति मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव रयिः शुक्लः प्राण इति॥ तत्र कृष्णपक्षस्य प्राथ
म्येन पाठे लिंगं स्मृतौ च महालयप्रकरणे पठ्यते॥ आश्विनकृष्णपक्षे तु श्राद्धं कार्यं दिने दिने
इति॥ तत्र यदि दर्शांतो मासो विवक्षितस्तदा भाद्रपदकृष्णपक्ष इत्युच्यते तेन त्वेवमुक्तं॥ आ
श्वयुज्यांतर्गतत्वं क्षिहोच्यते तच्च कृष्णपक्षप्रतिपदादिपूर्णिमांतत्वे संभवति॥ तथा जयति

माध०
॥२३॥

प्रकरणे स्मर्यते ॥ मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्धरात्रके ॥ भवेत्प्रोष्ठपदे मासि जयंती नाम सा स्मृतेति ॥ अपि च ॥
अत्रापि जयंत्या भाद्रपदोत्तरगतत्वं मासस्य पौर्णिमांततां गमयति शिष्टाचारविशेषादपि पौर्णिमांतत्वं द्रष्टव्यं
यतिधर्मप्रकरणे स्मर्यते ॥ ऋतुसंधिषु वापयेदिति ॥ तत्र यदि दर्शांतत्वं तदा स्यात्तदा दर्शस्यैव संधित्वात्
तत्रैव वपनं कुर्युः कुर्वंति तु पूर्णिमायां तस्माद्दर्शांतत्वपौर्णिमांतत्वयोः समो विकल्पः ॥ अनुष्ठाने तु तत्र तत्र
वचनविशेषात् शिष्टाचाराद्वा व्यवस्था द्रष्टव्या वचनविशेषस्तु वक्ष्यते । सिद्धांते पठ्यते ॥ अमावास्यापरिछिन्नो
मासः स्याद्बार्हस्पत्यस्तु ॥ संक्रांतिपौर्णमासीभ्यां तथैव नृपवैश्ययोरिति ॥ दर्शांतानां पौर्णिमांतानां वा
मासविशेषाणां चैत्रादिसंज्ञा नक्षत्रप्रयुक्ता यस्मिन्मासे पौर्णिमा चित्रानक्षत्रेण युज्यते स चैत्रः ॥ एवं
वैशाखादिषु द्रष्टव्यं ॥ चित्राविशाखादियोगस्योपलक्षणत्वात् कुंभि चित्रादिप्रत्यासन्नत्वात्पनुयोराध
॥२ दियोगेऽपि चैत्रवैशाखादिसंज्ञा न विरुध्यते ॥ चैत्रादिश्रावणांतानां मासानां पंचानां चित्रादि
नक्षत्रद्वंद्वं प्रयोजकं ॥ भाद्रपदाश्वियुजोस्तु शतभिषग्रेवत्यादिकं त्रिकं कार्त्तिकादिमाघांतानां कृत्ति
कादिद्वंद्वं फाल्गुनस्य तु पूर्वफाल्गुन्यादि त्रयमिति विवेकः ॥ तथा च संकर्षणकांडे द्वे द्वे चित्रादि तारा
णां परिपूर्णेंदुसंगमे ॥ मासाश्चैत्रादयो ज्ञेयास्त्रिके षष्ठांत्यसप्तमा इति ॥ अन्यत्रापि ॥ अंतोपां ॥त्रिव॥
त्यौ त्रिभौ ज्ञेयौ फाल्गुनस्त्रिभो मतः ॥ शेषमासा द्विभा ज्ञेयाः कृत्तिकादि व्यवस्थयेति येषां मते कार्त्तिके ॥२३॥

ऽयं मासः स भास्कर इति ॥ नक्षत्रमपि मासं केचित्स्वीकुर्वंति ॥ सर्वर्क्षपरिवृत्तैस्तु नक्षत्रो मास उच्य
त इति विष्णुधर्मोत्तरेऽभिधानात् तत्रापि सप्तविंशतिसंख्या परिमीयते अनेनेति मासशब्दो योज
नीयः ॥ तत्र सौरमासस्याद्यंतौ मेषराशिनापाद्यंताभ्यां व्यवस्थितौ सावने पुरुषेच्छादिर्नियाम
कः ॥ नाक्षत्रे नक्षत्रं नियामकं ॥ चांद्रस्तु दर्शांतः पौर्णमास्यांतो वेति ॥ द्विधा विकल्पते ॥ तथा च श्रू
यते ॥ अमावास्यया मासान्संपाद्याहरुत्सृजंत्यमावास्यया हि मासान्संपश्यंति पौर्णमास्या
मासान्संपाद्याहरुत्सृजंति पौर्णमास्या मासान्संपश्यंतीति ॥ अस्य वाक्यस्यायमर्थः ॥ अस्ति किं
चित्सर्गाणमयननाम सत्रं तच्च गवामयनस्य विकृतिः अतो द्वादशसु राशिषु अनुष्ठेयं प्रकृतावे
कैकस्मिन्मासे त्रिंशत्स्वहःसु सोमयागविशेषाणां त्रिंशता मनुष्ठेयत्वात्किंचिदृत्सर्गिणामय
ननामसत्रं तदृद्धिकृतावपि प्राप्तौ प्रतिमासमेकस्मिन्नहनि सोमयागपरित्यागो विधीयते तत्र
कतमदुत्सृज्यतामिति विवक्षायामिदमुच्यते ॥ अमावास्यां स्यायामनुष्ठेयेन यागेन पूर्वमासं
परिसमाप्योत्तरस्यादिभूतमहस्त्यज्यतामिति विधायार्थवादेन प्रसिद्धं बाधिनाऽहनाऽनेन मा
सस्यामावास्यांतत्वं प्रत्यक्षेण दृष्टं यद्वत्सर्वेषां संमतिं दृढ्यतीति एवं पौर्णिमासिवाक्येऽपि योज्य

मारभ्य मासास्तन्मते तौ यौ तैआश्विनसादौ तत्र मासस्सामान्यकर्त्तव्यानि तैत्तिरेया आमनंति मासि मासि
पितृभ्यः क्रियत इति ॥ मासि मासि पर्वण्युपयंति ॥ मासि मास्यतिग्राह्या गृह्यंत इति चापस्तंब निरुक्तो
त्र विशेषाः अतिग्राह्याः यह विशेषाः ॥ ग्रा स्वांतरेपि ॥ कुंडपायिनामयने मासमग्निहोत्रं जुहोतीति
मासविशेषानुपजीव्य कर्त्तव्यविशेषं कल्पसूत्रकाराः पठंति ॥ अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृ
तं भवतीति फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा वैदेन यजेत इति ततश्चतुर्षु मासेषु आषाढ्यां श्रावण्यां
वोदवसाय वरुणप्रघासैर्यजत इत्यादिस्मात् तथा पद्मपुराणे कृ गौरीव्रतादयश्चैत्रादिमासेषु
क्रमेण कर्त्तव्याः ॥ ते च हेमाद्रौ व्रतकांडे द्रष्टव्याः ॥ तथा च विष्णुधर्मोत्तरे तिलदानादीनि माघमासा
दिषु कर्त्तव्यानि तानि वदानकांडे द्रष्टव्यानि ॥ चांद्रसौरसावनानां मध्ये कस्यचित् क्वचिद्विशेषस्तत्चांद्र
श्चव्यं ॥ तदुक्तं ज्योतिर्गर्गे ॥ सौरो मासो विवाहादौ यज्ञादौ सावनो मतः ॥ आब्दिके पितृकार्ये च चांद्रो
मासः प्रशस्यत इति ॥ ॥ इति त्रयमाससंनिर्णयः ॥ ॥ अथ मलमासः ॥ ॥ तस्य स्वरूपं ब्र
ह्मसिद्धांतेभिहितं ॥ चांद्रो मासो ह्यसंक्रांतो मलमासः प्रकीर्तित इति ॥ मलत्वं च कालाधिक्या
त् ॥ तथा च गृह्यपरिशिष्टे ॥ मलं वदंति कालस्य मासं कालविदोधिकमिति ॥ कालाधिक्यं च विस्त

माध० ॥२४॥

धर्मेस्तिरभिहितं ॥ सौरेणाब्दस्यमानेन यदा भवति भार्गव ॥ सावने तु तदा मानेदिन षट्कं न पूर्यते ॥
दिनरात्रिश्च ते राम प्रोक्ताः संवत्सरेण षट् ॥ सौरसंवत्सरस्यांते मानेन शशिजेन तु ॥ एकादशाति
रिच्यंते मानेन भृगुनंदन ॥ मासद्वये सार्धमासे तस्मान्मासो तिरिच्यते ॥ एकादशाभिर्दिनैश्चाब्द
इति रिच्यते ॥ तथा च चांद्रसंवत्सरद्वयात् सौरसंवत्सरद्वयं द्वाविंशत्यादिनैरधिकं भवति ॥ तदूर्ध्वं
सौरं मासार्धकं चांद्रमासार्धकात् सार्धैः सप्तभिर्दिनैरतिरिच्यते मलिनत्वाद्दिनार्धन्यूनो मासो भ
वति सोपमधिकमास इति ॥ अवशिष्टार्धदिनार्धपूर्तौ च यथोक्तकालादूर्ध्वं षोडशभिर्दिनैः संपद्य
ते ॥ अत एव सिद्धांतेभिहितं ॥ द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा ॥ घटिकानां चतुष्केन प
तति ह्यधिमासकः इति ॥ न च कालाधिक्यमात्रेण मलत्वे तिथ्यादिवृद्धेरपि मलत्वं प्रसज्येतेति शंक
नीयं ॥ कालाधिक्ये सति नपुंसकत्वेन मलत्वांगीकारात् ॥ नपुंसकत्वं च ज्योतिःशास्त्रेभिहितं ॥
असंक्रांता हि यो मासः कदाचित्तिथिवृद्धितः ॥ कालेनैतेन समायाति स नपुंसक इष्यते इति ॥
पुरुषस्य सूर्यस्य तत्राभावान्नपुंसकत्वं तदपि तत्रैवोक्तं ॥ अरुणः सूर्यो भानुस्तपनश्चेंद्रो ॥शिव॥
रविर्गभस्तिश्च ॥ अर्यमा हिरण्यरेता दिवाकरो मित्रविष्णु च ॥ एते द्वादश सूर्या माघाद्येषु दयं ॥२४॥

माघ०

॥२५॥

स्ति नियमः॥ तथा च लघुहारीतः॥ इंद्राग्नी यत्र हूयेते मासादिः स प्रकीर्त्तितः॥ अग्नीषोमौ स्थितौ मध्ये
समाप्तौ पितृसोमकौ॥ तं मद्रस्तिरूम्पन्तु यदा रविर्गच्छेत् कदाचन॥ आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृ
तः इति॥ अयमर्थः॥ दर्शपौर्णमासयाजिना शुक्लप्रतिपदि दर्शेष्टिदेवाविंद्राग्नी हूयते॥ कृष्णप्रति
पदि पौर्णमासेष्टिदेवावग्नीषोमौ हूयते॥ अमावास्यायां पिंडपितृयज्ञ इष्टिदेवौ पितरः सोमकौ तत्त्वे
वं सति शुक्लप्रतिपदादिदर्शान्तो मासः संक्रांतिरहितोधिमास इत्यर्थः॥ लभ्यत इति तस्मान्मध्यममानतान
श्रौतस्मार्त्तयोर्नेपि युक्ता बाढं तथापि कालाधिक्यान्मलमास इत्यस्मिन्नैत्र तदुदारणमित्यदोषः॥
यत्तु मासे त्रिंशत्तवदित्युक्तदाहृतं तच्च श्रौतस्मार्त्तयोरुपयुज्यते स्या ज्यकत्वेन स्फुरमानसिधत्वात्त
ता दृशं चाधिमासमुदाहरामः॥ अष्टपंचाशदधिकत्रिशतद्व्याधिके शकवर्षाणां सहस्रे गते सति समनंत
रभावी योयमीश्वरसंवत्सरस्तस्मिन् श्रावणमासोधिमासः॥ ततः पूर्वभाविधाभावसंवत्सरः
तस्मिन् फाल्गुनमासोधिकः तयोः संवत्सरयोर्मध्यवर्त्तिनौ द्वौ युवधातृसंवत्सरौ तदीयाश्चतुर्विं
शतिमासाः ईश्वरसंवत्सरे चत्वारश्चैत्राद्याः तथा सति यथोक्तफाल्गुनमारभ्य गणनायां यथो
क्तश्रावणमासस्त्रिंशत्तमो भवति अनेन न्यायेन षष्टिमासात्मकेषु पंचसु संवत्सरेषु द्वाव ॥त्रिव॥
धिकमासौ संपद्येते॥ तदुक्तं महाभारते॥ पंचमे पंचमे वर्षे द्वौ मासा वधिकौ मतौ॥ तेषां काला ॥२५॥

तिरेकेण ग्रहाणामतिरेक इति॥ नन्वधिकमासस्य क्वचित् त्रिंशत्तमत्वं व्यभिचरति न्यूनाधिका
संख्यायाः अपि दर्शनात् तथाहि॥ यथोक्तेश्वरसंवत्सरोत्तरभाविनि चानुसंवत्सरे वैशाखमा
सोधिकः तत उत्तरभाविनि तारणसंवत्सरव्यवहिते पार्थिवसंवत्सरे भाद्रपदमासोधिकः तथा
च तस्यैकोनत्रिंशत्वं संपद्यते॥ तथा संवत्सरे वैशाखमासोधिकः नंदनसंवत्सरव्यवहिते
विजयसंवत्सरे भाद्रपदेदमासोधिक इति तत्राप्येकोनत्रिंशत्वं॥ तथा दुर्मुखसंवत्सरे श्राव
णमासोधिकः हेमलंबिविलंबिसंवत्सरद्वयव्यवहिते विकारिसंवत्सरे ज्येष्ठोधिकः तथा च तस्य
पंचत्रिंशत्वं संपद्यते तस्मान्मासस्त्रिंशत्तमो भवेदित्येतदयुक्तं नायं दोषः त्रिंशत्तमत्वस्योपल
क्षणत्वेनांगीकारात्॥ उदाहरणप्रदर्शनार्थमेतदुक्तमित्यविरोधः॥ इदमत्र विचार्यते॥ किमयं
मलमासः स्वतंत्र उत ततः पूर्वस्य शुद्धमासस्य शेषः आहोस्विदुत्तरस्य शुद्धमासस्य शे
ष इति॥ नन्च कारकेदं तत्परीक्षेयमनुष्ठानानुपयोगादिति शंकनीयं प्रत्याब्दिकाद्यनुष्ठाने त
द्विचारस्योपयुक्तत्वात् तथाहि शुद्धाषाढशुद्धश्रावणयोर्मध्ये यदा मलमासः तदा तस्य
स्वतंत्रत्वे तस्मिन् प्रत्याब्दिकमेव न प्राप्नोति पूर्वस्योत्तरस्य वा शेषत्वे शेषिणि मासे यत्र प्र

माध० ॥२६॥

त्याद्धिकादितस्य मलमासोप्यनुष्ठानं प्राप्नोति पितृकार्ये ऽपि चोभयोरिति वचनात्॥ तस्मात्सार्थको ऽयं वि-
चारः तस्यैस्वातंत्र्ये तावत्क्रतुनिर्णयनिरस्तं॥ पारतं… त्र्येपि पूर्वत्रोषत्वं युक्तमिति केचिदाहुः॥ तत्रोप-
पत्तिके शिदिघंति चोपन्यस्यंति च॥ मेषादिसंक्रांतयश्चैत्रादिसंज्ञानां प्रयोजिकाः तथा च ज्योतिःशा-
स्त्रेभिहितं॥ मेषादिस्थे सवितरि यो यो मासः प्रपू… र्यते॥ चांद्रश्चैत्राद्यः संज्ञेयः पूर्तिद्वित्वेधिमासोंत्य
इति॥ यदा सवितर्येकराशिस्थे सति द्वौ दूर्यं पू… र्यते तदानीमंत्य उत्तरदर्शावसानको ऽसो ऽधिकमासः
न तु तत्पूर्वः दर्शावसानक इत्यर्थः॥ यदा तु श्राव्यां शुद्धाषाढस्य वद्यचतुर्दश्यां दर्शे वा कर्कटसंक्रां-
तिर्भवति॥ शुद्धश्रावणस्य शुक्लपक्षे प्रतिपदि द्वितीयायां वा सिंहसंक्रांतिर्भवति तदा कर्कटसं-
क्रांतियुक्तस्य शुद्धमासस्याषाढत्वं युक्तं तदीय दर्शस्य कर्कटस्थे रवाववसितत्वात् सिंहसं-
क्रांतियुक्तस्यापि श्रावणत्वमुचितं तदीयदर्शस्य सिंहस्थे रवाववसितत्वात् तेनैव न्यायेन
तयोर्मध्यवर्तिनः संक्रांतिरहितमासस्य दर्शः कर्कटस्थे एव रवौ पूर्यते पूर्वाषाढवदेतस्याप्याषा-
ढत्वमुचितं॥ अत्रोच्यते॥ मेषादीनां शुद्धमाससंज्ञायामेव प्रयोजकत्वं मलमासस्योत्तर- ॥श्रीः॥
मासत्रोषत्वस्मरणात्॥ तथा च ज्योतिःपितामहः षष्ठ्यां तु दिवसे युक्तः कथितो बादरायणैः॥ ष- ॥२६॥

तिमासेषु॥ निःसूर्योधिकमासो मलिम्लुचस्य स्ततः पापः॥ मासेषु द्वादशादित्यास्तपंते हि यथाक्रमं॥
नपुंसके ऽधिके मासि मंडलं तपते रविः॥ रिति॥ मलिम्लुचत्वं च तस्य राक्षसस्याधिराक्रांतत्वात्॥ तदाह हारा-
तातपः॥ वत्सरांतर्गतः पापो यज्ञानां फलनाशकः॥ नैर्ऋतैर्यातुधानाद्यैः समाक्रांतो विनाशकैः॥ मलि-
म्लुचैः समाक्रांतः सूर्यसंक्रांतिवर्जितं॥ मलिम्लुचं विजानीयाद्गर्हितं सर्वकर्मणीति॥ ननु द्वात्रिंशाद्धि-
र्मासैरित्यनेन नयेयं काले पतति दर्शितासावनं तरेणविरुध्यते तथा च काठकगृह्ये॥ यस्मिन्मासे
न संक्रांतिः संक्रांतिद्वयमेव वा॥ मलमासः स विज्ञेयो मासे त्रिंश… इति भवेदिति॥ नायं दोषः॥ द्व-
योर्वचनयोर्भिन्नविषयत्वात्॥ ज्योतिःशास्त्रप्रसिद्धमध्यममानमाश्रित्य द्वात्रिंशाद्भिरिति वचनं
प्रवृत्तं॥ यस्मिन्मास इति तु स्फुरमानमाश्रित्य प्रवृत्तं॥ ननु॥ मध्यममानप्रवृत्तोधिकमासो ऽ-
ज्योतिःशास्त्रव्यवहार॥ एवमायुतेन तु श्रौतस्मार्तयोस्तस्य शुक्लप्रतिपदादिदर्शांतमासत्वनिय-
मासंभावात्॥ षोडशभिर्दिनैः घटिकाचतुष्टये न चैपेले शुद्धा त्रिंशन्मासेषु गतेषु सो ऽधिमा॥ सो-
भिधीयते तत्र यदि दर्शांता मासा विवक्षिताः तदा तत्सद्वितीयायां घटिकाचतुष्टये गते अधिमा-
सस्योपक्रमः प्रसज्यते॥ अथानियतोपक्रमावसानाद्वात्रिंशन्मासा विवक्ष्येस्तदापि शुक्लप्र-
तिपदादिदर्शांतो मास इत्येष नियमो न लभ्यते॥ श्रौतस्मार्तव्यवहारोपयोगिमत्वधिमासे सो

र्धं तु परित्यज्य कर्तव्या उत्तरे क्रिया इति॥ अत्रापि षष्ठिदिनात्मकं मासं प्रकल्पोक्तं॥ आद्यो मलिम्लुचो
ज्ञेयो द्वितीयः प्राकृतः स्मृत इति॥ एवं षष्ठिदिनो मासः॥ तदर्धं तु मलिम्लुच इति ज्योतिःशास्त्रांतरे
पि षष्ठ्या तु दिवसैर्मासः कथितो बादरायणैः॥ पूर्वमर्धं परित्यज्य मुत्तरार्धं प्रशस्यत इति॥ अस्त्वेवं
संक्रांतिरहितस्य मलमासस्योत्तरग्राह्यत्वं द्विसंक्रांतियुक्तस्य तु कथमिति चेदुच्यते॥ ॥तत्र प्रथ
मं तावत्स्वरूपं निरूप्यते॥ ॥तज्ज्योतिःसिद्धांते भिहितं॥ असंक्रांतिमासोधिमासः स्फुटस्या
द्विसंक्रांतिमासः क्षयाख्यः कदाचित्॥ क्षयः कार्तिकादित्रये नान्यथास्यात्तदा वर्षमध्येधिमासद्वय
चेति॥ अयमर्थः॥ स्फुटमानेन योयमसंक्रांतः स स्फुटोधिमासः तेनैव मानेन योयं द्विसंक्रांतियुक्तः
सैस क्षयमासः॥ स च कार्तिकमार्गशिरपौषमासेष्वेव त्रिषु न्यतमो भवति॥ नान्येषु माघादिषु नव
सु एवंविध क्षयमासयुक्ते वर्षे क्षयमासात्पूर्वोक्तेषु मासेषु मध्ये कश्चिदधिमासो भवति क्षयमासादूर्ध्व
मिति मासत्रयमध्ये परो धिमासः तदेवंविधमेकवर्षस्थं मलमासत्रयं चिरेण कालेन यदा कदाचिदायाति॥
न त्वर्वाक्धिमासवत्पुनः सहसा समायाति॥ तत्त्रितयागमनकालश्च सिद्धांतसिरोमणौ दर्शितः॥ गतोब्धि
श्राद्रिनंदैर्मिते शाककाले॥ १०७४ तिथिशै ११५ र्भविष्यत्यथांगाक्षसूर्यैः १२५६ गजाद्र्यग्निभूमि १३७८

माध०
॥२७॥

तथाप्रायशोऽयं कुवेदंदुर्वर्षैः १५९ कुविद्रोकुभिश्च १२ अस्यायमर्थः ॥ चतुःषष्ट्यधिकनवशतसंख्य
कैर्वर्षैः परिमिते शाकस्य काले कश्चिद्द्व्युक्तमासत्रयोपेतो वत्सरो गतः ॥ यथोक्तसंख्याच्चा बहुत्वेन दैरि
त्यनेन विवक्षिता ॥ अङ्काश्चत्वारः अद्रयः सप्त नंदा नव एतत्संख्या घस्यगमका गणकप्रसिद्धा प्राति
लोम्येन लिखिता यथोक्तसंख्यायां पर्यवस्यंति ॥ तिथिरौरवाप्तितिथयः पंचदश रुद्रा एकादश ॥ तत्र
गणकैरंकेषु प्रक्षिप्तेषु पंचदशाधिकशतयुक्तसहस्रसंख्या संपद्यते ॥ तावद्भिः शाकवर्षैर्मिते शाकका
ले कश्चिद्द्व्युक्तमासत्रयोपेतः संवत्सरः ॥ अंगाक्षसूर्यैरित्यत्रांगानि षट् अक्षाणि इंद्रियाणि पंच
सूर्या द्वादश तदंकप्रक्षेपे सति षट्पंचाशदधिकशतद्वयोपेतसहस्रसंख्या संपद्यते तावद्भिर्वत्सरै
मिते शाककाले यथोक्तमासत्रयोपेतः कश्चित्संवत्सरः संपद्यते अस्य चोदाहरणं ॥ पूर्वोदाहृतद्वी
श्वरसंवत्सरात् प्राचीनो भावसंवत्सरः ॥ तत्र हि भाद्रपदबहुलामावास्यायां कन्यासंक्रांतिः ॥ ततऊ
र्ध्वमेकसंक्रांतं मासमतीत्योत्तरयोर्मासयोः क्रमेण तुलावृश्चिकसंक्रांती ततऊर्ध्वमेकसंक्रांतं मा
समतीत्योत्तरयोर्मासयोः स्मिन्नेव मासे शुक्लप्रतिपदि धनुःसंक्रांति ततऊर्ध्वं दर्शे मकरसंक्रांतिः ॥ श्रीव ॥
ततऊर्ध्वं कुंभसंक्रांतिः समनंतरं मासे दर्शे ततऊर्ध्वमेकमसंक्रांतं मासमतीत्योत्तरस्यां शुक्लप्रति ॥२७॥

माध० ११२८

श्यते॥ यस्मिन्मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा॥ संसर्पांहस्पती मासावधिमासश्च निंद्य॥ इ
तो इति तत्र क्षयमासात्प्राचीनो यो संक्रान्तः संसर्पः। असंक्रान्तत्वे नूनराधिकमास एतस्य कर्मणि
हितायां प्राप्तायां तदपवादेन कर्मार्हः सन् सम्यक् संसर्पतीति संसर्पः॥ असंक्रान्तस्य कर्मनिर्हृ
त्वं प्राप्तिरेवं स्मर्यते। षष्टिर्नाडीमतिक्रम्य यदा संक्रमते रविः॥ रविणा लंघितो मासो ह्यनर्हः
सर्वकर्मसु इति॥ तदपवादश्चैवं स्मर्यते॥ मासद्वयेऽब्दमध्ये तु संक्रान्तिर्न यदा भवेत्। प्राकृतस्तत्र पू
र्वः स्यादधिमासस्तथोत्तर इति॥ संक्रान्तिरहितयोर्द्वयोर्मासयोर्मध्ये यः पूर्वो संक्रान्तः स प्राकृतः
शुभकर्मार्ह इत्यर्थः। अस्मिन्नेवार्थे जाबालिः॥ एकस्मिन्नेव वर्षे तु द्वौ मासावधिमासकौ। प्राकृ
तस्तत्र पूर्वः स्यादुत्तरस्तु मलिम्लुच इति। अतः संसर्पत्वं तस्योपपन्नं असंक्रान्तमासद्वयमध्य
वर्तिनः क्षयमासस्यांहस्पतित्वनिरुक्तिः पूर्वमेव दर्शिता॥ तदुत्तरभाविना संक्रान्तस्य काला
धिक्यादधिकमासत्वं त एते त्रयोऽपि ज्योतिःशास्त्रप्रसिद्धा विवाहादौ निन्दिताः। यथोक्तप्रका
रेणांहस्पतिनाम्नः क्षयमासस्य द्वितीयसंक्रान्तिप्रयुक्तः नाम संभवे सति शुद्धमासवत्स्वा ॥ ११२८॥
तंत्र्यात्पूर्वोत्तरमासत्रैषत्वशंका च कात्र॥ नन्वधिमासोपेतसंवत्सरस्य त्रयोदशमासत्व

कत्वं यथा तथाधिमासद्वयोपेतसंवत्सरस्य चतुर्दशमासात्मकत्वं प्राप्तं न चैतद्युक्तं। त्रयो
दशं तु श्रुतिराह॥ मासं चतुर्दशं क्वापि नास्तीति दृष्टं इति वचनात्। नैष दोषः॥ असंक्रान्तत्वे
नाधिकत्वप्रसक्तियुक्तयोर्द्वयोर्मध्ये पूर्वस्याधिकमासत्वं निषेधात्। उक्तं हि। ज्योतिःसिद्धान्ते।
घटकन्याकुगते सूर्ये वृश्चिके वाथ धन्विनि॥ मकरे वाथ कुंभे वा नाधिमासो विधीयत इति।
अयमर्थः॥ वृश्चिकादिषु चतुर्षु मासेषु यदा मलमासः। प्राप्नोति तदा च सूर्ये तुलाकन्ययो
र्वर्तमाने सत्यपि मलमासः प्राप्नोति तदा पूर्वः प्राकृतो संक्रान्तो नाधिमास इति। घटकन्याद्युप
लक्षणं॥ पूर्वेष्वपि प्रसक्तो संक्रान्तो नाधिमासः तदुक्तं ब्रह्मसिद्धान्ते॥ चैत्रादर्वाक् नाधिमासः॥
परतस्त्वधिको भवेदिति। चैत्रादारभ्योपरितनेषु यदा यौ कौचित् द्वौ मासावसंक्रान्तौ तदा तयो
र्वाचीनपूर्वेना धिमासः। उत्तरस्त्वभवत्येवाधिमासः न नु माभूच्चतुर्दशमासप्राप्तिः।
अथाप्येकादशमासत्वं प्रसज्यते तस्यैव दोषः॥ तथा हि। द्वादश मासाः संवत्सर इत्येषा
नित्यवत् श्रुतिः॥ ससंक्रान्तानु मासानुद्दिश्य प्रवृत्ता अस्ति त्रयोदशमास इत्याहुरित्यसंक्रान्
तस्य कादाचित्कस्य पृथक्श्रवणात्। तथा च सति प्रकृते क्षयमासो येन त्रयोदश मासात्मके

माध०

॥२९॥

संवत्सरे द्वयोरसंक्रांतयोपरित्यागे सत्यवसिष्टः असंक्रांताएकादशैव तत्तोनिसवत्श्रुतिविरो
धः॥नायं दोषः॥ द्विसंक्रांतियुक्तस्य क्षयस्य मासद्वयत्वेन परिगणनात् तथा च स्मर्यते॥ ति
तिथ्यर्थे प्रथमे पूर्वो द्वितीयेर्धे तदुत्तरः मासाविति बुधैश्चिंत्यौ क्षयः मासस्य मध्यगाविति॥
ज्योतिःशास्त्रे द्विसंक्रांतियुक्तः क्षयमासादासाद्य संक्रांतेः क्रियते पूर्वेत्र चालनसंस्कारोस्तीत्य
र्थः॥ तथा च॥ यथा चालनमस्ति तदा पूर्वस्यासंक्रांतस्य ससंक्रांतत्वसंपादनादयं क्षयं मासएकत्वे
नैव परिगणनीयः॥ यदा तु चालनं नास्ति तदा यथोक्तप्रकारेण मासद्वयात्मकत्वं द्रष्टव्यं॥ यथा
उक्तं पटेश्वरसिद्धांते यदि न चलति वैमासयुग्मं विचिंत्यमिति॥ ॥इत्थं मलमासस्वरूपं निरूपितं
अथ तत्र वर्ज्यावर्ज्यविवेकः क्रियते॥ तत्र पैठीनसिः॥ श्रौतस्मार्तक्रियाः सर्वा द्वादशे मासि कि
र्तिताः॥ त्रयोदशे तु सर्वास्ता निष्फला इति कीर्तिताः तस्मात्त्रयोदशे मासि कुर्यात्ता न कथंचन॥
कुर्वंस्तदर्थमेवा वास्य कुर्यादात्मविनाशनमिति॥ अत्र निष्फला इत्यभिधानात् तत्फलका
मतया प्रवृत्तं कर्म निषिध्यत इति गम्यते॥ तथा च स्मृत्यंतरं॥ इष्ट्यादि सर्वकाम्यं तु मलमासे वि ॥श्री व॥
वर्जयेदिति न च सर्वशब्दस्याभिधानान्नित्यनैमित्तिकयोरपि निषेधः शंकनीयः॥ नित्यनैमित्तिक ॥२२॥

पद्मिमानसंक्रांतिः॥ एवं सत्येकस्मिन्नेव वत्सरे द्वावसंक्रांतौ मासावेको द्विसंक्रांतियुक्तो मास इति य
थोक्तमासत्रितयं संपद्यते॥ गजाब्ध्यग्निभूमिरित्यत्रापि गजाष्टौ अब्धयः सप्त अग्नयस्त्रयः भूरेका
तत्रांकप्रक्षेपे सति अष्टसप्तत्यधिकशतत्रयोपेतसहस्रसंख्या संपद्यते॥ तावद्भिर्वत्सरैर्मितेत्राव
काले कुभिर्दुरूविधः संपद्यते संवत्सरः कुवेंदुवर्षैरित्यत्र कुरेका वेदाश्चत्वारः इंदुरेकः॥ तत्रां
कप्रक्षेपेणैकचत्वारिंशदधिकशतसंख्या भवति एतावद्भिर्वर्षैः कुधिस्रवर्त्तिरक्षयमासयोर्व्य
वधानं भवति गोकुभिश्चेत्यत्रापि नपुंसकवर्जितेषु स्वराक्षरेषु गण्यमानेषु घोकारो नवमः संप
द्यते कुरेकः तत्रांकप्रक्षेपे सति एकोनविंशतिर्भवति॥ तावद्भिर्वत्सरैः कुधिस्रवर्त्तिरयोः क्षयमा
सयोर्व्यवधानमिति॥ अत्र द्विसंक्रांतियुक्तस्य क्षयसंज्ञायामुपपत्तिरुच्यते॥ यदा धनुस्थे रवौ
पूर्तिस्तदा तस्य मेषादित्वेन वचनेन मार्गशीर्षत्वं प्राप्तं तथैव स्थास्यति पूर्वे दिन हते द्विसंक्रां
ते मासे धनुस्थे रवौ दर्शे न समाप्तः मकरस्थे तु रवौ समाप्तः॥ अत पौषमासत्वं तस्य संपन्नं
तथा च मार्गशीर्षस्य तत्र लुप्तत्वाद् दस्य क्षयसंज्ञा युक्ता॥ अत एवैकमासत्वाभिलादहसः पापसं
पतिरिति युक्ता संज्ञा बार्हस्पत्ये सत्यपि मवद्वीयते स च व्यवहारो बार्हस्पत्यज्योतिर्ग्रंथेषु

यस्मि यतः सन्मलिम्लुचेति। बृहस्पतिवचनात्। जाबालिनापि तथैवोक्तं। नित्यनैमित्तकं
चैव श्राद्धं कुर्यान्मलिम्लुचइति। तिथिनक्षत्रवारोक्तं काम्यं नैव कदाचनेति। योयं मलमासे का
म्यं निषेधः सो वारंभसमाप्तिविषयः। अस्तं यो नाम ये मासास्ते न तेषु मम संमताः। व्रतानां चै
व यज्ञानां आरंभश्च समाप्तयः दूत्यारंभसमाप्त्योरेवाधिमासे प्रतिषेधात्। आरंभसमाप्तोर्म
ध्यपातिन्यधिमासे तु तदारब्धं कार्यमनुष्ठेयं। अधिमासे निपतिते ह्येष एव विधिः क्रम इति स्म
रणात्। यत्तु काष्ठकराह्वे। समाप्तिं प्रसववचने। प्रवृत्तं मलमासात्प्राक् काम्यं कर्मसमापितं॥
आगते मलमासे तु तत्समाप्यं न संशयः इति। तत्सावनमासप्रवृत्तं कृच्छ्रचांद्रायणादी स्वच्छ
त्रादिव्रतविषयं। आवश्यकं तु यत्काम्यं कर्म तन्मलमासेऽथनुष्ठेय। तद्यथा प्रक्रांते मलमासे
त नुष्ठित्रेषु दिनेषु यदि कश्चिद्बालो ब्रह्मराक्षसादिना गृह्यते। तदा रक्षोघ्नेष्टिः सद्य एव
कर्त्तव्या। मलमाससमाप्तिप्रतीक्षायां बालादिमरणप्रसंगात्। सा चेष्टिः काम्यकांडे ऽभ्नाय
ते। अग्नये रक्षोघ्नेपुरोडाशमष्टाकपालं निर्वपेद्यं रक्षांसि सचेरन्नग्निमेव रक्षोहणं स्वेन
भागधेयेनोपधावति स एवास्माद्रक्षांनस्यपहंतीति संचेरेत् संभवे युग्धिपुरितियावत्तु उपधा

माध०
॥३०॥

वतितद्देवताप्रियेणहविर्भागेणतोषयति।अस्माद्रक्षोगृहीतादिष्टिःकर्त्तारक्षांस्यपनयतित
थैवाभिचरतःप्रतिचरतःश्चकाचिदिष्टिःश्रूयते।आग्नेयवैष्णवमेकादशकपालंनिर्वपेद्यद
भिचरन्नितिप्रतिवैपरस्तादभिचरतमभिचरतिद्वेद्वेपुरोनुवाक्येकुर्यादितिच॥तत्रद्वयोर
प्येकैवेष्टिःअभिचरतिएकैकापुरोनुवाक्याप्रतिचरतस्तुद्वेद्वेइतिविशेषः॥कालविलंब
प्रतिक्षात्रापिसंनभवतिबाधकेशत्रौप्रत्यासन्नेसतितदेवाभिचारस्यकर्त्तव्यत्वात्प्रतिचार
स्यापिसएवकालःएतएवयेयजैतेनाभिचार्यमाणाइतिवर्तमानवाचिनाशानच्प्रत्ययातेनशब्दे
नप्रतिचारकर्तुरभिचारसमकालत्वविशेषणात्॥एवंप्रबलज्वरहृद्रोगादिनायदापमृत्युः
प्रसक्तःतदापिसद्यएवेष्टिकर्त्तव्या।इष्टिश्चश्रूयते।योमृत्योर्बिभियात्तस्माएतांप्राजापत्यां
शतकृष्णलांनिर्वपेत्प्रजापतिमेवस्वेनभागधेयेनोपधावति॥सएवास्मिन्नायुर्दधातिस
र्वमायुरेतितीकृष्णलाःसुवर्णशकलानिवैयवत्रयपरिमितानिचशतसंख्याकानिय
स्यांनिर्वपणीयासेष्टिःशतकृष्णलायदाचक्षुष्याभयात्तस्यानिरुध्यंतिमलमासाश्चा ॥शिव॥
गातःतदाकार्याचक्षुष्कामायजेतेतिविहितेष्टिर्नकालविलंबंसहते।एवमस्मातिष्याव्वस्य ॥३०॥

माघ० ॥३१॥

गतिकागतिकागतिकयोरुदाहरणं विरुद्धमिति शंकनीयं तस्य मलमासे विकल्पितत्वात्॥ तदाह
पैठीनसिः॥ संक्रांतिरहिते मासि कुर्यादीर्घ्ययणं न चेति॥ अनन्यगतिकानि तु नैमित्तिकानि ग्रहणस्ना
नादीनि तेषां मलमासेपि कर्त्तव्यतामाह॥ यमः॥ चंद्रसूर्यग्रहे स्नानं श्राद्धदानं जपादिकं॥ मलमा
सेपि कर्त्तव्यं नीत्यनैमित्तिकं तथेति॥ सगतिकानि तु नैमित्तिकानि, जातेष्ट्यादीनि॥ वैश्वानरं
द्वादशकपालं निर्वपेत् पुत्रे जात इति विहितायाइष्टेस्त्वाशौचव्यवसिते यथानुष्ठानं तद्वन्मलमासे
प्यवसितेप्यनुष्ठातुं शक्यत्वात् सगतिकत्वं॥ यथोक्तानि त्याकाम्यावत्र्यकं अनन्यगतिके नित्य
नैमित्तिके अपि मलमासेपि कार्याणि तानेतराणीति सामन्यते वर्ज्यावर्ज्यानीति विवेकः सं
ग्रहः॥ तानि च कार्याणि कालदर्शकारः संगृह्य मुदाजहार द्वादशाहसपिंडनं कर्म ग्रहणजन्म
नोः॥ सीमंतोन्नयपुंसवने श्राद्धावेतौ जातकर्म च रोगे शांतिरलभ्ये चेयोगे श्राद्धव्रतानि च॥ प्रायश्चित्तं
निमित्तस्य वशात् पूर्वे परे च वा॥ अब्दोदकुंभं न्वादिमहालययुगादिषु॥ श्राद्धं दर्शेप्यहरहः श्राद्धमन् ॥शिव॥
नादिमासिकं॥ मलिम्लुचान्यमासेषु मज्जानां श्राद्धमाब्दिकं॥ श्राद्धं तु पूर्वदृष्टेषु तीर्थेषु च यु ॥३१॥

गादिषु च यु दानं दानं देनंदिनं च यत्॥ तिलगोभूहिरण्यानां संध्योपासनयोः क्रिया॥ प
र्वहोमश्चाग्रयणं सांग्नेरिष्ट्यश्च पार्वणं॥ नित्याग्निहोत्रहोमश्च देवतातिथिपूजनं॥ स्ना
नं च स्नानविधिनाप्यः भक्ष्याभक्ष्यवर्जनं॥ तर्पणं च निमित्तस्य नित्यत्वादुभयत्र च॥ अ
निसनिमित्तं च दानं च महदादिकं॥ अग्न्याधानाध्वरापूर्वतीर्थयात्रामरेक्षणं॥ देवाराम
तडागादिप्रतिष्ठामौंजिबंधनं॥ आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निष्क्रमः॥ राजाभिषेकं
प्रथमचूडाकर्मव्रतानि च॥ अन्नप्राशनमारंभो गृहाणां च प्रवेशनं॥ स्नानं विवाहो ना
मानि यत्र वेदमहोत्सवे॥ व्रतारंभसमासी च काम्यं काम्यं च पापमनं॥ प्रायश्चित्तं तु सर्वस्य मल
मासे विवर्जयेत्॥ उपाकर्मोत्सर्जने च पवित्रदमनार्पणे॥ अवरोहश्च हेमंतसर्पाणां बलिरि
ष्टका॥ ईशानस्य बलिर्विष्णोः शयनं परिवर्त्तनं॥ दुर्गेंद्रस्थापनोत्थानं च वर्जितः॥ पूर्वस्मृतिसिद्धा
नि परत्रान्यत्त्वदेविकमिति॥ अत्र द्वादशाहस्यारंभ्यानित्यत्वो हेतुत्वादुभयत्र चेत्सं तेन ग्रंथे
न कर्त्तव्यसंग्रहः॥ अनित्यमनिमित्तं चेत् प्रारभ्य वर्जयेदित्यंते न वर्ज्यसंग्रहः॥ उपाकर्मत्या

माध० ॥३२॥

रभ्यापरत्रान्यच्छ्रैदैविकमित्यं तेन मलमासे वर्जितानां स्वभावशुद्धमासे कर्तव्यत्वमस्त्येव ॥ अत्र सर्व
त्रसाक्षिवचनान्युदाहरामः ॥ यमः ॥ गर्भे वार्धुषिके भृत्ये श्राद्धकर्मणि मासिके । सपिंडीकरणे नित्ये ना
धिमासं विवर्जयेत् । तीर्थस्नानं जपो होमो यवव्रीहितिलादिभिः ॥ जातकर्मान्त्यकर्माणि नवश्राद्धं त
थैव च । माघत्रयोदशीश्राद्धं श्राद्धान्यपि च षोडश ॥ चंद्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकं । का
र्याणि मलमासेऽपि नित्यं नैमित्तके तथेति । मासिके श्राद्धकर्मणि अमावास्यायां श्राद्धकर्मणीत्यर्थः
नित्यमित्यदाने । होमो औपासनहोमः ॥ अन्त्यकर्माणि दहनोदकपिंडदानास्थिसंचयना
दीनि स्मर्यन्ते तरे । श्राद्धजातकनामानि व्यवसंस्कारःप्रसंयुताः ॥ मलिम्लुचेऽपि कुर्वीत व्याघ्रदृष्टिका
म्यश्च वर्जयेदिति । संस्काराः ॥ अन्नप्राशननिष्क्रमणादयः ॥ सव्रताश्चातुर्मास्यव्रतादयः ॥ ग
र्भस्थितः ॥ एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते । तत्कार्यं पूर्वमासे च कालाधिक्येऽपि धर्मतः ॥
इति गौतमः ॥ जातकर्मणि यच्छ्राद्धं नवश्राद्धं तथैव च । ग्रहणे पुंसवे दोऽन्च तत्पूर्वत्रपरत्र चेति । नि
मित्तवशादिति वाक्यशेषः ॥ स्मृतिसंग्रहेऽपि ॥ जातकर्म च पुंसूतिः सीमंतोन्नयनं तथा । मलि ॥श्रीव॥
म्लुचेऽपि कुर्वीत तन्निमित्ते यदि जायत इति ॥ मरीचिः ॥ रोगे चले व्यपयोगे च सीमंतोपुंसवेऽपि च । ॥३२॥

कान्युदाहार्याणि ॥ नित्यनैमित्तिकयोरपि यदनन्यगतिकं तदेव मलमासे कार्यं अनन्यगतिकं नित्यं कु
र्यान्नैमित्तकं तथेति स्मरणात् । काठकगृह्येऽपि । मलिनान्यगतिं कुर्यान्नित्यान्नैमित्तिकी क्रियामिति अ
नन्यगतिकानि नित्यानि च गृह्यपरिशिष्ट उदाहृतानि । अवषट्कारहोमाश्च पर्व चाग्रहणं तथा ॥ म
लमासे तु कर्तव्यं काम्यामिष्टिं च वर्जयेदिति ॥ अवषट्कारहोमा अग्निहोत्रोपासनवैश्वदेवादयः ॥ प
र्वदर्शपौर्णमासौ पार्वणस्थालीपाकश्च दर्शादीनां नित्यत्वं अकरणे प्रत्यवायश्रवणादवगंतव्यं ।
तथा चाथर्वणिका आमनंति । यस्याग्निहोत्रमदर्शपौर्णमासमनाग्रयणमतिथिवर्जितं अहु
तमवैश्वदेवमविधिना हुतमासप्तमांस्तस्य लोकान् हिनस्तीति । गत्यंतरयुतानि नि
त्यानि तत्र वर्ज्यानि ॥ तदुक्तं ॥ काठकगृह्यपरिशिष्टे ॥ सोमयागादिकर्माणि नित्यान्यपि मलिम्लु
चे ॥ षष्ठीष्ट्याग्रयणावानं चातुर्मास्यादिकान्यपि ॥ महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्मयत् ॥ स्प
ष्टं मासविशेषाख्याविहितं वर्जयेन्मलेइति । सोमयागो वसंते विहितः ॥ तस्य मासविवर्जनेऽपि
शुद्धमासे नुष्ठानसंभवात् । सगतिकत्वं षष्ठीष्टिः काठकशाखादौ प्रसिद्धा नचाग्रयणस्य स

यद्ददाति समुद्दिष्टं पूर्वं तत्रापि न दुष्यतीति ॥ निमित्तवशात् प्रायश्चित्तान्यग्निछिद्रकांडे बहूनि श्रूयंते ॥ आहि
ताग्निर्यदाग्नीनन्वाधायेष्टिमकृत्वा ग्रामांतरे प्रयाणं कुर्यात्तदा तुभ्यं ता अंगिरस्तमेति जुहुयात्तथा
च श्रुतिः ॥ सर्वान्वा एषोऽग्नौ कामान्प्रवेशयति योऽग्नीनन्वाधाय व्रतमुपैति स यदनिष्ट्वा प्रयाया
त् ॥ अकामप्रीता एवं कामा नानुप्रयायुः ॥ अतेजा अवीर्यः स्यात्स जुहुयात्तुभ्यं ता अंगिरस्तमः
विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिर इति कामानेवास्मिं दधाति कामप्रीता एनं काममनु
प्रयांति ॥ तेजस्वी वीर्यवान्भवतीति ॥ यस्योभयं हविरार्त्तिमार्च्छेत् ॥ ऐंद्रं पंचशरावमोदनं निर्व
पेदिति ॥ कौथुमिः ॥ आद्यमंबुघटं दद्यादन्नं वापि सुसंस्कृतं ॥ संवत्सरे व्यतीतेपि प्रतिमासं च मासि
कमिति ॥ मरीचिः ॥ प्रतिमासं मृताहे यच्छ्राद्धं च प्रतिवत्सरं ॥ मन्वादौ च युगादौ च मासयोरुभयो
रपीति ॥ मत्स्यपुराणे ॥ वर्षे वाहरहः श्राद्धं दानं च प्रतिवत्सरं गोभूतिलहिरण्यानां मासेपि स्यान्म
लिम्लुचे इति ॥ एवमभक्ष्यापेयवर्जनसंध्यावंदनादिष्वपि विशेषतः ॥ साक्षिवचनान्युदाहरणी
यानि ॥ सामान्यतस्तु नित्यनैमित्तिके कुर्यात्प्रयतः समलिम्लुचे इति बृहस्पतिवचनं पूर्वमेवोदाहृ

माध०
॥३३॥

तं॥ ननूक्ताहृतेषु संग्रहवचनेषु भाद्रपदापरपक्षश्राद्धस्याप्युतयत्र कर्त्तव्यतामितीयते॥ महालययु
गादिष्विति तत्र पठितत्वात्॥ सत्यं नो भपतैत्र कर्त्तव्यता स्मृतिविरुद्धा॥ महालयश्राद्धे धिकाढक
ाद्येव वर्ज्ये अष्टकास्मरणं पूर्वमुदाहृतं॥ मनुरपि॥ वृद्धिश्राद्धं तथा सोममग्न्याधेयं महालयं॥ राजा
भिषेकं काम्यं च न कुर्याद्भानुलंघिते इति॥ नागरखंडेपि॥ नभो वाथ नभस्यो वा मलमासो यदा भवेत्॥ स
प्तमः पितृपक्षः स्यादन्यत्रैव तु पंचमः॥ औषाढं इति तत्र आषाढीमवधिं कृत्वा सप्तमपंचमौ द्रष्टव्यौ॥ आ
षाढ्याः पंचमे पक्षे इति वचनात्॥ आषाढमासस्यांत्यभागे कर्कटकसंक्रांतौ नभसोधिकमासत्वे
श्रावणमासस्यांत्यभागे सिंहसंक्रांतौ नभसस्याधिकत्वे तयोरुभयोरपि पक्षयोः कन्यायां वर्तमाने
सवितरि यः कृष्णपक्षः स सप्तमो भवति॥ असति तु वृद्धये धिकमासे पंचमः॥ तथा सति सप्तमे विहितः श्राद्धा
परपक्षस्य श्राद्धस्य मलिने नभस्यकृष्णपक्षेनुष्ठानमयुक्तं॥ नायं दोषः॥ संग्रहवाक्ये तैर्गतमहाल
यत्रादेन तीर्थविन्यासस्यैव॥ माघत्रयोदश्यां वाधिवक्षेणीयत्वात्॥ ननु॥ मलिम्लुचान्यमासेषु मृता ॥श्राव॥
नां श्राद्धमाब्दिकमिति प्रतिसंवत्सरं प्राप्यमाणस्य मृताहश्राद्धस्य मासद्वये कर्त्तव्यता संग्रहे दर्शि ॥३३॥

कर्त्तव्यं॥द्वितीयाद्याब्दिकं तु शुद्धमास इत्यनया विवक्षया उभयत्र कर्त्तव्यतोक्ता॥मलमासमृतानां
माघ० तु यदि कदाचित्स एव मलमास आगतस्तदा तत्रैव प्रत्याब्दिकं मलेमासे कर्त्तव्यं॥~~द्वितीयाद्याब्दिकं~~
॥३८॥ ~~तु शुद्धमास इत्यनया विवक्षया उभयत्र कर्त्तव्यतोक्ता॥मलमासमृतानां~~ तु॥न नूपरितने
शुद्धमासे तथा च॥भृगुः॥मलमासमृतानां तु श्राद्धं यत्प्रतिवत्सरं॥मलमासे तु कर्त्तव्यं नान्येषां
तु कदाचनेति॥अतो मलमासमृतानां कदाचित्कं प्रत्याब्दिकं मलमासेपि कार्यं॥शुद्धमासमृ
तानां चैव प्रथमाब्दिकं तत्र कार्यं द्वितीयाद्याब्दिकं तु शुद्धमास इत्येतन्निर्णयमभिप्रेत्य पितृ
कार्याणि चोभयोरित्यादीनि वचनानि प्रवृत्तानि॥मलिम्लुचेति संप्राप्ते ब्राह्मणो म्रियते यदि॥कु
लातिथेयामासा सो कथं कुर्यात्तथाब्दिकं॥यस्मिन्राशौ गते सूर्ये विपत्तिः स्याद्द्विजन्मनः॥तस्मि
न्नेव प्रकुर्वीत पिंडदानोदकक्रिया॥मलमासे विपन्नानां सौरमासं समाश्रयेत्॥सत्यव्रतस्य मासो
पि षड्विंशपिंडक्रियादिषु॥अनित्यमनिमित्तं च त्याभिर्दिनायानि कर्माणि सगृहीतानि तेषु स्मृतयः॥
उदाहृयन्ते॥तत्र धमनुः॥अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च॥वेदव्रतवृषोत्सर्गचूडाक ॥३८॥
करणा मेखलाः॥मांगल्यमभिषेकं च मलमासे विवर्जयेत्॥बाले वा यदि वा वृद्धे शुक्रे वास्त

उपासते॥मलमासे चैतानि वर्जयेद्देवदर्शनमिति॥पैठीनसिर्ज्योतिःशास्त्रे पराशरपाठोरप्यय
मेव पाठः कौथुमिः॥अधिमासे न कर्त्तव्यं श्राद्धं संवत्सरादिके॥वर्षवृद्ध्यभिषेकादि कर्त्तव्यमधि
केन तु॥अधिमासे न कर्त्तव्यं श्राद्धमाभ्युदयं तथा॥तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते॥
सपिंडीकरणादूर्ध्वं यत्किंचिच्छ्राद्धिकं भवेत्॥इष्टं वाप्यथवा पूर्त्तं तन्न कुर्यान्मलिम्लुचे इति॥असं
क्रान्तप्रकरणे ज्योतिःशास्त्रे॥तत्र दत्तमदत्तं वा हुतं न हुतमेव वा॥सुजनेसमप्यं जपस्यात् नोपवासः
कृतो भवेत्॥न यात्रेनं विवाहं च न च वास्तुनिवेशनं॥न प्रतिष्ठां च देवानां प्रसादयामभूरुहे॥नीरि
रण्यं नवांसांसि कार्यमेदिति निश्चय इति॥इति स्मृत्यंतरेपि॥वापिकूपतडागादिप्रतिष्ठायज्ञकर्म
च॥न कुर्यान्मलमासे तु महादानव्रतानि चेति॥महादानानि तुलापुरुषादीनि षोडश विष्णुपुराणो
क्तानि॥कूर्मपुराणोक्तानि कनकादानि दश॥एवमन्यान्यपि निषेधवचनान्युदाहार्याणि॥मनुः॥
महादानानां नामानि॥आद्यं तु दानानां तुलापुरुषसंज्ञकं॥हिरण्यगर्भदानं च ब्रह्मांडं तदनंतरं॥
कल्पपादपदानं च गोसहस्रस्य पंचमं॥हिरण्यकामधेनुश्च हिरण्याश्वस्तथैव च॥हिरण्याश्व
रथस्तद्वत् हेमहस्तिरथस्तथा॥पंचलांगलकं तद्वद्धरादानं तथैव च॥द्वादशं विश्वचक्रं च तत

माध० तः कल्पलतात्मकं॥ सप्तसागरदानं च रत्नधेनुस्तथैव च। महाभूतघटस्तद्वत् षोडशाः प्रपरिकीर्तिताः॥
॥३५॥ कृमेत्के त्वन्यानि दश महादानानि। कनकाश्वतिला नागा दासी रथ महागृहाः॥ कन्याश्च कपिला धे
नुर्महादानानि वै दश। एवमन्यान्यपि निषेधवचनान्युदाहरणीयानि। उपाकर्मोत्सर्जनं चेत्यादि
ना शुद्धमास एव कर्तव्यानि। अत्र ज्योतिःपराशरः॥ रविणालंघितो मासश्चांद्रः ख्यातो मलि
म्लुचः॥ तत्र यद्विहितं कर्म उत्तरे मासि कारयेदिति। प्रजापतिः। उपाकर्म च हव्यं च कार्यं सर्पबलिं
तथा॥ उत्तरे नियतं कुर्यात् पूर्वं तन्निःफलं भवेदिति॥ हारीतोपि। उपाकर्म तथोत्सर्गकाम्यमुत्स
वमष्टका। मासवृद्धौ परे कार्यं वर्जयित्वा तु पैतृकं॥ ज्योतिःपितामहोपि। मासः कन्यागते भा
नावसंक्रान्तो भवेद्यदि। दैवं पित्र्यं तथा कर्म तुलास्थे कतुरक्षयमिति। अत्र कन्यागते सवितरि यो
संक्रान्तोसौ मलिनः॥ स आश्विनयुजः भाद्रपदान्ते कन्याप्रवेशात्। एवं च सति कन्यामुपजीव्य यद्विहि
तं दैवं पित्र्यं च तन्मलिन आश्वयुजे न कर्तव्यं किं तर्हि तुलासंक्रान्तियुक्ते शुद्धे आश्वयुजे॥ नन्वेवं
सति महालयाख्यापरपक्षश्राद्धस्यापि तुलामासे कर्तव्यता प्रसज्येत॥ तस्यापि कन्यामुप ॥श्रीव॥
जीव्य विहितत्वात्। तथा च पुराणे। कन्यागते सवितरि यान्यहानि तु षोडश क्रतुभिस्ता
नि तुल्यानि पितॄणां दत्तमक्षयमिति चैवं भा ॥३५॥

ता॥ सानुयुक्ता। मलमासे तन्निषेधात्॥ तथा च सत्यव्रतः। वर्षे वर्षे च यच्छ्राद्धं मातापित्रोर्मृतेहनि। मल
मासे न कर्तव्यं व्याघ्रस्य वचनं यथेति। सत्यतपाः। वर्षे वर्षे च यच्छ्राद्धं मृतेहे च मलिम्लुचे। कुर्यात्त
त्रप्रमीतानामन्येषामुत्तरत्रेति पैठीनसिः। मलमासे मृतानां यच्छ्राद्धं तु प्रतिवासरं॥ मलमासे तु क
श्रीराम र्तव्यं नान्येषां कदाचनेति। अतः शुद्धमासमृतानां मलमासे मृताहश्राद्धकर्तव्यता। विधानमयु
क्तं। नैष दोषस्तस्याभिधानस्य प्रथमाब्दिकविषयत्वात्॥ आब्दिके प्रथमं यस्यात्तत्कुर्वीत मलिम्लुच
इति स्मरणात्। तथा हारीतोपि। असंक्रान्तेपि कर्तव्यमाब्दिकं प्रथमं द्विजैः। तथैव मासिकं श्राद्धं स
सपिण्डीकरणं तथेति। लघुहारीतोपि। प्रत्यब्दं द्वादशे मासि कार्या पिण्डक्रिया सुतैः। क्वचित्त्रयो
दशेपि स्यादाद्यं मुक्त्वा तु वत्सरमिति। अत्र द्वादशे मासे संपूर्णे सत्यनन्तरदिने कार्यमिति व्या
ख्येयं। मासपक्षतिथिस्पृष्टे यो यस्मिन् म्रियतेहनि। प्रत्यब्दं तु तथाभूतं मृताहं तस्य तद्विदुरिति।
व्यासेनाब्दिकदिनस्य विशेषितत्वात्॥ केचित्तु आद्यं मुक्त्वा तु वत्सरमित्येतदन्तराद्यमासेपि योज
धित्वा॥ कार्त्तिकमासे प्रथमाब्दिकं आश्वयुजे कुर्वीतेत्युक्तं। मासपक्षेति वचनविरोधादिति
अधिमासविषये तु यथोक्तनित्यं पिपद्यते। तस्माच्छुद्धमासप्रमीतानां प्रथमाब्दिकं मलमासे

माध

द्रपदकृष्णपक्षस्य कंन्यासंक्रांतिस्पर्शित्वेन कन्योपजीवनोप्यपरपक्षस्यानुष्ठातुं॥ शक्यत्वा
त्॥ तथा च कार्ष्णाजिनिः॥ अंते चा यदि वा मध्ये यत्र कंन्यां रविर्व्रजेत्॥ सपक्षः पंचमः पूज्यः श्राद्धे
षोडशकं प्रति॥ इति बृहन्मनुरपि॥ मध्ये वा यदि वाप्यंते यत्र कन्यां रविर्व्रजेत्॥ सपक्षः कलहो
पूज्यः श्राद्धं तत्र विधीयत इति॥ किंचनेतदपरपक्षश्राद्धं कन्यामुपजीवतीत स्यामनादरस्म
रणात्॥ तथा च जातुकर्ण्यः॥ आषाढीमवधिं कृत्वा यस्यां पक्षस्तु पंचमः॥ श्राद्धकालः सवि
ज्ञेयः कंन्या गच्छतु वा न वेति॥ अथ कंन्यागते सवितरि वचने॥ कृष्णपक्षस्य कंन्यायोगे प्रश
स्तिः॥ अत एव क्रतुभिस्तानि तुल्यानीति॥ तत्रोक्तं॥ एवं सवितरि तुलास्थे कर्तुरितिवचनं महा
लयव्यतिरिक्तविषये॥ अथवा महालयस्यापि गौणकालनिषेधार्थं तदस्तु॥ तथा हि यः कंन्या
संक्रांतियुक्तो भाद्रपदकृष्णपक्षस्तस्य मु ख्यकालः॥ केनापि निमित्तेन तस्य मुख्यकालास
म्भवे यावद्वृश्चिकदर्शनं तस्य गौणकालः॥ स्मृतिसिन्धुः तत्रैकि कन्यायुक्ते मलिनाश्वयुजे तद्धि
धं कर्तव्यं मुलकन्यारहिते तुलोपेतोऽप्याश्वयुजे इतिव्याख्यायां तुलास्थे कर्तुरक्षयमिति वि
धीयते॥ एवमन्यास्वुत्तरमासेषु कर्तव्यविषयाणि वचनान्युदाहरणीयानि॥ तदेवं कार्यका

माध०
।।२८।।

यद्विवेकः पंचधा संपन्नः ।। तत्र किंचिन्मलमास एव कर्त्तव्यं ।। तद्यथा मलमासमृतानां तु यदा कदाचित्
प्रत्याब्दिकमन्यमासमृतानां प्रथमाब्दिकं च ।। किंचित्तु शुद्धमास एव कर्त्तव्यं ।। तद्यथा ।। उपाकर्मादि ।। किंचि
दुभयत्रापि कर्त्तव्यं ।। तथा आब्दिके कुंभादि ।। किंचिदुभयोरन्यतरस्मिन्निमित्तवशात्कर्तव्यं ।। तद्य
था ।। द्वादशाहसपिंडादिकं किंचिन्मलमासे वर्ज्यं ।। तद्यथा ।। अनित्यमनितं चेत्यादि ।
अथ मलमासस्यैवाद्विराषाढसंज्ञको विशेष उच्यते ।। तत्र वृद्धमिहरः ।। माधवाद्येषु षट्स्वेकमा
सि दर्शद्वयं यदा द्विराषाढः स संज्ञेयः शेते कर्कटके च्युते क्षि ।। इयं च द्व्याषाढसंज्ञा उत्तरभा
क्षिनि संवत्सरे हरिस्वापविवेकायोपयुज्यते ।। अत एव वृद्धमिहरः ।। मेषादिमिथुनांतेषु यदा दर्श
द्वयं भवेत् ।। अब्दांतरे तदा वर्षं मिथुनार्के हरिः स्वपेत् ।। कर्कटादित्रिके वापि यदा दर्शद्वयं भवेत् ।।
अब्दांतरे तदा वर्षं कर्कटार्के हरिः स्वपेत् ।। ।। इति मासनिर्णयः ।। ।। अथ पक्षनिर्णयः ।। स च
शब्दः पक्षपरिग्रह इत्यस्माद्धातोर्निष्पन्नः देवकार्यार्थं पितृकार्यार्थं वा पक्ष्यते परिगृह्यते यः काल
विशेषः स पक्ष इति ।। अथवा चंद्रस्य पंचदशकलानां आपूरणी या वा पंचदशा नाम परिगृह्यते ।।शिव।
स पक्षः ।। तथा च वाजसनेयिनः ।। चंद्ररूपस्य संवत्सरनिर्वाहकस्य प्रजापतेः कलापूरणा पक्ष ।।२८।।

माध०
॥३७॥

दभिनानात्॥ संकल्प्यमानप्रकल्प्यमानंउपकल्प्यमानंमुपक्लृप्तंक्लृप्तं॥ श्रेयोवसीयआयतसंभूतंदृष्टा
दृष्टादर्शाइतिचित्ररूपासुदर्शना॥ आप्यायमानाप्यायांसूनृतेराज्ञानाआपूर्यमाणापूर्यमा
णापूरयंतीपूर्णापूर्णमासीप्रस्तुतंविष्टुतंसंस्कृतंकल्याणंविश्वरूपंशुक्रममृतंतेजस्वितेजः
समिद्धंअरुणं॥ भानुमन्मरीचिमदभितपत्तपस्वत्॥ सुताशुन्वतिप्रसुतासूयमानाअभि
षूयमाणानिष्पयमाणापितीप्रप्रपासंपात्तृप्तिस्तर्पयंतीकांताकाम्याकामजातायुष्मतीका
मदुघेति॥ रूढेवायंपक्षशब्दःसचद्वेधाविभक्तमासस्यैकैकमर्धंब्रूतेपंचदशस्तोमनाम
कंनमाससमूहेनमध्येछिन्नस्यत्रिंशतोमनामकस्यमाससमूहस्यपूर्वोत्तरभागाभ्यांउ
त्पन्नत्वात्तयोःपूर्वापरपक्षत्वंतौचद्वौपक्षाचनुवाकेदेवानामसुराणांचक्रमेणासृष्टत्वा
त्तयोःप्रशस्तत्वाप्रशस्तत्वेतदेतत्सर्वंहास्त्रब्राह्मणेतैत्तिरीयाः॥ पठंतिप्रजापतिरकामय
तप्रजायेयेति॥ सतपोतप्यतसत्रिवृत्तंस्तोममसृजत॥ तंपंचदशंस्तोमोमध्यतउद
तृणात्॥ तोपूर्वपक्षश्चापरपक्षश्चाभवताम्॥ पूर्वपक्षंदेवाअन्वसृज्यंतअपरपक्षमन्व ॥श्री वा॥
सुरास्ततोदेवाअभवन्॥ अपराःसुराःयंकामयेतवसीयान्स्यादितितंपूर्वपक्षेयाजयेत्॥ ॥३७॥

वसीयानेवभवतीयंकामयेतंपापीयान्स्यादितितमपरपक्षेयाजयेत्॥ पापीयानेवभवति॥
तस्मात्पूर्वपक्षोपरपक्षात्करुण्यतरः॥ इतिवसीयान्वसुमत्तरः॥ पापीयान्द्रव्यहीनःकतृणां
शुभफलप्रापकत्वेनकरुणामतिशयेनार्हतिकारुण्यतरः॥ तदेवमस्मिन्प्रकरणेसंवत्सरा
यनऋतुमासपक्षानिर्णीताः॥ इतिश्रीमाधवीयकालनिर्णयेद्वितीयप्रकरणेपक्षनिर्णयः॥
अथतिथयोनिरूप्यंते॥ तत्रतिथिशब्दस्तनोतेर्धातोर्निष्पन्नःतनोतिविस्तारयतिवर्धमा
नांक्षीयमाणांवचंद्रकलामेकोयःकालविशेषःसातिथिः॥ यद्वायथोक्तकलयातन्यतइतिति
थिः॥ तदुक्तंसिद्धांतशिरोमणौ॥ तन्यतेकलयायस्मात्तस्मात्तास्तिथयस्मृताइति॥ एतदे
वाभिप्रेत्यस्कांदेपठ्यते॥ अमावास्यांशभागेनदेवीप्रोक्तामहाकला॥ संस्थितापरमामाया
देहिनांदेहधारिणी॥ अमादिपौर्णमास्यंतायाएवंशशिनःकलाः॥ तिथयस्ताःसमाख्या
ताःषोडशैववरानने इति॥ अयमर्थः॥ यामहामायाआधारशक्तिरूपादेहिनांदेहधारिणी॥
संस्थितासाचंद्रमंडलस्योपरिभागेषोडशभागेनपरिमितावृद्धह्रासधारिण्यमानाम्नीमहा
कलेतिप्रोक्ताक्षयोदयरहितानित्यातिथिःसंज्ञकेवद्धतराअपिपंचदशकलादिवसव्यवहारे

माधव० ॥३८॥

पिपयोगिन्यः क्षयोदयवत्यः पंचदश तिथयो भवंतीति तिथयः॥ षोडशैवेत्यविरुध्यं वचनमिति श्रु
तिस्तस्मिन्नर्थे पक्षनिर्णय एवोदाहृता॥ तस्य रात्रयया॰ एवपंचदश कला ध्रुवैवास्य षोडशीक
लेति एवं च सत्यत्र सामान्यविशेषरूपेणातिथिद्वैविध्यमुक्तं भवति तत्र येयममेत्यकला क्षयोदयवर्जि
ता ध्रुवा षोडशी कला तद्रूपकला तिथिसामान्यं॥ या चैस्य रश्मिविशिष्टा वृद्धिक्षयोपेता पंचदश कलास्ता
भिर्विशिष्टा कालविभागास्तिथिविशेषास्तासां च पंचदशानां कलानामेकैकां कलां ब्रह्मादयः प्राजापत्यंताः
पंचदश देवताः क्रमेणापिबंति॥ तत्र वह्निपेया कला प्रथमं पीयत इति प्रथमेत्युच्यते॥ तया युक्तः काल
विशेषः प्राथम्यवाचिना प्रतिपच्छब्देनाभिधीयते॥ एवं द्वितीयादीनां पंचदशानां कलानां तिथिनामा
मान्यवगंतव्यानि ताएताः कृष्णपक्षे तिथयो भवंति॥ पुनस्ताः कलाः पीतास्तेनैव क्रमेण तत्तस्
थानब्रह्मादिदेवताभ्यो निर्गत्य चंद्रमंडलं पूरयंति॥ ताभिर्युक्ताः कालविशेषाः शुक्लपक्षगताः
प्रतिपदाद्यास्तिथयो भवंति ब्रह्मादिदेवतानां कलापानं सोमासन्नोपठति॥ प्रथमां पिबते व
ह्निर्द्वितीयां पिबते रविः॥ विश्वेदेवास्तृतीयां चतुर्थं सलिलाधिपः॥ पंचमीं तु वषट्कारः ॥शिव॥
षष्ठीं पिबति वासवः॥ सप्तमीमृषयो देव्या अष्टमीमजएकपात्॥ नवमीं कृष्णपक्षस्य ॥३८॥

याकामनंतिस एष संवत्सरः प्रजापतिः षोडशकला तस्य रात्रय एव पंचदश कला ध्रुवैवास्य षोड
शी कला स रात्रिभिरेवा च पूर्यते अप च क्षीयत इति॥ तथैव पंचाग्निविद्यायां॥ दक्षिणोत्तरमार्ग
योः कृष्णशुक्लपक्षाश्च वपक्षेयापूरणात्मकाविष्टापूर्तकारिभिरुपासकैः प्राप्या पठति॥ यद्द
मे ग्राम इष्टापूर्ते तदत्तमित्युपासते॥ ते धूममभिसंभवंति॥ धूमाद्रात्रीं रात्रेरपक्षीयमाणपक्ष
मितिये सत्यमुपासते तेर्चिरभिरभिसंभवंत्यर्चिषे हरः हः आपूर्यमाणपक्षमिति च॥ तेत्ति
रयाश्चसा चित्रं चयने पूर्वेत्तरपक्षे प्रत्येकं पंचदशाहोरात्रात्मका वामनंति॥ संज्ञानं दशाद्दृष्टे
ति॥ एतावंतत्वाको पूर्वपक्षस्याहोरात्राणां नामधेयानि प्रसूतं विषूतं सुतान्न अवतीति॥ ए
तावनुवाकस्यैकापरपक्षस्याहोरात्राणां॥ नामधेयानीति॥ अयमर्थः॥ संज्ञानं विज्ञान
मित्येकोनुवाको मंत्रकांडे पठितस्तस्मिन्ननुवाके शुक्लपक्षस्याह्नां नामधेयानि पंचदशानुपूर्वा
कानि पठ्यंते॥ दर्शादृष्टेत्यपरोनुवाकः तत्र शुक्लपक्षस्य रात्रीणां नामधेयानि पंचदश स्त्रीलिं
गानि पठितानि॥ तथा प्रस्तुतं विषूतमित्येकोनुवाकः॥ सूतान्न सन्वतीत्यपरोनुवाकः॥ ताबु
भौ कृष्णपक्षविषयौ पूर्ववद्योजनीयौ॥ इति तिस्रानुवाका एवं श्रूयंते॥ संज्ञानं विज्ञानं प्रज्ञानं

यमः प्राश्नाति वै कलां ॥ दशमीं पिबते वायुः पिबत्येकादशीमुमा ॥ द्वादशीं पितरः सर्वे सं
संप्राश्नंति भागशः ॥ त्रयोदशीं धनध्यक्षः कुबेरः पिबते कलां ॥ चतुर्दशीं पशुपतिः पंचदशीं
प्रजापतिः ॥ निष्पीतः कलावशेषश्च चंद्रमा न प्रकाशते ॥ कला षोडशिका या तु अपः प्रविशते
सदा ॥ आमायां तु सदा सोम ओषधीः प्रतिपद्यते ॥ तमोषधिगतं गावः पिबंत्यंबुगतं च यत् ॥
तत्क्षीरममृतं भूत्वा मंत्रपूतं द्विजातिभिः ॥ हुतमग्निषु यज्ञेषु पुनराप्यायते शशी ॥ दिने दि
ने कलावृद्धिः पौर्णिमास्यां तु पूर्णता इति ॥ ज्योतिःशास्त्रे पि सिद्धांतशिरोमणिकारेणा
तिथिरेवं दर्शिता ॥ अर्काद्विनिःसृतः प्राचीं यद्यात्यसहरः शशी तच्चांद्रमानमंशैस्तु ज्ञेया द्वाद
शभिस्तिथिरिति ॥ अयमर्थः ॥ अधःप्रदेशवर्ती शीघ्रगामी चंद्रः ऊर्ध्वप्रदेशवर्ती मंदगा
मी सूर्यः ॥ तथा च सति तयोर्गतिविशेषवशाद्दर्शे चंद्रमंडलमन्यूनमनतिरिक्तं सूर्य
मंडलस्याधोभागे व्यवस्थितं भवति तदा सूर्यरश्मिभिः सा कल्येनाभिभूतत्वाच्चंद्र
मंडलमीषदपि न दृश्यते उपरितने दिने शीघ्रगत्वात्सूर्याद्विनिःसृतः शशी प्राचीं याति

माधव० ॥३९॥

त्रिंशांदंशोपेते राशौ द्वादशभिरंशैः सूर्यमुल्लंघ्य गच्छति तदा चंद्रस्य पंचदशसु भागेषु प्रथमभागो दर्श
न योग्यो भवति सोयं भागः प्रथमकलेत्यभि धीयते इति कलानिषात्तिः॥ परिमितकालः प्रतिपत्ति
थिर्भवति॥ एवं द्वितीयादितिथिष्ववगंतव्यं इति तदेतद्विष्णुधर्मोत्तरे विस्पष्टमभिहितं॥ चंद्रार्क
गत्या कालस्य परिछेदो यदा भवेत्॥ तदा तयोः प्रवक्ष्यामि गतिमाश्रित्य निर्णयं॥ भगणेन समग्रे
ण ज्ञेया द्वादशराशयः॥ त्रिंशांशाश्च तथा राशेर्भाग इत्यभिधीयते॥ आदित्याद्विप्रकृष्टस्तु भाग
द्वादशकं यदा॥ चंद्रमाः स्यात्तदा राम तिथिरित्यभिधीयते इति॥ मासि यद्द्वादशभिर्भागैः सूर्यमुल्लं
घितवप्रथमाच्चंद्रकालाशुगद्धयोपेता सूक्ष्मरेखाकारांशौक्ल्यमीषदुपयाति॥ उत्तरोत्तरद्दिनेषु
सूर्यमंडलविप्रकर्षतारतम्यानुसारेण शौक्ल्यमुपचीयते॥ अनयैव रीत्या सन्निकर्षतार
तम्यानुसारेणामेवकत्वमुपचीयते॥ तदुक्तं सिद्धांतशिरोमणौ॥ उपचयमुपयाति शौक्ल्य
मिंदोस्त्यजत इव समवृजतश्चमेर्वत्व॥ जलमये जलजस्य गोलकत्वात्प्रभवति तीक्ष्णवि ॥शिव॥
षाण॥ वरूपता स्येति॥ सूर्याच्चंद्रमसोर्योः सन्निकर्षविकर्षौ तयोरवसानं दर्शपौर्णमस्योः ॥३९॥

रश्मीन्चगर्गेणादर्शिता ॥ सा खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणं ॥ धर्माधर्मवशादेव तिथिस्त्रे
धा विवर्त्तते खर्वा समतिथिः ॥ दर्पो वृद्धियुक्ता हिंस्रा क्षययुक्ता न स्ये तस्य त्रैविध्यस्य परित्यक्ते न विशेषेण
तिथिः संपूर्णा खंडा चेति द्वैविध्यमापद्यते ॥ तत्र संपूर्णा स्कंदपुराणे दर्शिता ॥ प्रतिपत्प्रभृतयः सर्वा उ
दयादुदयाद्रवेः ॥ संपूर्णा इति विख्याता हरिवासरवर्जिता इति ॥ हरिवासर एकादशी ॥ या तु नोक्तलक्षण
सा खंडा तिथिः ॥ तत्र संपूर्णायां विधिनिषेधयोर्नास्ति संदेहः ॥ खंडतिथौ तु विधिनिषेधनिर्णयः ॥ प्रार
भ्यमाणः ॥ तत्र गार्ग्ये निमित्तं कालमादाय वर्त्तिर्विधिनिषेधयोः ॥ विधिः पूज्यतिथौ तत्र निषेधः का
लमात्रके ॥ तिथीनां पूज्यता नाम कर्मानुष्ठानयोग्यता ॥ निषेधस्तु निवृत्या तां कालमात्रमपेक्षत इ
ति एवं च सति खंडतिथौ पूज्यत्वं निर्णेतव्यं भवति ॥ तत्र प्रतिपदमारभ्य पंचदश्यंतास्तिथयः क्रमे
ण निर्णीयते ॥ तत्र प्रतिपच्छब्द उपक्रमे वर्त्तते चांद्रः पक्षो मासो वा प्रतिपद्यते प्रारभ्यते यस्यां तिथौ सा
तिथिः प्रतिपत् ॥ प्रारंभवाचित्वं च प्रतिपच्छब्दस्य बह्वृचब्राह्मणारण्यकसूत्रेषु प्रयोगादवगम्यते ॥
तथा च श्रुतिः ॥ आत्वा रथं यथोतय इदं वसो सुतमंध इति मरुत्वतीयस्य प्रतिपदनुचराविति अय

मर्थः ॥ मरुत्वतीयं नाम किंचिच्छस्त्रं तस्यासार्थमित्ययं मंत्रः प्रतिपत्प्रथमं पीठ्यः ॥ इदं वसो सुतमं
ध इत्ययं मंत्रोनुचरः पश्चात्पठ्यत इति ॥ तथा तैत्तिरीयाश्वमेधब्राह्मणमामनंति ॥ स्ववाजसात
य इत्यनुष्टुप् ॥ प्रतिपद्भवति ॥ तथा तदेव दर्शपौर्णमासब्राह्मणे पठंति ॥ सामिधेनीरनुवक्ष्यते ॥
ता व्याहृतिः पुरस्ताद्दध्याद्ब्रह्मैव प्रतिपदं कुरुत इति सा च प्रतिपत्तिथिः यदा सूर्योदयमारभ्य पुन
रुदयपर्यंता भवति तदा शुद्धत्वात् प्रतिपद्विहितं सर्वं निःशंकेन तत्रानुष्ठेयं ॥ शुद्धत्वं च नारदीयपु
राणे दर्शितं ॥ आदित्योदयवेलायां आरभ्य षष्टिनाडिकाः ॥ या तिथिः सा तु शुद्धा स्यात् सर्वतिथ्यांप्य
यं विधिरिति ॥ सूर्यसिद्धांतेपि ॥ सर्वा ह्येताश्च तिथयः उदयादोदयं स्थिताः ॥ शुद्धा इति विनिश्चेया
षष्टिनाड्यो हि तिथिरिति यदा तु सा प्रतिपत् खंडतिथिः सती पूर्वोत्तरयोर्दिनयोर्दर्शद्वितीयाभ्यां यु
ज्यते ॥ तदा द्वयोर्युक्तायाः पूज्यत्वात्तत्रैवानुष्ठेयं तत्पूज्यत्वं पैठीनसिराह ॥ पंचमी सप्तमी चैव दश
मी च त्रयोदशी ॥ प्रतिपन्नवमी चैव कर्तव्या संमुखा तिथिरिति ॥ संमुखत्वं च स्कंदपुराणे विवेचितं ॥
संमुखे नाम सायाह्नव्यापिनी दृश्यते यदा ॥ प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी ॥ व्यासोपि प्र
तिपत्सेव विज्ञेया या भवेदापराह्णिकी ॥ दैवं कर्म तथा ज्ञेयं पित्र्यं च मनुरब्रवीत् ॥ इति सायाह्नापराह्ण

माध०
॥४९॥

दयः कालविशेषाः सावनदिवसं तत्तस्याक्को भागभेदाद्वंगतव्याः सवर्द्दिवसो विष्णुधर्मोत्तरेऽभि
मा हितः। लघ्वक्षरसमा मात्रा निमेषः परिकीर्तितः। अतः सूक्ष्मतरः कालो नोपलभ्यो भृगूत्तम॥ नोप
लभ्यं यावदयं सुसूक्ष्मं परमाणुतः॥ द्वौ निमेषौ त्रुटिर्ज्ञेया प्राणो दश त्रुटिः स्मृतः॥ विनाडिका तु प्रोष
ट्प्राणा तत्षष्ट्या नाडिका स्मृता। अहोरात्रं तु तत्षष्ट्या नित्यमेतत्प्रकीर्त्तितं। त्रिंशन्मुहूर्ताश्च तथा अ
होरात्रेण कीर्त्तिताः॥ तत्र पंचदश प्रोक्ता राम रात्रिर्दिवा तथा॥ उत्तरं तु यदा काष्ठां क्रमादाक्रमते र
विः॥ तदा तदा भवेद्वृद्धिः दिवसस्य महाभुज॥ दिवसश्च तथा राम वृद्धिं समधिगच्छति॥ तदाश्रित
मुहूर्तानां तथा वृद्धिः प्रकीर्त्तिता॥ दिनवृद्धिर्यदा राम दोषाहानिस्तदा भवेत्॥ तदाश्रितमुहूर्तानां व
द्धिर्ज्ञेया तथा तथा॥ रात्रिः क्षिप्यते तावद्दियावत्प्रवर्त्तते॥ रात्र्याश्रितमुहूर्तानां हानिर्ज्ञेया तथा तदा॥
दक्षिणां च यदा काष्ठां क्रमते रविः॥ दिवसस्य तदा हानिर्ज्ञातव्या तावदेव तु॥ क्षिप्यं ते तस्य हानेश्च
तन्मुहूर्तास्तथैव च॥ त्र्याश्रिताश्च वर्धंते रात्रिवृद्धिस्तथैव च॥ यदा मेषहसंज्ञं तु तुलां च प्रतिपद्यते।
समरात्रिंदिवः कालो दिनरात्र्यस्य वाचक इति॥ कास्य इति यावदत्र ये मुहूर्ता अभिहितास्तेषां नामा
नि॥ श्रुतिः ज्योतिःशास्त्रस्मृतिषु विविधानि दर्शितानि॥ तत्र श्रुतिं तावत् तैत्तिरीयाः पठंति॥ चित्रः के ॥टीका॥
तुः दाता वदाता सविता प्रसविताभिशास्तानुमंता चेति॥ एतेनुवाको मुहूर्तानां नामधेयानीति॥ अत्र ह्रा ॥४९॥

संपद्यंते॥ तदा ह्यो भिल्ल॥ यः परो विप्रकर्षः सूर्याचंद्रमसोः सा पौर्णमासी यः परः सन्निकर्षः
सामावास्येति तत्र चंद्रकलानां प्रसूर्यप्रवेशनिर्गमौ प्रतीयते॥ सोमोपत्तौ वऽह्न्यादिदेवता
सु नायं दोषः॥ अस्मदादिदर्शनादर्शनापेक्षया ज्योतिःशास्त्रस्य प्रवृत्तत्वात् सोमोपत्तौ तु व
ह्न्यादिदेवतानां तत्तत्कालप्रयुक्तः स्तृप्तिर्विवक्षिता तत्र यदि सूर्यप्रवेशनिर्गमौ यद्विवां वह्न्यादिदे
वतासु सर्वथापि कलापान प्रयुक्तैवतृप्तिस्तदापि कलाप्रयुक्ता एवं प्रतिपदादितिथयः ननु साव
नदिवसेषु सौरदिवसेषु च निर्णयमुपेक्ष्य चांद्रतिथिष्वेव कुतो निर्णयो द्यमरहितिं चेत्॥ संदेहसद्भा
वादिति ब्रूमः॥ न खलु सौरसावनदिवसयोः संदेहोस्ति नियतपरिमाणत्वात्॥ तच्च ब्रह्मसिद्धां
ते ददर्शितं॥ सावनं स्यादहोरात्रमुदयोदयाद्रवेः॥ रवेस्त्रिंसस्तुराश्यंशतिथि संयोगा
णं द वदंति॥ एकस्मिन् राशौ यावंतं कालं रविर्वर्तते तावतः कालस्य त्रिंशोयो यमंशः स सौरदि
वसः तिथिरेका कलातत्संभोगाद्दोयवता कालेन निष्पद्यते॥ तदेव चांद्रं दिनं॥ न चात्र सौरसाव
नयोरिव चंद्रेपि दिनेः संदेहाभावः शंकनीयः ह्रास। वृद्धिविशेषेण संदेहसद्भावात्॥ ह्रास

भ्यां पदाभ्यां एकैकस्यानुवाकस्य प्रतीकमुक्तं ॥ तथा चत्वारोनुवाकाः संपद्यते ॥ तत्र प्रथमे शुक्लप
क्षस्याह्नां मुहूर्ताः द्वितीये तद्रात्रेः तृतीये कृष्णपक्षगतस्याह्नश्चतुर्थे तद्रात्रेरिति विवेकस्तेषां नु
वाका एवं श्रूयंते ॥ चित्रः केतुः प्रभानाभाक्संभान् ज्योतिष्मांस्तेजस्वानः ॥ तपस्तपन्नभितपन् रोचनो
रोचमानः शोभनः शोभमानः शंभुः शंभुमानो वामः अभिशास्तानुमंतानंदो मोदः आसादयन्नि
षादयन्नसंसादनयः ॥ संसंनः सन्नः अभूर्विभुः प्रभुः शंभुर्भुव इति ॥ एतेषु मुहूर्त्तेषु एकैकमुहूर्त्तस्य पंच
दश भागाः ॥ सूक्ष्ममुहूर्ताः तथा च तदेव ब्राह्मणं ॥ इदानीं तदानीमिति ॥ एते वै मुहूर्त्ता नाम मुहूर्त्ता इति ॥
इदानीमित्यादिकोनुवाको मंत्रकांडे पठ्यते ॥ इदानीं तदानीमेतर्हि क्षिप्रमजिरमाशुर्निमेषः फण
द्रवन्नभिद्रवन् त्वरस्त्वरमाणः आशुराशीयोजव इति ॥ ज्योतिःशास्त्रे त्वहोरात्रयोस्त्रिंशन्मुहूर्त्ता
नां नामानि कश्यपेनोक्तानि ॥ गौरीवल्लभसर्पमित्रपितरोवस्वंबुविश्वे ॥ ह्वया ब्रह्मांभोरुहसंभवेंद्र
हुतभुग्देवेंद्रानक्तंचराः ॥ तोयेशार्यमयोनयो दश तथा पंच क्षणा वासरे ॥ रुद्राक्षाहिर्बुध्न्य ॥ पू
षाश्विनः स्युर्यमाग्निधातृचंद्रादितीज्याः विष्णुर्भानुस्त्वाष्ट्रवाता मुहूर्त्ता रात्रौ क्रूरास्त्वंतकाजाभि
रुद्रा इति ॥ ॥ स्मार्त्तानि तु नामानि पुराणोदर्शितानीति ॥ रौद्रश्वेतश्च मैत्रश्च तथा आरभटस्सजाः ॥

माध० ॥४२॥

सावित्रो वैश्वदेवश्च गंधर्वः कुतपस्तथा ॥ रौहिणस्तिलकश्चैव विभावो निर्ऋतिस्तथा ॥ शांबरो विजयश्चैव वभे
दः पंचदश स्मृत इति ॥ एते पंचदश सूर्योदयादारभ्य क्रमाद्दिवामुहूर्ताः ॥ तथा रात्रिमुहूर्ताः शंकर
अक्षिपादश्च तथा हिर्बुध्न्यमैत्रकौ ॥ आश्विनो याम्यद्वैयौ वैधात्रश्चांद्र एव च ॥ अदितेयोऽथ जैत्रश्च वैष्ण
वः सौर एव च ॥ ब्रह्मो नाभस्मृतश्चैव मुहूर्ताः क्रमतो निशीति ॥ यथोक्तनानाविधानमेकतमस्त्रिंशन्मु
हूर्ते ॥ पेतस्य सावनाहोरात्रस्य यदहः पंचदशमुहूर्तात्मिकं तस्याहोभागाः ॥ अपराह्णसायाह्नप्रातरा
दयः ॥ ते चान्ह्नो भागास्तमभेदेन पंचधा विकल्प्यंते ॥ द्वेधा त्रेधा चतुर्धा पंचधा पंचदशधा चेति विभ
ज्यत इति ॥ पंचमभेदः तत्र द्वेधा भागः स्कंदपुराणे प्रदर्शितः ॥ आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः पर
इति ॥ एतदेवाभिप्रेत्य मनुराह यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते ॥ तथा श्राद्धस्य पूर्वाह्णादपरा
ह्णो विशिष्यत इति ॥ त्रेधा विभागः स्कंदपुराणे दर्शितः ॥ ऊर्ध्वं सूर्योदयात्प्रोक्तं मुहूर्त्तानां तु पंचकं ॥ पू
र्वाह्णः पंचकं प्रोक्तो मध्याह्नस्तु ततः परः ॥ अपराह्णस्ततः प्रोक्तो मुहूर्त्तानां तु पंचकमिति ॥ शातातपोपि
तस्मा अह्नस्त्रे अहद पूर्वाह्णे देवा अशनमभिहरंति मध्यंदिने मनुष्या अपराह्णे पितर इति ॥ एतमेव ॥शिव॥
विभागमभिप्रेत्य सहस्रसंवत्सरसत्रब्राह्मणे समाम्नायते ॥ ऋग्भिः पूर्वाह्णे दिवि देव ईयते ॥ यजुर्वे ॥४२॥

माध०
॥४३॥

वितुः प्रातः॥ मित्रस्य संगवः॥ बृहस्पतेर्मध्यंदिनः भगस्यापराह्णः वरुणस्य सायमिति॥ छंदोगाश्च
सप्तभक्त्युपेतस्य साम्नादित्यात्मनोपासनं वक्तुं आदित्यस्य संबंधिनः कालभेदान् विभज्य तेषां
हिंकारादिसप्तभक्तिरूपतां विवक्षमाण एवमामनंति॥ तस्य तु पुरोदयं स हिंकारः अथ यत्प्रथमो
दिते स प्रस्तावः॥ अथ यत्संगवेलायां स आदिः अथ यत्संप्रति मध्यंदिने स उद्गीथः॥ अथ यदूर्ध्वं
मध्यंदिनात् प्रागपराह्णात् स प्रतिहारः॥ अथ यदूर्ध्वमपराह्णात् प्रागस्तमयात् स उपद्रवः॥ अथ य
त्प्रथमास्तमिते तन्निधनमिति॥ वाजसनेयिनोप्येवमामनंति॥ आदित्यो वै सर्वऋतवः स यदै
वोदेत्यथ वसंतो यथा संगवोथ ग्रीष्मो यदा मध्यंदिनोथ वर्षा यदापराह्णस्तदा वर्षा यदास्तमे
त्यथ हेमंत इति॥ पंचदशधा विभागः॥ शंखेन दर्शितः रुद्रश्चैव तथा मैत्रश्च तथा सालकटः स्मृ
तः॥ सावित्रश्च जनपंतश्च गांधर्वः कुतपस्तथा॥ रोहिणश्च विरिंचश्च विजयो नैर्ऋतस्तथा॥ म
हेंद्रो वरुणश्चैव भेदः पंचदश स्मृतः॥ तत्र पंचधा विभागपक्षस्य बहुश्रुतिस्मृतिसंबंधित्वात् प्रा
येणैवमेव पक्षमाश्रित्य विधिनिषेधशास्त्राणि प्रवर्तंते॥ सूर्यो ज्योतिः ज्योतिः सूर्यः स्वाहेति प्रात
रिति श्रुतौ प्रातःकालमुपजीव्य तत्कालीनस्य होमस्य मंत्रविशेषो विहितः॥ स्मृतावपि संध्या ॥ त्रिव ॥
मुपास्य विधिवत् प्रातर्होमं समाचरेदिति प्रातर्होमांगत्वेन प्रातःकाल आश्रितः संगवस्तु ॥४३॥

कात्यायनेन व्यवहृतः॥ संधिश्चेत् संगवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः॥ सा पौर्णमासी विज्ञेया सद्यस्का
लविधौ तिथिरिति॥ बौधायनेन मध्याह्नो व्यवहृतः॥ सायाह्नव्यवहारस्तु पूर्वमेव सुमंतुवाक्ये इति
वचनोदाहृतः॥ त्रेधाविभागस्तु सोमयागे सवनत्रय उपयुज्यते॥ यथोक्तेषु पंचसु कालेषु यानि
विहितानि कर्माणि तानि द्वयोर्द्वयोः पारार्थ्येन द्वयं कृत्वा तयोर्गौणकाल अप्यनुष्ठानाय द्विधा
विभागो दर्शितः॥ चतुर्धाविभागस्तु प्रकरणबलाद् भिन्नस्य तत्तद्विशेषेषु द्रष्टव्यं॥ पंचदश
धा विभागो मुहूर्तविशेषोपजीवनेन विधिनिषेधा ज्योतिःशास्त्रेणाद्रष्टव्याः॥ एवं च सति प्रकृते
पंचसु हो भागेषु पंचमः सायाह्नभागं व्याप्य ततः पूर्वं चतुर्थमपराह्णभागं या प्रतिपत् संस्पृशति ता
दृशी पूर्वविद्धोपवासे पूज्या अत्र तिथीनां वेधः पैठीनसिना दर्शितः॥ पक्षद्वये पि तिथयः स्तिति
पूर्वा तथोत्तरा॥ त्रिभिर्मुहूर्तैर्विध्यंति सामान्योयं विधिः स्मृत इति॥ पूर्वेद्युरुदयानंतरं ममावा
स्या त्रिमुहूर्ता चेत् सा प्रतिपदं विध्यति॥ परेद्युरस्तमयात्प्राक् द्वितीया त्रिमुहूर्ता चेत् सा पूर्वां
प्रतिपदं विध्यतीति॥ एवमुभयतो विद्धयोर्दिनद्वयवर्तिन्योः प्रतिपदोर्मध्ये किं पूर्वा ग्राह्या उत्तरे
त्तरेति विचार्यते॥ तत्र पूर्वेयाः ग्राह्यत्वं पैठीनसि स्कंद व्यासा आहुः॥ तद्वचनानि पूर्वमुदाहृ

माध०
॥४४॥

तानि निगमेप्येवमेवोक्तं युग्माग्नि युगभूतानां षण्मुन्यो वसुरंध्रयोः॥ रुद्रेणद्वादशीयुक्ता चतुर्दश्याश्च
पौर्णिमा॥ प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलं॥ एतद्व्यस्तं महादोषं हंति पुण्यं पुराकृत
मिति युग्मं द्वितीया अग्निस्तृतीया युगं चतुर्थी भूतं पंचमी॥ षट्षष्ठी मुनिः सप्तमी॥ वसुरष्टमी॥
रंध्रं नवमी॥ रुद्र एकादशी॥ अत्र युग्मादिसप्त युग्मेषु पूर्वतिथिरुत्तरविद्धा ग्राह्या॥ उत्तरा पूर्व
विद्धेत्यर्थः भवति॥ स्मृत्यंतरेपि॥ एकादशी तथा षष्ठी अमावास्या चतुर्थिका॥ उपोष्याः परसं
युक्ताः परा पूर्वेण संयुता इति॥ अन्यत्रापि षष्ठ्यष्टमी आमावास्या कृष्णपक्षे त्रयोदशी॥ एताः प
रयुताः पूज्याः परा पूर्वेण संयुता इति॥ शंकरगीतायां॥ एकादश्यष्टमी षष्ठी द्वितीया च चतुर्थिका॥
चतुर्दश्यप्यमावास्या उपोष्याः स्युः परान्विता इति॥ एतेषु सर्वेषु वचनेषु प्रतिपदः पूर्वविद्धायाः पूज्य
त्वं प्रतीयते॥ एतस्यैव पक्षस्यानुग्राहकमुत्तरविद्धायां निषेधो बृहद्वसिष्ठेन स्मर्यते॥ द्वितीया प
चमी वेधाद्दशमी च त्रयोदशी॥ चतुर्दशी चोपवासे हन्युः पूर्वोत्तरतिथिरिति॥ द्वितीयादयश्च वेधे
न पूर्वोत्तरां च तिथिं हन्युरित्यभिधानादुत्तरा प्रतिपदुपवासे निषिद्धा भवति॥ आपस्तंबस्तु उत्त ॥त्रि का।
रविद्धायाः प्रतिपदः पूज्यत्वमाह॥ प्रतिपत्सद्वितीया स्यात् द्वितीया प्रतिपद्युतेति॥ भविष्योत्तरे
प्ययमेव पाठः॥ अत्रेदं चिंत्यते किमुत्तरविद्धा प्र ॥४४॥

रतिष्ठति॥ मध्यमह्नः सामवेदेनास्तमये हीयते वेदैरशून्यस्त्रिभिरेति सूर्य इति श्रुत्यंतरेपि॥ पूर्वा
ह्णे वै देवानां मध्यंदिनो मनुष्याणां परा ह्णः पितॄणामिति॥ चतुर्धा विभागमाह गोभिलः॥ पूर्वाह्णं प्र
हरं सार्धं मध्याह्नं प्रहरं तथा॥ आ तृतीयादपराह्णः सायाह्नश्च ततः परमिति॥ पंचधा विभागं
व्यास आह॥ मुहूर्तत्रितयं प्रातः स्तावानेव तु संगवः॥ मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णोपि तादृशः॥
सायाह्नस्त्रिमुहूर्तः स्यात्सर्वकर्मबहिष्कृत इति॥ व्यपराह्णे रोपिलेखा प्रभृत्यथादित्यान्मुहूर्तास्त्र
य एव तु॥ प्रातस्तु स स्मृतः कालो भागश्चाह्नः स पंचमः॥ संगवस्त्रिमुहूर्तोथ मध्याह्नस्तत्स
मः स्मृतः॥ ततः स्त्रयो मुहूर्ताश्च अपराह्णोभिधीयते॥ पंचमोथ दिनांशो यः स सायाह्न इति स्मृ
त इति॥ एतमेव विभागमभिप्रेत्य केचिन्मंत्राः संगवः कालं व्यवहारेरतमंत्रं बहृचा आश्विन
सूक्ते आमनंति॥ उतायातं संगवे प्रातरह्नो मध्यंदिन उदिता सूर्यस्य॥ दिवा नक्तमवसा शंत
मेन नेदानीं पीतिरश्विना ततानेति॥ अस्मिन्मंत्रे प्रातः संगवमध्यंदिनानां च संज्ञाभिर्व्यवहृतत्वा
दवशिष्टयोर्भागयोरप्येतत्त्रितयमुपलक्षणं द्रष्टव्यं॥ तैत्तिरीयब्राह्मणेपि॥ यथोक्तानां पंचानां
प्रातरादीनां भागानां मध्यवर्तिषु चतुर्षु संधिषु निषोमो न्याय्योस्यति राज्ञाख्यानां चतुस्तुणं
– – – – सोमसंस्थानां निर्माणं वक्तुं यथोक्तं पंचभागाः साधिष्ठा तद्देवाः समाम्नाताः देवस्य स

ज्यत्ववचनेनप्रतिपन्मात्रंविषयीक्रियते॥ किंवा प्रतिपद्विशेषः॥ यदापिप्रतिपत्विशेषस्त
दापिकिमुपोष्यत्वेपूर्वदिनेऽपराह्णकत्वंवातत्रैवासायाह्निकत्वंवातत्रैवापराह्णसायाह्नोभ
यान्वापिवेधंवाबलिदिनशुक्लपक्षत्वंकिंवानुपवासव्यतिरिक्तापरासव्यतिरिक्तानेतरत्वंवाशु
क्लपक्षादिनिखिलप्रतियोगिराहित्यंवा॥ ननुसंशयःसर्वत्रकोटिद्वयमवलंबते॥ कोटिद्वयावलंबी
विमर्षःसंशयइतिहितार्किकडिंडिमः॥ अतोबहुपक्षोपन्यासोनयुक्तः॥ मैवं॥ प्राणादिकरणवदुपप
त्तेः॥ अस्त्युत्तरमीमांसायांप्रथमाध्यायप्रथमपादावसानेप्राणशब्दंविषयीकृत्यप्रवृत्तमधिकर
णंतस्यचसंग्राहकश्लोकौभवतः॥ प्राणास्मीत्यत्रवास्विंद्रजीवब्रह्मसुसंस्थितः॥ चतुर्णांलिंगसद्भावा
न्नूपर्वपक्षस्त्वैहेलिकः॥ ब्रह्मणोनैकलिंगानितानिसिध्यंत्यनन्यथा॥ अन्येषामन्यथासिद्धेर्व्या
ख्येयंब्रह्मनेतरदिति॥ अयमर्थः॥ कौषीतकिब्राह्मणेप्रतर्दनायोपसन्नायेंद्रएवमुपदिदेशब्रा
ह्मणोऽस्मिप्रज्ञात्मातमामायुरमृतमित्युपास्स्वेति॥ तत्रसंशयः किंप्राणशब्देनउच्छ्वासनिश्वास
कारीवायुर्विवक्षितः उतेंद्रशब्दाभिधीयते॥ सहस्राक्षत्वाद्याकारवान्देवताविशेषः अहोस्वि
त्कार्यकारणाध्यक्षोजीवः अथवापरंब्रह्मज्योति॥ संतिचात्रप्रकरणेपक्षचतुष्टयगमकानिस

तुष्टयं लिंगानि ॥ इदं शरीरं परिगृह्योत्थापयतीति प्राणवायोर्लिंगं ॥ अस्मीत्यहंकारवादो वक्तुरिंद्रि
यस्य देवताविशेषस्य लिंगं ॥ न वाचं विजज्ञासीत वक्तारं विद्यादित्यादिना श्रोतृत्वादिकं जीव
लिंगं ॥ आनंदोऽजरोऽमृत इत्यादिकं ब्रह्मलिंगं तत्र चतुर्णां ब्रह्मलिंगानां समबलत्वादिच्छाया
यत्किंचित्स्वीकर्तव्यमिति पूर्वपक्षः ॥ आनंदादीनां ब्रह्मलिंगानां अनेकत्वात्तेषां च वाक्यशेषे कथंचि
द्योजयितुमशक्यत्वाच्छरीरोत्थापनादीनां वाय्वादिलिंगानां तत्तदुपाध्युपहिते ब्रह्मण्यसुसंपा
दयित्वात् ॥ ब्रह्मैवात्र प्राणशब्देन विवक्षितमिति सिद्धांत इति ॥ पूर्वमीमांसायांमपि षष्ठाध्याय
स्य सप्तमे पादे सहस्रसंवत्सराधिकरणस्य संशयपक्षाः षष्ठे उपन्यस्ताः ॥ किमस्मिन्सत्रे दीर्घायु
षां गंधर्वादीनां अधिकारः ॥ उत रसायनसिद्धानां मनुष्याणां अधिकारः ॥ अथ वा पितृपुत्र
पौत्रादिपरंपरारूपस्य कुलस्य ॥ अहोस्विदस्मादेव शास्त्रादत्र प्रवृत्तस्य सहस्रं वत्सरमायुर्भ
विष्यति किंवा सार्धद्विशतानां पुरुषाणामधिकारः अथ संवत्सरोक्तिर्मासपरा ॥ अथवाहा
दशात्र परा वा दिनपरा वेति ॥ एवं वसतिसंशयस्यैककोटिकत्वं तार्किकैर्यच्चिंत्यते तो नतु बहुकोटि ॥शिव॥
त्वं नन्वेवमपि यथोक्तानां पक्षाणां प्राणाधिकरणन्यायेन व्यावर्तकानि लिंगानि वक्तव्यानीति ॥४५॥

माध० ।।४९।।

सामेव तिस्रयामव्यापिनां त्रिभिरभावे स्त्र्यहरतिथौ पक्षत्रयं संपद्यते ननु पूर्वतिथावपराह्णव्याप्तौ सत्यानं
तरायकतया सायाह्नव्याप्तेरवश्यंभावित्वेन पृथक्कृतदभिधानं निरर्थकमिति चेत् । किमिदं केव
लसायाह्नाभिधायिवाक्येदयसिद्धिर्वोभयंभिधायिवाक्येनाउभयः ।। यदाविनैवापराह्णव्याप्तिं साया
ह्नमात्रं व्याप्यते ।। तदापि पूर्वविधायाः प्रशस्तता यावक्रव्याप्ता[illegible]त् । द्वितीये वैश्वानरेष्टिन्यायेनायनु
त्यानुवादो भविष्यति । स च न्याय उद्भिदादिपादे व्यवस्थितः ।। काम्येष्टिकांडे श्रूयते ।। वैश्वानरं द्वादश
कपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यं नवकपालस्त्रि
वृतैवास्मिंतेजो दधाति ।। यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवा
स्मिन्निंद्रियं दधातीति यद्द्वादशकपालो जगत्यैवास्मिन्पशून्दधातीति अत्र द्वादशकपालेष्टेर्ब्रह्मवर्चस
ादिफलविशेषायाष्टाकपालादिगुणविध्यधिरिति पूर्वः पक्षः उत्पत्तिशिष्टद्वादशकपालेनावरोधे स
मुत्पन्नशिष्टानामष्टकपालादीनामंत्रावकाशाभावात् दुपक्रमोपसंहारांतर्गतत्वेन तेषां विध्येतरा
भावाच्चावयवैरष्टाकपालादिभिः ।। नांतरायिकसिद्धैरवंयविनो द्वादशकपालस्य स्तुतिरिति रा ।।टीका ।।४६।।
द्धांतः ।। एवमत्रापि यदा सायाह्नव्यापिन्यपि च गृह्यते चेत्तदापराह्णव्यापिन्याग्रहणं किमु वक्तव्यमि

तिनांतरायकसिद्धाया सायाह्नव्याप्त्याप्रापराह्णव्याप्तिः प्रशस्यते स्कंदपुराणे ।। बलिदिना
भिधायायाः कार्तिकशुक्लप्रतिपदः पूर्वविद्धत्वाभिधानादितरा सर्वा प्रतिपदुत्तरेत्येषः पक्षः प्रतीयते ।।
शुक्लपक्षोपवासापराह्णसायाह्नद्वबलिदिनानां पंचानां समूहस्य पूर्वतिथिप्रयोजकत्वे सत्यंतिमः प
क्ष उदेति ।। एवं बहुविधसंशयसत्तिविषये निर्णयं ब्रूमः ।। यद्यपि द्वितीयाप्रतिपद्युते त्यत्र न कोपि विशेषः
प्रतीयते ।। तथाप्यशेषप्रतिपत्स्वीकारे युग्मान्यादीनि बहूनि वाक्यानि बाध्येरन् ।। न वांतिमः पक्षः युक्ति
सहः ।। तथाहि । पूर्वविद्धायाः प्रयोजकमेव वक्तव्यं ।। शुक्लपक्षे पराह्णसायाह्नव्यापिनी बलिदिने यदु
पवासः पूर्वविद्धाया विषय इति तव वक्तुं न शक्यते ।। बलिदिनत्वं निमित्तीकृत्योपवासस्य विधेयत्वात् ।। उ
स्योत्सवादिकमेव हि तत्र विहितं ।। अतः समूहस्य प्रयोजकत्वाभावे शुक्लपक्षादिषु पंचस्वन्यतम
स्य प्रयोजकत्वमभ्युपेयं तत्र किमिच्छया विकल्पः ।। अहो स्विदेकं प्रतिनियतमिति विचारे विकल्पः ।
तावन्न युज्यते ।। अष्टदोषग्रस्तत्वात् ।। तथाहि यदा बलात्सवस्य प्रयोजकत्वं स्वीक्रियते तदोपवासस्य
प्राप्तं प्रामाण्यं त्यज्येत अप्राप्तमप्रामाण्यं स्वीक्रियेत पुनः परपि यदा कदाचिदुपवासस्य प्रयोजकत्वं
स्वीकारे पूर्वं परित्यक्तं । प्रामाण्यं पुनः स्वीक्रियेत ।। स्वीकृतमप्रामाण्यं परित्यज्येत देतदेवमुपवास
वाक्ये स्वत्या[illegible]दोषाः अनेवेवन्या येन बल्युत्सवाक्येपि यथोक्तश्चत्वारो दोषाः उत्प्रेक्षणीयाः अतो

माध० ॥५७॥ विकल्पासंभवादेकैकस्यैव प्रतिनियतस्य स्वीकार्यत्वे सति । शुक्लपक्षस्यैव स्वीकारणीयुतरं मन्यामे
हे ॥ तथा सति बहुरुग्रहसिद्धेः । युग्माग्निवाक्यं बलिदिनवाक्यमुपवासवाक्यं चेत्येतान्यनुगृह्यंते ।
न ह्येतानि कृष्णपक्षविषयतया कथंचिदपि योजयितुं शक्यंते ॥ एतदनुसारेण द्वितीयादियुतत्वव-
चनं कृष्णपक्षविषयत्वेन संकोचनीयं ॥ तस्य सामान्यवचनत्वात् इत्थं शुक्लकृष्णप्रतिपदोः क्रमेणा
पूर्वोत्तरविधतया व्यवस्थितौ सत्यां यो यं द्वितीयायुतोपवासनिषेधं असौ शुक्लपक्षविषयतया यो-
जनीयः ॥ यद्यप्यपराह्णिकवचनं शुक्लकृष्णपक्षद्वयसाधारणं प्रतिभासते तथापि शुक्लपक्षविषयत्व
मेव तस्य न्याय्यं सांमुख्यमुपजीव्य प्रवृत्तत्वात् । कृष्णपक्षे द्वितीयायुतायाः प्रतिपदो विमुखत्वात् ननु
वसति यदा शुक्लपक्षे सायाह्नमात्रं व्याप्नोति न त्वपराह्णं तदानीमुत्तरतिथिः सम्प्रज्येत इति चेत् । मै
वं । संमुखी नाम सायाह्नव्यापिनीति वचनेन तादृशे विषये पूर्वतिथेर्विधानात् । एवमीषदन्य
न सायाह्नव्यासो शुक्लपक्षेऽपि परेद्युरेव प्रसज्येत इति चेत् ॥ प्रसज्यतां नाम ॥ पूर्वतिथेर्युग्मवा
क्यविषयत्वाभावात् । यदा प्रातरमावास्या त्रिमुहूर्ता ततोऽधिका वा सायं प्रतिपत्त्रिमुहूर्त्ता ततो
ऽधिका वा भवति । तादृश एवोभयत्र त्रिमुहूर्त्तवेधो यतो यास्तिथेस्तद्विषयत्वात् । न च त्रिमुहूर्त्तवे ॥शिव॥
धः सर्वसाधारणो न प्रतिपद्विषय इति शंकनीयं ॥ विशेषवचनाभावे सामान्यवचनस्य स्वीकर्त्तव्य ॥५७॥

त्वात् तान्युदाहरामः ॥ द्वितीयाप्रतिपद्यते स्फुरके सामान्यतः प्रतिपन्मात्रं प्रतीयते युग्माग्निवाक्ये
प्रतिपद्यप्यमावास्येति पूर्वदिनपूज्यत्वस्य शुक्लपक्षविषयत्वादितरस्य कृष्णपक्षविषयत्वं ॥ न चात्रामा
वास्याशब्दः पौर्णमास्याप्युपलक्षणमिति शंकनीयं चतुर्दश्या पौर्णमेति पौर्णमास्याः पूर्वदिने न सह यु
ग्मत्वाभिधानादुदाहृतस्मृत्यंतरेण उपोष्याः परसंयुक्ताः परा पूर्वेण संयुता इति । अमावास्यायुतायाः
प्रतिपद उपोष्याभिधानात् । द्वितीयायुक्तायाः उपवासव्यतिरिक्तव्रतादिविषयत्वं । उपोष्यशब्दस्तु
रव्रतादीनामप्युपलक्षणमिति चेन्न पूर्वोक्तवेदेवतानामिति श्रुत्या व्रतादौ देवपूर्वाह्णस्य विहितत्वे
नोत्तरदिनस्वीकारे कर्मकालव्याप्त्यभावात् ॥ यस्मिन्काले तु यत्कर्म तत्कालव्यापिनी तिथिरिति ।
कर्मकालव्याप्तिस्मर्यते ॥ न चोपवासेऽपि समानमेतदिति वाच्यं । उपवासस्याहोरात्रसाध्यत्वेन
स्वं उत तिथौ पूर्णे कर्मव्याप्त्यसंभवात् ॥ व्याप्ति वा हुल्यं पूर्वविधायामेव भवतीति अन्येद्युरपरभागे
कृत्स्नायां रात्रौ च तद्व्याप्तेः उदयेतपवासस्येति संस्रस्तापरेद्युरुपवासः प्राप्नोतीति चेत् ॥ न
त्वस्याः सामान्यशास्त्रत्वेन प्रतिपदुपवासाभिधायिनो विशेषशास्त्राद्दुर्बलत्वात् पैठीनसिस्कंद
व्यासैः पूर्वतिथावपराह्णव्याप्तिमिति सायाह्नव्यापितयाऽप्युभयोर्व्याप्तितया च पूज्यत्वाभिधाने सति तत्

त्वात्॥ द्वितीयायुतोपवासनिषेधस्तु पूर्वेद्युः प्रतिपदस्त्रिमुहूर्त्तवेधे सति द्रष्टव्यः॥ सायाह्नव्यापिव
चने न त्रिमुहूर्त्ते वेधोऽभिधीयते अपराह्णिकवचनेनान्ततोऽप्यधिकवेधः॥ तत्रोभयत्र शुक्लप्रतिपत्
पूर्वैवोपोष्या॥ कृष्णप्रतिपत्परेद्युः उदयादूर्ध्वं त्रिमुहूर्त्ता ततोऽधिका वा स्यात्तदा सैवोपोष्या॥ अन्य
था पूर्वेद्युरिति निर्णयः॥ व्यासवचनेन पूर्वविद्धायां शुक्लप्रतिपदि यद्देवपित्र्ये विहिते तयोर्दैवरा
द्देन प्रतिपन्निमित्त उपवासो वल्कः सवश्चेत्युभयं विवक्षितं॥ वचनान्तराभ्यां तभ्यो श्रुगंगयाह्निकयविधा
नात्॥ एकादशी तथा षष्ठी अमावास्या चतुर्थी। उपोष्याः परसंयुक्ताः परा पूर्वेण संयुताः॥ श्रावणी दुर्ग
नवमी तथा दूर्वाष्टमी च या॥ पूर्वविद्धा तु कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति॥ नन्वाश्वियुजमासे योयं न
वरात्रोत्सवस्तदुपक्रमस्यापि पूर्वविद्धायां क्रियमाणत्वात्सोऽप्यविचक्षणीय इति चेन्न॥ तस्य नक्त
व्रतत्वात्॥ एकभक्तनक्तप्रतिपदीषीनां दैवत्वेऽपि पृथङ्निर्णयस्य वक्ष्यमाणत्वात्॥ नन्वव्रतादीन्य
पिदेवान्यत्र विवक्ष्यतामिति त्रीकनीयं॥ तेषु द्वय तिथिप्राशस्त्यस्य बहुभिर्वचनैर्वक्ष्यमाणत्वात्पि
त्र्यश्राद्धेनात्र मताहश्राद्धं विवक्षितं॥ आपराह्णिकी तिलस्मिंन्वचनेऽभिधानात्॥ अपराह्णिकत्
मताहश्राद्धप्रयोजकमिति वक्ष्यते॥ एवं तर्हि मताहश्राद्धवदत्रापि प्राप्तत्वात्॥ पित्र्यं वा मनुरब्रवीदि

माध०
॥४९॥
॥४८॥

तिविशेषविधानमनर्थकमितिचेन्न । तदपवादार्थत्वात् ॥ यदापूर्वेद्युरपराह्णोपरागस्पर्शः परेद्युर्भया
न्नतदातिथ्यंतरेषुपरेद्युरेवमत्ताहश्राद्धश्राद्धंप्रतिपदितु तदपवादेन पूर्वेद्युरेवविधीयते ॥ न
चास्यपित्र्यत्राद्वस्यैकोद्दिष्टादिविषयत्वंयुक्तं ॥ एकोद्दिष्टादीनांमध्याह्नादिकालेषुविहितत्वेनक
र्मकालव्याप्त्यास्तिथेस्तत्रग्राहीतत्वात् ते चकालाहारीतेनदर्शितः ॥ आमश्राद्धंतुपूर्वाह्णएको
द्दिष्टंतुमध्यमे ॥ पार्वणंचापराह्णेतुप्रातर्वृद्धिनिमित्तकमिति ॥ मनुरपि ॥ पूर्वाह्णेदैविकंश्राद्धमपरा
ह्णेतुपार्वणं ॥ एकोद्दिष्टंतुमध्याह्नेप्रातर्वृद्धिनिमित्तकमितिदैविकंरवामित्रआह ॥ देवानुद्दिश्यक्रि
यतेयत्तद्दैविकमुच्यते ॥ तन्नित्यश्राद्धवत्कुर्याद्द्वादश्यादिषुयत्नतइति तस्मान्नैकोद्दिष्टमत्रवि
हितमुच्यतेतैश्चविवक्षितं ॥ किंतुमत्ताहश्राद्धमन्यद्वापार्वणंश्राद्धंकिंचित् ॥ अत्रपूर्वविद्धायांशुक्लप्रतिपदिदै
वशाद्वेनविवक्षितस्तदुपवासस्तमुदाहरामः ॥ भविष्योत्तरपुराणेबृहत्तपाभिधानेव्रतेकार्तिकमासेतद्व्र ४८
पायसभोजनादिनियमंविधायेदमुच्यते ॥ ततोमार्गशिरेमासिप्रतिपद्यपरेऽहनि ॥ पक्ष्वागुरुस्के
चोपवसेन्महादेवंस्मरन्नुद्धरितिननुपूर्वविद्धायांशुक्लप्रतिपदियोऽयमुपवासोविहितस्तस्यसंक
ल्पःकिंप्रातःकार्यःकिंवाप्रतिपत्कालेनाद्यः ॥ अमावास्यावेलायांप्रतिपदुपवाससंकल्पायोगात् ॥ अ ॥शिव॥
तएवबौधायनः ॥ योयस्यविहितःकालःकर्मणस्तदुपक्रमे ॥ तिथिर्याभिमतासातुकार्यानोपक्रमे ॥४९॥

माध० ॥४९॥ कृत्ते शुक्लप्रतिपद्युपेतायां तिथौ प्रातरेव संकल्प्य प्रतिपदुपवासः कार्य इति युग्मादिवाक्यश्रौ माधित्यनिर्ण
तं तिथिक्षये तथास्तु ॥साम्यवध्योस्तु खर्वदर्पादिवाक्यात् परेद्युरुपवासः प्राप्नोतीति चेन्नैव खर्वदर्पादिवा
क्यस्यैकोद्दिष्टविषयत्वात् ॥तथा हि व्यासः ॥द्वितीयादिकयुग्मानां पूज्यता नियमादिषु ॥एकोद्दिष्टयादि
ह्यादौ ह्रासवध्यादिरुदोदनेति ॥नियमादिष्वित्यादिशब्देन पित्र्यकर्मव्यतिरिक्तव्रतोपवासादिसकलकर्मणो
ग्रहणं एकोद्दिष्टादीत्यादिशब्देन विवाहादिमंगलांगभूतश्राद्धव्यतिरिक्तपार्वणस्य वृध्यादावित्यादि
शब्देन मांगलिकश्राद्धस्य ह्रासवध्यादीत्यादिशब्देन खर्वग्रहणं तदेवं पूर्वेद्युः शुक्लप्रतिपदुपवासं कृ
त्वा परेद्युः पारणं कुर्यात् ॥तत्रेदं चिंत्यते ॥किं प्रातः पारणं किं वा तिथ्यंत इति ॥नाद्यः ॥सुमंतुवचनं विरो
धात् ॥तिथिनक्षत्रनियमो तिथिभांते च पारणं अथोन्यथा पारणे तु व्रतभंगमवाप्नुयादिति ॥न द्वितीयः ॥
देवलवचनविरोधात् उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेत् ॥अन्यथा तु फलस्यार्धं धर्ममेवोपसर्प
तीति ॥धर्मो यमः ॥नायं दोषः ॥पूर्वोक्तवाक्यस्य सामान्यरूपत्वेन परविद्धोपवासविषयतया संकोचनी
यत्वात् ॥एतदेवाभिप्रेत्य स्मर्यते तिगमे ॥पूर्वविद्धासु तिथिषु भेषु वश्रवणं विना ॥उपोष्य विधिवत् कुर्यात्
तदंते तु पारणमिति ॥भेषु नक्षत्रेषु ॥स्कंदपुराणेपि ॥तिथिनामेव सर्वासामुपवासव्रतादिषु ॥ति ॥शिव॥
थ्यंते पारणं कुर्याद्विना शिवचतुर्दशीमिति अत्रोपवासव्रतादिष्वित्यादिशब्देनैकभक्तनक्तायाचि ॥४९॥

तानि गृह्यंते ॥यां तिथिं समुद्दिश्य ते तानि पूर्वेद्युर्विहितानि परेद्युस्तत्तिथिभागे लीने पश्चाद्भोजनं कुर्यात् ॥
अन्यथा पूर्वदिनानुष्ठितैकभक्तादिव्रतानां वैकल्यं स्यादित्यभिप्रायः ॥अस्य च तिथिभांतपारणस्या
पवादः क्वचित्स्मर्यते ॥तिथ्यंते चैव भांते च पारणं यत्र चोद्यते ॥यामत्रयोर्ध्ववर्तिन्यां प्रातरेव हि पार
णमिति ॥यथोक्तोपवासवत् ॥बलुत्सवोपि पूर्वविद्धायामेव कर्तव्यः ॥स च बलुत्सवो ब्रह्मपुराणे वाम
नपुराणे भविष्योत्तरपुराणे प्रपंचितः ॥अत्र प्रातःकाले द्यूतादिकं ब्रह्मपुराणे दर्शितं ॥तस्माद्द्यूतं प्रकर्त
व्यं प्रभाते तत्र मानवैरिति ॥यद्यपि प्रातरमावास्यावर्तते न तु प्रतिपत् तथापि पूर्वोक्तसंकल्पन्यायेन प्रति
पदः संकल्पमाश्रित्य प्रातरेव द्यूतादिकं कर्तव्यं ॥ननु यावेतावुपवासबलुत्सवौ पूर्वविद्धायां प्रतिपदि वि
हितौ तयोः केनापि निमित्तेन तत्रानुष्ठानासंभवे सति किमुत्तरविद्धा गौणकालत्वेन ग्राह्या ॥किं वा मुख्य
त्वेन ग्राह्या कालातिक्रमात्तयोः परित्याग एव अत्र केचिदाहुः ॥परित्याग एव युक्तः ॥मुख्यकालमंतरेणाप्य
नुष्ठाने द्वितीयातृतीयादिष्वप्यपि ॥तदनुष्ठानप्रसंगात् ॥अथोच्यते ॥यथा त्रैवर्णिकोपनयनस्य
गर्भाष्टमादिमुख्यकालासंभवे सति आषोडशादिकाला गौणकालत्वेन स्वीकृताः ॥एवमत्रापीति त
न्न वैषम्यात् ॥तत्र हि गौणकालो वाचनिकः ॥आषोडशाद्द्वाविंशात् चतुर्विंशाच्च वत्सरात् ॥ब्रह्मक्ष

माध० त्र विरुद्धा कालऔपनायनिकः पर इति ॥ नत्वेवं मंत्रोत्तरप्रतिपदो गौणत्वेन स्वीकारे किंचिद्वचनमस्ति ॥
॥५०॥ अंतरेणापि वचनं युक्तिमात्रेणात कृत्स्ननाम षोडशादिवर्षेभ्य ऊर्ध्वमपि सन्निकर्षविप्रकर्षतारतम्ये
न गौणत्वमापुपनयनकालो प्रसज्येयाताम् ॥ न च तौ युक्तौ अत ऊर्ध्वं पतंत्येते यथाकालमसंस्कृता
इति पातित्यस्मरणात् ॥ किं च पूर्वोत्तरविषययोरुभयोरपि स्वीकार्यत्वे पूज्यत्वविचारोपि विरुद्धः
स्यात् तस्मात् पूर्वपरित्याग एवेति ॥ अत्र ब्रूमः ॥ से त्येवात्र उपनयनस्योत्तरतिथेः प्रापकानि बहूनि वच
नानि ॥ प्रतिपत्सद्वितीयास्यादिति तावदेकं वचनं भवति नन्वेतद्यथोक्तविषयव्यतिरिक्तविषये मु
ख्यकालत्वं विदधाति न तु यथोक्तविषये गौणकालत्वमिति चेत् ॥ तत्र वक्तव्यं किमत्र विषयांतरे मु
ख्यत्वं वाचनिकं किं वा यथोक्तस्य मुख्यकालेभिहिते सति अर्थादिपविषयत्वे तस्य वचनस्य परिशि
तइति ॥ नाद्यः ॥ तस्मिन्वचने विषयांतरस्यप्रशोरतोप्रतीतेः ॥ द्वितीये तु सामान्यवचनस्य विशे
षस्य व्यतिरिक्तासंभावितत्वेन विषयत्वं परिशेषणीयं ॥ तथा सति रूपप्रतिपद्विषयत्वं उपवा
सव्यतिरिक्तदानव्रतादिविषयत्वं उपवासव्यतिरिक्तदानव्रतादिविषयत्वं च संभावितत्वाद्यथा ॥शिव॥
परिशिष्यते तथोपवासेपि गौणकालत्वं कुतो न परिशिष्यते ॥ द्वितीयायुतोपवासनिषेधादि ॥५०॥
ति चेत् ॥ न तस्य निषेधस्य पूर्वविद्धोपवासप्रशंसायां तात्पर्यात् ॥ अपरं वा वान्ये गोक्षेभ्यःपद्मा

णितेति ॥ स्कंदपुराणे ॥ योयस्यविहितः कालः कर्मणस्तदुपक्रमे ॥ विद्यमानो भवेदंगं नोद्दिष्टोपक्रमेण विति
नद्वितीयः प्रातःकालस्यैवसंकल्पांगत्वात् ॥ तथा च स्मर्यते ॥ प्रातः संकल्पयेद्विद्वानुपवासव्रतादिकमिति ॥
तथा प्रातरागूर्यमितिमान्कुर्यान्नक्तव्रतादिकं ॥ नापराह्णे न मध्याह्ने पित्र्यकालो हितो स्मृतो विति ॥ अ
त्रोच्यते यथोक्तवचनबलात् प्रातरेव संकल्पः कार्यः ॥ तदानीं ज्योतिःशास्त्रप्रसिद्धप्रतिपदभावेपि स्मृति
भिरापादितायाः प्रतिपदः सत्वात् ॥ अत एव देवलः ॥ यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः ॥ सा ति
थिः सकला ज्ञेया दानाध्ययनकर्मस्विति ॥ अत्र दानाध्ययनयोरुपवासादिनिखिलदेवोपलक्षणार्थ
त्व विवक्षया कर्मस्विति बहुवचनं निर्दिष्टं ॥ अत्रास्तमयात्पूर्वं मुहूर्तत्रयव्यापिनीं तिथिं समनुप्राप्येति
व्याख्येयं ॥ न तु तनोल्पव्याप्तिर्विवक्षिता तथा सति पूर्वोक्तबाधाभावेनोत्तरतिथेरेव ग्राह्यत्वप्रसंगात् ॥
तथा च त्रिमूर्तव्याप्तिः स्कंदपुराणे दर्शिता ॥ यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीप्रियः ॥ सा तिथि
स्तद्दिने प्रोक्ता त्रिमुहूर्ता तु या भवेत् इति ॥ शिवरहस्ये सौरपुराणे योरपि ॥ यां प्राप्यास्तमुदेत्यर्थः ॥ स
चेत्स्यात्त्रिमुहूर्तका ॥ धर्मकृत्येषु सर्वेषु संपूर्णा तां विदुर्बुधाः ॥ इति वृद्धवसिष्ठोपि ॥ यस्यां तिथौ वस्त
मियात् सूर्यस्त्रिमुहूर्तकैः ॥ यागदानजपादिभ्यस्तामेवोपक्रमेत्तिथिमिति ॥ ननु सायंप्रातस्त्रिमु

वद्द्यत्र गोऽश्वप्रशंसार्थमजादीनां पशुत्वं निषिध्यते ॥ न तु सर्वथा तन्निषेधः प्रत्यक्षविरोधात्
शास्त्रांतरविरोधाच्च ॥ एवमत्राप्युत्तरविधायां प्रतिपदि सर्वथा प्रतिपदुपवासनिषेधो व्याहन्येत यथा
चोदितानुदितहोमयोरन्योन्यनिंदितरप्रशंसार्थे न तु सर्वथा हेयत्वाय नो चेदुभावपि होमोपरित्य
ज्येयातां यदि तत्र शाखाभेदेन व्यवस्थातः तत्रापि मुख्यगौणभेदेन व्यवस्थास्तु ॥ न चैतावता
तिथेः पूज्यत्वविचारो निरर्थको भवति ॥ प्रशस्ततिथिस्वीकाराय तदुपयोगात् ॥ यानि चान्यानि स
मान्यवचनानि ॥ उदये तूपवासस्य पूर्वाह्णिकास्तु तिथयो दैवकार्ये फलप्रदा इत्यादीनि तानि
सर्वाणि यथा मुख्यप्रतिपदमुपोद्बलयंति तथा गौणप्रतिपदी कुतो नोपोद्बलयेयुः ॥ न चैवं सति
द्वितीयातृतीयादिष्वतिप्रसंगः गौणप्रतिपत्त्वस्यापि तत्राभावात् गौणप्रतिपद्येतावता निर्बंधेन कि
स्ताबलाभ इति चेत् ॥ तद्द्वेषेणावातवकालाभ इति वक्तव्यं शिष्टाचार इति चेन्न ॥ विपर्यय एव
तपन्न्यामः ॥ तथाहि यदा यथोक्तनित्याकस्याश्चित्तिथेर्द्वैविध्यं भवति तदानीं प्रतिपन्नशिष्टाए
वंशे केचन पूर्वेद्युरनुतिष्ठंति ॥ अन्ये परत्र न च तत्रापि ततः शिष्टाचारप्रमाणेनेतत्तर्कनीयं
— — — — — — उभयेषां ॥ व शिष्टानाम विगीतत्वकथनायैव संप्रतिपन्ने तिथिविरोधितत्वात् एवं

माध० ॥५१॥ ।तर्हिमुख्यत्वमप्यन्यतमस्यनियंतुमशक्यमितिचेत्॥यस्मिन्देशेयस्मिन्कालेयेषुशिष्टेषुनिराग
द्रूवस्यप्रामाण्यातिशयबुद्धिस्तदातद्देशस्याचारस्यामुख्यत्वात्॥एतदेवाभिप्रेत्यगुरोःशिष्यानुशा
सनेतैत्तिरीयाःसमामनंति।अथयदितेकर्मविचिकित्सावावृत्तविचिकित्सावास्यात्॥येतत्रब्राह्म
णाःसंमर्शिनोयुक्ताःआयुक्ताःअलुक्षाधर्मकामास्युः॥यथातेतत्रवर्त्तेरन्॥तथातत्रव
र्त्तेथाइति॥समर्शिनोयुक्ताः॥कुशलाःशास्त्रतत्पराःआयुक्तास्तदर्थानुष्ठाननिरताः॥अलुक्षाःक्रो
धादिवर्जिताःधर्मकामाःजीवन्मुक्तिवत्कर्मण्यौदासीन्यमकुर्वाणाः॥उक्तनीत्याःकस्यचिच्छिष्टा
चारविशेषस्यमुख्यत्वेसत्यपरोगौणोभविष्यति।नतुसर्वथैवानाचारःएवंचसत्येकामेवतैत्तिरि
यशाखामधीत्यबौधायनापस्तंबमतभेदेनपरस्परंविलक्षणमनुष्ठानमाचरतामुभयवि
धानांपुरुषाणांस्वस्वपूर्वपुरुषपरंपर्यक्रमायातएवाचारोमुख्यःकदाचित्तदसंभवेमतांतरेणा
प्यनुष्ठानमेवश्रेयोनतुसर्वथातल्लोपोयुक्तः॥किंबहुनामुख्यायाःपूर्वविद्धायाःप्रतिपदोसंभवे
शेषपरित्यागादरमुत्तरविद्धायाःपरिग्रहणमित्यवगंतव्यं॥तदेवंशुक्लप्रतिपद्दिपवासबल्य ॥शिवा॥
स्तवयोःपूर्वविद्धामुख्येतिस्थितं॥ ॥अथैकभक्तंनिर्णीयते॥ ॥ब्रंह्मपुराणेवैश्वानरे ॥५१॥

नोपि॥ उदये तूपवासस्य नक्तस्यास्तमये तिथिः॥ मध्याह्नव्यापिनी ग्राह्या एकभक्तव्रते तिथिरिति॥ न चात्रोप
माध॰ वासन्यायो युक्तः॥ तत्र पूर्वविद्धायामेव विशेषशास्त्रस्योपवसानात्॥ द्विविधं हि विशेषशास्त्रं तिथिप्रयु
११५२॥ क्तमेकं कर्मप्रयुक्तमपरं च॥ तत्र पौर्वाह्णिकास्तु तिथयो दैवकार्ये इत्यनेन कर्मविशेषविषयेण सामान्यशास्त्रे
णोत्तरविद्धायां प्राप्तायामुपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इत्यनेन कर्मविशेषविषयेण विशेषशास्त्रे
ण पूर्वविद्धा विहिताः तिथिविषये अपि सामान्यविशेषशास्त्रे उदाह्रीयते पूर्वाह्णिकास्तु तिथय इत्य
स्य तिथिमात्रमुपजीव्य प्रवृत्तत्वात् सामान्यशास्त्रत्वं प्रतिपत्संमुखी कार्ये त्येतद्विशेषशास्त्रं तिथि
शेषमुपजीव्य प्रवृत्तत्वात्॥ तथा सति द्विविधेनापि विशेषशास्त्रेण पूर्वविद्धायामेवोपवासः
सुस्थितः॥ अत्र तु मध्याह्नव्यापिनीत्येतत्कर्मविशेषशास्त्रं॥ अतस्तदनुसारेण निर्णयो युज्यते॥ ननु
प्रतिपत्संमुखी कार्या इत्यनेन तिथिविषयेण विशेषशास्त्रेण कुतो न निर्णय इति चेत्। उपवासविष
यत्वेनापि तस्योपपत्तेरिति ब्रूमः॥ ननु मध्याह्नव्यापिवचनमपि तिथ्यंतरे एकभक्तविषयत्वेनोपपादि
यितुं शक्यं॥ अतः कर्मविशेषशास्त्रतिथिविशेषशास्त्रयोः समानबलत्वमिति चेत्। अस्तु नाम ॥श्री॥
किंत्वच्छिन्ने मध्याह्नव्यापित्वसंमुखत्वयोः पूर्वविद्धायां संपादयितुं शक्यत्वेन विरोधाभावात्॥ य ११५२॥

दा तूत्तरविद्धायामेव मध्याह्नव्यापित्वं तदा विरोध इति चेत्। बाढं तथापि तिथिविषयविशेषशा
स्त्रात्कर्मविषयविशेषशास्त्रं प्रबलं॥ तिथेर्गुणत्वात्। कर्मणश्च प्रधानत्वात्॥ तस्मादेवं विधे वि
षये कर्मकालव्याप्त्यैव निर्णेतव्यं॥ अत्र निर्णेतव्यो विषयः षोढा भिद्यते॥ पूर्वेद्युरेव मध्याह्नव्यापि
त्वं परेद्युरेव मध्याह्नव्यापित्वं। उभयत्र तद्व्यापित्वं उभयत्र तदव्यापित्वं उभयत्र साम्येन तदेक
देशव्यापित्वं उभयत्र वैषम्येण तदेकदेशव्यापित्वं चेति। तत्र प्रथमद्वितीययोर्मध्याह्नव्यापि
त्वस्यैव निर्णायकत्वं॥ तृतीये पूर्वविद्धा ग्राह्या मुख्यकालव्याप्तेः समत्वेपि गौणकालव्याप्तेरधिक
त्वात्॥ अनेनैव न्यायेनोभयत्र मुख्यकालव्याप्त्यभावेपि गौणकालव्याप्तिलाभात् पूर्वविद्धैव॥
पंचमेप्ययमेव न्यायो योज्यः॥ षष्ठे तु यदा पूर्वेद्युर्मध्याह्नैकदेशमधिकं व्याप्नोति तदानीं तदाधि
क्यात् गौणकालव्याप्तेश्च पूर्वैव तु ग्राह्या॥ यदा तु परेद्युर्मध्याह्नैकदेशमधिकं व्याप्नोति तदा गौणका
लव्याप्त्यभावेपि मुख्यकालव्याप्त्याधिक्यानुसारेण सैव ग्राह्या॥ नन्वस्त्वेवं स्वतंत्रे एकभक्ते निर्ण
यः॥ अन्यांगे तु कथं तत्र कानुपपत्तिरिति चेदुच्यते॥ पूजाव्रतेषु सर्वत्र मध्याह्नव्यापिनी ति
थिरिति॥ मध्याह्ने पूजयेन्नपेत्यादिशास्त्रे रंगिनः पूजादेर्मध्याह्ने विहितत्वेनांगस्यैकभक्ते

माध॰ ॥५३॥ स्यापराह्णादेः प्राप्यमाणत्वान्मुख्यकालसंभवः॥ मा भूत्तादृशविषये मुख्यः कालः प्रधानानुसारेणागु
णस्यानेतव्यत्वात्। यदा स्वातंत्र्यैकभक्तेऽपि केनचिन्निमित्तेन मुख्यकालसंभवे गौणः कालोऽप्यनुष्ठा
यते॥ तदा किमु वक्तव्यमन्या गौणायत्तूपवासप्रतिनिधिरूपमेकभक्तं तदुपवासतिथौ कार्यं॥ तस्य
गौणोपवासत्वात्। अत एव सुमन्तुः॥ तिथौ यत्रोपवासः स्यादेकभक्तेऽपि सा तथेति॥ न च तादृशमेवना
स्त्विति शंकनीयं उपवासव्रतं प्रक्रम्य रोगादिना तदशक्तौ गुर्वनुज्ञया तस्यैकभक्तस्य संभावितत्वात्॥
अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः॥ हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधमिति शास्त्रात्॥
इत्येकभक्तनिर्णयः॥ ॥अथ नक्तं निर्णीयते॥ तच्च वराहपुराणे धान्यव्रते पठ्यते। मार्ग
शीर्षे सितपक्षे प्रतिपद्या तिथिर्भवेत्। तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं प्रपूजयेदिति॥ अत्र नक्तश
ब्दो भोजनपरः॥ कालपरे प्रकुर्वीतेत्यस्यानन्वयात्॥ नहि कालः केनचिदिच्छया कर्तुं शक्यते॥
तस्य च भोजनस्य रात्राविति कालविधिः॥ अतो दिवाभोजनरहितत्वे सति रात्रिभोजनं ॥शिका॥
व्रतस्य स्वरूपं॥ अन्यथा स्वतः प्राप्तस्य रात्रिभोजनस्य विधानवैयर्थ्यापातात्॥ तस्य च
नक्तभोजनस्य विष्णुपूजनमंगं तत्संनिधौ पठितत्वात्॥ तथा होमोऽपि तदंगं होमं च तत्र कुर्व ॥५३॥

व्रते पठ्यते॥ प्रतिपद्येकभक्ताशी समासे कपिलाप्रद इति। तत्र तावदेकभक्तं त्रिविधं॥ स्वतंत्रमन्यांगमु
पवासप्रतिनिधिरूपं चेति तेष्विदानीमुदाहृतं स्वतंत्रं॥ तत्रेदं चिंत्यते किमुपवासवत्तिथिरस्मिन्नग्रहीत
व्या। उत प्रकालान्तरेणेति उपवासवदिति तावत्प्राप्तं॥ दैवं पित्र्यं तथा काम्यं इति वचनेनोपवासैकभक्ता
दिकृत्स्नदेवस्य विवक्षितत्वात्। न च कर्मकालव्याप्त्या तन्निर्णय इति। शंकनीयं॥ न कालस्याद्या
प्यनिर्णीतत्वात्। कथंचिन्निर्णीतेऽपि कर्मकालव्याप्तिवचनस्य पित्र्यविषयत्वेनाप्युपपत्तेः तस्मा
दुपवासवन्निर्णय इति प्राप्ते ब्रूमः॥ कर्मकालव्याप्तिरेवात्र निर्णये हेतुः॥ कर्मकालस्तु कर्मस्वरू
पं येनोभयं स्कंदपुराणे दर्शितं॥ दिनार्धसमयेऽतीते भुज्यते नियमेन यत्। एकभक्तमिति प्रोक्त
मतस्तत्स्याद्दिवैव हीति देवलोऽपि॥ दिनार्धसमयेऽतीते भुंज्यते नियमेन यत्। एकभक्तं तु तत्प्रोक्तं
न्यूनं ग्रासत्रयेण हीति। अत्र च दिनार्धसमयेऽतीते इति दिनार्धस्योपरि सार्धमुहूर्तपरिमितः कालः पं
चधाविभागे मध्याह्नस्यापरभागः स एकभक्तस्य मुख्यः कालः दिनार्धेऽतीते सति समनंतरभावि।
त्वादस्तमयात्प्राचीनो वाशिष्टो गौणः कालः दिवेत्यभ्यनुज्ञानात्॥ एवं स्थिते सति मुख्यकालव्यापि
नी तिथिर्ग्रहीतव्या। अत एव पद्मपुराणं मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथिरिति बोधाय

तेत्यभिधानात्॥ एवं च सति प्रधानाविरोधेन पूजाहोमयोरंगयोर्दिवानुष्ठानमर्थादुक्तं भवति। प्र
धानस्य तु नक्तस्य कालद्वयं भविष्यत्पुराणे दर्शितं॥ मुहूर्तोनं दिनं नक्तं प्रवदंति मनीषिणः॥ न
क्षत्रदर्शनान्नक्तमहं मन्ये गुणाधिपेति॥ अस्य च कालद्वयस्याधिकारिभेदेन व्यवस्थामह देवलः॥
नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतं॥ यतेर्दिनाष्टमे भागे तस्य रात्रौ निषिध्यत इति स्मृत्यं
तरेपि॥ नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः॥ यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरं॥
सदिवाकरं तु तत्प्रोक्तं अंतिमे घटिकाद्वये॥ निशानक्तं तु विज्ञेयं यामार्धे प्रथमे सतीति॥ रात्रेर्नक्ते
भोजने व्यासः॥ त्रिमुहूर्तं प्रदोषः स्याद्भानावस्तंगते सति॥ नक्तं तत्र प्रकर्तव्यमिति शास्त्रस्य निश्च
यः इति तदेवं नक्तकालौ व्यवस्थितौ॥ तत्र नक्ते प्रदोषव्यापिन्यां तिथौ कार्यं॥ तदाह व्यासः॥
प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा॥ एकादशीं विना सर्वा शुक्लपक्षे तथा स्मृतेति॥ एका
दश्यां तु यन्नक्तं तत्रोदयव्यापिनी तिथिर्ग्राह्या॥ तदुक्तं स्कंदपुराणे॥ प्रदोषव्यापिनी ग्राह्या सदा
नक्तव्रते तिथिः॥ उदयस्था सदा पूज्या हरिनक्तव्रते तिथिरिति॥ अत्राप्येकभक्तन्यायेन षो
ढा विषयभेदा उत्प्रेक्षणीयाः मध्याह्नप्रदोषयोरेवभिन्नत्वात्॥ पूर्वेद्युरेव प्रदोषव्याप्तौ पूर्वा तिथिर्ग्रा

माध०

॥५४५

प्ता ॥ परेद्युरेव प्रदोषव्याप्तौ परतिथिः ॥ उभयत्र प्रदोषव्याप्तौ परतिथिरेव ॥ तदाह जाबालिः ॥
सर्वेष्वेव तिथ्योरुभयोः प्रदोषव्यापिनी तिथिः ॥ तत्रोत्तरवचनं तु स्यादुभयत्रापि सा यत इति उभय
त्रापि दिवसरात्र्यापि दिवसे रात्रावपि सा तिथिर्विद्यते यत इत्यर्थः ॥ उभयत्र प्रदोषव्याप्त्यभावेपि प
रेव तदाह जाबालिः ॥ अतथात्वे परत्र स्यादस्तादर्वाग्गतो हि सेति ॥ प्रदोषे तदभावेप्यस्तमयाद
र्वाग्यतः सा विधृयते ततः सा ग्राह्येत्यर्थः ॥ अस्य च दिवारात्रव्रतत्वेन प्रदोषव्याप्तिवत्सायंकाल
व्याप्तिरपि निर्णयहेतुर्भवति इत्यनेनाभिप्रायेणार्वागस्तमयादित्युक्तं ॥ दिवारात्रिव्रतत्वं च स्कं
दपुराणेभिहितं ॥ प्रदोषव्यापिनी यत्र त्रिमुहूर्ता यदा दिवा ॥ तदा नक्तव्रतं कुर्यात्स्वाध्यायस्य
निषेधवर्जिते ॥ यद्यप्यत्र प्रदोषकालः सायंकालो द्वावेव प्रयोजकौ प्रतिभासेते तथापि प्रदोषव्या
प्तिर्मुख्यः कल्पः सायंकालव्याप्तिरनुकल्प इति जाबालिवचनादवगम्यते तत्र सत्तथात्वमिति
प्रदोषव्याप्त्यभावमनुद्य सालाद्यायास्तिथेर्ग्राह्यतायामर्वागस्तमयादिति हेतूपन्यासात् तद्दृशो
विषये यतिव्रते ॥ गृहस्थोपि दिवा नक्तमाचरेत् ॥ तदुक्तं स्कंदपुराणे ॥ प्रदोषव्यापिनी न स्यात् ॥श्रीव॥
दिवा नक्तं विधीयते ॥ आत्मनो द्विगुणां छायामतिक्रामति भास्करे ॥ तन्नक्तं नक्तमित्याहुर्न न ॥५४॥

त्रिमुहूर्त्तप्रदोषस्याद्रवावस्तंगते सतीति निशीथपर्यंतो जघन्यः कालः॥ नक्तप्रकृष्टतरात्राधिक्ति
सामान्येनाभिधानात्। असौरनक्तेषु साम्येन वैषम्येण वा दिनद्वये प्रदोषैकदेशव्याप्तौ परेद्युरे
व नक्तंकार्यं सायंकालस्य गौणस्य तत्तिथिव्याप्तित्वात्। अनेनैव न्यायेन सौरनक्तेषु सायंका
लैकदेशव्याप्तौ पूर्वतिथिर्ग्राह्या। प्रदोषकालस्य गौणस्य तत्तिथिव्याप्तत्वात्। अत्राप्येकभ
क्तवदन्यांगनक्तोपवासस्थानीयनक्तयोर्निर्णयो द्रष्टव्यः॥ यथोक्तलक्षणलक्षितयोरेकभक्तयोरेकस्मि
न् दिने यदा प्रसक्तिस्तदा कथं कर्त्तव्यं॥ न च एतादृशी प्रसक्तिरेव नास्तीति शंकनीयं॥ भविष्योत्तर
पुराणोक्ते रथसप्तमीव्रते कदाचित्प्रसक्तेः तथा हि तत्र तृतीयादिषु सप्तम्यंतेषु पंचसु दिनेषु क्र
मेणैकभक्तायाचितोपवासपारणानि विहितानि। तत्र यदा तृतीयायाम त्रयपरिमिता ततः ऊर्ध्वं च
तुर्थी। तदा मध्याह्नव्यापित्वात्तृतीयैकभक्तं तत्र प्राप्तं प्रदोषव्यापित्वाच्चतुर्थीनक्तमपि तत्रै
व तथा सति परस्परविरोधो दुष्परिहारः। अत्रोच्यते। एकभक्तप्राथम्यात् प्रबलत्वेन तस्मि ॥शिव॥
न् मुख्यकाल एवानुष्ठेयः। तद्विरोधिनि तु नक्ते नुकल्पः। स च द्विविधः। दिनांतरानुष्ठानात् कर्त्रं ॥५५॥

तरानुष्ठानं च। यदा चतुर्थी परेद्युश्च सायंकालं व्याप्नोति तदा तस्य गौणकालव्यापित्वा
देक एव कर्त्ता दिनभेदेन द्वयमनुतिष्ठतु। यदा चतुर्थी क्षयमाक्षीणा वा तदा गौणकालस्याप्य
संभवेन पूर्वद्युरेव भार्यापुत्रादिना कर्त्रंतरेण नक्तं कारणीयं॥ ॥इति नक्तनिर्णयः॥ ॥अया
चितं निरूप्यते॥ पूर्वोदाहृते सप्तमीव्रते पंचम्यामयाचितं विहितं। तस्यैकभक्तवत् प्रतिप्रदोक्त
कालविशेषविधिर्नास्ति तस्यायाचितभोजननिषेधरूपत्वात्। स च निषेध उपवासवदहोरात्रं
विषयीकरोति। अत एवोक्तं संकल्पोप्यस्मिन्नहोरात्रे याचितमन्नं न भोक्ष्ये इत्येवं कर्त्तव्यः। अथवा
याचितदन्यदनयाचितमित्यप्रयत्नलब्धं परदत्तं तस्य भोजनं विवक्ष्यते। तदापि पराधीनत्वादेव
नक्तस्य कालविशेषो विधातुं शक्यते। यद्यपि स्वगृहे पूर्वसंचितं च स्विदानीमयाचितं। तथा
पि पूर्वप्रयत्नसंपादितत्वात्तद्याचितमेव। अथवा निषेधस्य प्रसक्तिपूर्वकत्वात् याच्ञायाश्च प्रसक्तेश्च
परद्रव्यविषयत्वादयाचितशब्दोपि परद्रव्यमेव विषयीकरोति। अत्रायाचितशब्दस्य यथो
क्तरीत्या द्वावर्थौ संपन्नौ प्रतिषेधः पर्युदासश्चेति तयोः प्रतिषेधपक्षं प्राजापत्यकृच्छ्रव्याख्याने

माध० ॥५६॥

गौतमो व्याजहार। अथापरं त्र्यहं न कंचन याचेतेति॥ पर्युदासपक्षे च बृहस्पतिर्व्याजहार। अहं प्रा
तस्त्र्यहं सायं त्र्यहमद्यादयाचितं॥ त्र्यहं परं तु नाश्नीयात् प्राजापत्यं चरन् द्विज इति॥ स्मृत्यंत
रेपि॥ अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयादिति॥ मितभोजनत्वं दशग्रासत्वं॥ तदुक्तं
चतुर्विंशतिमते॥ प्रातस्तु द्वादशग्रासाः सायं पंच दशैव तु॥ अयाचिते ह्यष्टौ चाद्ये प्राजापत्यवि
धिः स्मृत इति॥ तत्र भोज्यद्रव्यं परकीयमप्रार्थ्यमप्रयत्नोपनीतं चेदुभयं स्मार्तलिंगत्वादवगम्यते॥
तथा च प्रतिग्रहकरणीयात्तत्क्षयः॥ अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मण इति॥ तथा यम
धर्मेषु उशना॥ भिक्षाशनसमुद्योगात्प्राक्केनापि निमंत्रितं॥ अयाचितं हि तद्भक्ष्यं भोक्तव्यं मनुर
ब्रवीत्॥ इति यदि प्रतिषेधः यदि वा पर्युदासः॥ उभयथाप्येकभक्तादिवन्न कालो विशेषणी
यः॥ प्रतिषेधस्यानुष्ठेयाभावात् पर्युदासपराधीनत्वात् असति तु कालविशेषणविधाने कर्म
कालव्याप्तिवचनमत्र प्रवर्तते॥ तथा सति किं पौर्वाह्णिकी स्तुत्यर्थ यद्वा इति वचनेन पराग्राह्या॥
किं वा युग्मादिवाक्येन पूर्वेति विवक्षायां युग्मस्य तिथि विशेषविषयत्वात् अनुसरणं ॥शिव॥
न्याय्यं॥ अनेनैव न्यायेन प्रतिपद्द्यायाचिते पूर्वविद्धैव ग्राह्या॥ अयाचितस्य नियमरूपत्वात् ॥५६॥

क्तं निशि भोजनं॥ एवं कृत्स्नत्वात्ततो विद्वान् सायाह्ने तु भुं भुजिक्रियां॥ कुर्यान्नक्तव्रती नक्तफलं भवतीति नि
श्चितमिति॥ यत्तु सप्तमीभानुवारादौ सौरनक्तं विहितं तत्र पूर्वोक्तविपर्यासेन सायंकालव्याप्तिः मुख्य
कल्पः॥ प्रदोषव्याप्तिरनुकल्पः॥ एतदेवाभिप्रेत्य सुमंतुः॥ त्रिमुहूर्तस्पृगेवाह्नि निशि चैतावती तिथिः॥
तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनमिति॥ अत्र सायंकालव्याप्तेर्मुख्यकल्पत्वात्॥ प्रथमतो नि
र्देशः॥ प्रदोषव्याप्तेरनुकल्पत्वात् पश्चान्निर्देशः॥ इतरनक्तेषु प्रदोषव्याप्तेर्मुख्यत्वादुदाहृतकूर्मपुरा
णवचने सैव प्रथमं निर्दिष्टा सायंकालव्याप्तिः पश्चान्निर्दिष्टेति विवेकः॥ तेष्वितरनक्तेषु प्रदोषव्या
प्तितिथिग्रहणेपि भानुवारसंक्रांतिग्रहणस्यापि यदा रात्रिभोजननिषेधस्तदा दिवैव नक्तं कुर्या
त्॥ तदाह भविष्योत्तरपुराणे॥ येत्वादित्यदिने ब्रह्मन् नक्तं कुर्वंति मानवाः॥ दिनांते ते हि भुंजीरन् निषेधाद्रा
त्रिभोजने इति॥ अस्मिंश्च दिवाभोजने उत्तमो तिमो मुहूर्तः मध्यमस्तु पौर्त्यः॥ ततः प्राचीनो जघन्यः॥ एवं च
सत्यंतिमभागत्रिमुहूर्तवचनान्युपपद्यंते॥ रात्रिभोजनेपि घटिकात्रयमुत्तमं कालः घटिकाषट्कं
मध्यमकालं॥ एतदेवाभिप्रेत्य वचनं स्मर्यते॥ प्रदोषोस्तमयादूर्ध्वं घटिकाद्वयमिष्यते इति॥

द्वितीयादिकयुग्मानां पूज्यत्वं नियमादिष्विष्यत्कृत्वात्। इत्ययाचितनिर्णयः॥ ॥प्रतिपदुपवासै
कभक्तनक्तायाचितानि निर्णीतानि। तत्र शुक्लप्रतिपत्पूर्वविद्धोपोष्या॥ कृष्णप्रतिपत्तूत्तरवि
द्धा एकभक्तनक्तयोः सर्वास्वपि तिथिषु मध्याह्नव्यापिप्रदोषव्यापिनी निर्णयः॥ अयाचितस्य प्र
तिस्विकालविशेषविध्यभावादुपवासवच्छुक्लकृष्णप्रतिपदोः पूर्वोत्तरविद्धे ग्राह्ये इत्येत
दवस्थितं॥ अथ प्रतिपद्दानव्रतानि निरूप्यते॥ भविष्योत्तरपुराणे। दानं पठ्यते। प्रतिपत्सु द्विजान्सं
पूज्य पूजयित्वा प्रजापतिः॥ सौवर्णमरविंदं च कारयित्वाष्टपात्रकं॥ कृत्वा तौदुंबरे पात्रे सुगंधघृत
पूरितं॥ पुष्पैः धूपैः पूजयित्वा विप्राय प्रतिपादयेदिति। ब्रह्मपुराणे मौनव्रतं पठ्यते। मासि भा
द्रपदे शुक्ले पक्षे च प्रतिपत्तिथौ॥ नैवेद्यं तु पचेन्मौनी षोडशात्रिगणं नित्यं॥ फलानि पिष्टपक्वानि द
द्याद्विप्राय शोडश। देवाय षोडशैतानि दातव्यानि प्रयत्नतः॥ भुंजीत षोडशान्तथा व्रतस्य निय
माश्रयः॥ एवमन्यान्यपि दानव्रतान्युदाहरणीयानि तानि सर्वाण्युत्तरविष्यायां प्रतिपदि म
तव्यानि॥ तेषां देवतत्वात्तदाहव्यधयावद्वल्क्ष्यः। पौर्वाह्णिकास्तु तिथयो देवकार्यफल

माध०
॥५७॥

प्रदा इति यद्यप्येतत्तिथिसामान्यमुपजीव्य प्रवृत्तं तथापि प्रतिपदी बाधकाभावात् प्रवृत्तं तेन चात्र
युग्मवाक्यं बाधकं तस्य तिथिविशेषमुपजीव्य प्रवृत्तस्यापि कर्मकालव्यापित्वाभावाद् दुर्बलत्वात् ॥ ति
थिरंगं कर्मांगि ततः प्रबलमिति हि पूर्वमुक्तं ॥ कर्मकालव्याप्तिश्च वृ. सयाज्ञवल्क्य आह ॥
कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ॥ तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमि
ति ॥ कर्मकालश्च दानव्रतयोर्दैवत्वेन पूर्वाह्ण एवगन्तव्यः ॥ पूर्वाह्णो वै देवानामिति शास्त्रात् ॥ एकभक्त
नक्तयोर्दैवत्वेपि प्रतिपदोक्तकालविशेषशास्त्रेण सामान्यरूपं पूर्वाह्णशास्त्रं बाध्यते ॥ न त्वेवं प्रकृत
योर्दानव्रतयोः किंचित्तद्बाधकमस्ति ॥ त्वह्नः पूर्वभागः पूर्वाह्णः स पंचधाविभागपक्षे मुहूर्त्तत्रयात्म
कः प्रातःकालः चतुर्धा विभागपक्षे दिनाडिका पंचदशाधिकसार्धपंचमुहूर्त्तात्मककालः त्रेधावि
भागपक्षेप्यर्थः थो तथैव संपद्यते यद्यपि बहुशास्त्रानुरोधेन पंचधाविभाग एवात्र ग्राह्य इ
ति पूर्वमुक्तं ॥ तथा बहुकर्त्तव्यायोगात् तयोर्दानव्रतयोर्मुहूर्त्तत्रयमात्रेणानुष्ठानुमशक्यत्वात् ॥श्रीव॥
उत्तरेपि पक्षा अनुकूलत्वेन गृहीतव्याः ॥ यत्र सार्धसप्तमुहूर्त्तैरपि कर्म न समाप्यते तत्र र ॥५७॥

पुराणादिवचनेषु घटिकामात्रं प्रतीयते। वचनांतरेषु विष्णुधर्मोत्तरबौधायनप्रोक्तेषु घ
टिकाचतुष्टयं प्रतिभासते तथा चोच्यते। उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ। द्विमु
हूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोरिति॥ अस्यार्थः॥ भानावुदिते सति उत्तरकाले अह्नो मुहूर्त्तद्वयं
दैवतं देवदैवत्यं तस्मिंश्चास्तमिते ततः पूर्वकालीनमह्नो मुहूर्त्तत्रयं पित्र्यं पितृदैवत्यं अतस्ता
वत्कालव्यापिनी या तिथिर्भवति सैव क्रमेण हव्यकव्ययोर्ग्राह्या भवतीति॥ अत्रोच्यते॥ पौ
र्णमासी ... इति वचनेन दैवे पूर्वाह्णव्यापिनी या त्रिमुहूर्त्तपरिमिता या तिथिर्ग्रहणं। त्रिमुहूर्त्त
न्यूना या तिथिः पूर्वाह्णव्याप्त्यभावात्॥ न च पूर्वाह्णस्य पंचधा विभक्तस्य मुख्यत्वात्
उदिते भानौ त्रिमुहूर्त्ता तिथिर्ग्रहीतव्या यन्तु दक्षेणोक्तं॥ त्रिमुहूर्त्तेन कर्त्तव्या या तिथिः क्षय
गामिनीति॥ द्विमुहूर्त्तापि कर्त्तव्या या तिथिर्वृद्धिगामिनी॥ न तत्तु त्रिमुहूर्त्तव्याप्तेर्बोधकं न प्र
सूते पोद्बलकमेव तथा हि प्रतिषेधः सर्वत्र प्रसक्तिपूर्वकः प्रसक्तिश्चात्र यथोक्तनिःसापो वा
क्यवाक्यादित्रिमुहूर्त्ते वेधाभिधायिषेदानसिवाक्याद्वा भवति तच्च प्रसक्तं त्रिमुहूर्त्तत्वं स ॥श्रीव॥
मस्तिथेर्बाधकाभावात् तथैव व्यवतिष्ठते॥ तिथिक्षये त्वधिक्षये त्वधिकया ... ॥५८॥

प्रतिनिषिध्यते॥ अतश्च तत्र चतुर्थमुहूर्त्तस्पर्शिनी तिथिर्ग्राह्या तिथिसाम्ये तिथिवृद्धा
वपि मुहूर्त्तत्रयमेव मुख्यं मुहूर्त्तद्वयं त्वनुकल्पः॥ एतदेव सूचयितुं द्विमुहूर्त्तापि त्यपिश
ब्दः पठ्यते॥ न च क्षयवृद्ध्युपजीवनेन निर्णयः क्रियते सा चानुपपन्नः व्यासवाक्ये ह्रा
सवृद्ध्योश्चोदनायामपि ... विषयत्वेनाभिधानात्॥ एकोद्दिष्टादिवृद्ध्यादौ ह्रासवृद्ध्यादिचोदने
ति हि पूर्वमुदाहृतं॥ दानव्रते च दैवे अतः कथं मनयोर्वृद्धिक्षययोर्भ्यां निर्णयः किंचोदा
हृतेषु याज्ञवल्क्यस्कंदपुराणगार्ग्यवचनेषु ह्रासवृद्धिकारणं मिलस्ति॥ तत्कथमत्र ह्रास
वृद्धेर्निर्णयकारणत्वं अत्रोच्यते॥ संति ह्यन्यानि ह्रासवृद्धिवाक्यानि तत्रोशनाः॥ खर्वो द
र्पस्तथा हिंस्रास्त्रिविधं तिथिलक्षणं॥ खर्वदर्पौ परौ पूज्यौ हिंस्रा स्यात्पूर्वकालिकीति पितामहः
... खर्वो दर्पस्तथा हिंस्रास्त्रिविधं तिथिलक्षणं॥ खर्वदर्पौ परौ पूज्यौ हिंस्रा पूर्वत्र पूज
... खर्वो दर्पस्तथा हिंस्रा त्रिविधं तिथिलक्षणं॥ खर्वदर्पौ परौ का
र्यादिति॥ भविष्योत्तरेपि॥ खर्वो दर्पस्तथा हिंस्रा त्रिविधं तिथिलक्षणं॥ खर्वदर्पौ परौ का
र्यौ हिंस्रा स्यात्पूर्वकालिकीति॥ खर्वः साम्यमल्पक्षयो वा दर्पो वृद्धिर्हिंस्रा अधिकक्षयः॥
एतेः सर्वोद्विवाक्यः स ह यस्मिन्विषये युग्मादिवाक्यविरोधः प्राप्नो

तितत्र देवपित्र्यभेदेन व्यवस्थापकं व्यासवाक्यं तनु प्रकृतयोः क्षयवृद्ध्योः पित्र्यविषयत्वं प्रतिपा
माध० दकं यत्तु वल्ल्यादिवचनेष्वपि कर्मकालव्याप्तिशास्त्रस्य खर्वदर्पादिशास्त्रस्य वचनविरोधे
॥५९॥ प्राप्ते सति कर्मकालव्याप्तिशास्त्रस्य प्राबल्यमुच्यते॥ ननु प्रकृतयोः क्षयवृद्ध्योर्निर्णयहेतु
त्वं प्रतिषिध्यते॥ ननु व्यासः खर्वादिवाक्यानि पित्र्यविषयत्वेन संकोचयामास यात्तर्व
ल्यादयस्तु पित्र्येपि कर्मकालव्याप्त्या खर्वादिवाक्यान्यबाधंतां हंत एवं निर्विषयत्वं तेषां प्रसज्येते
ति चेन्नैवं यदा पूर्वोत्तरयोर्दिनयोः पित्र्यविषया कर्मकालव्याप्तिः समाना यदि वा दिनद्वये
पि कर्मकालव्याप्त्यभावः समानः तत्रोभयत्र खर्वादिवाक्यैर्निर्णेतुमशक्यत्वात्॥ आस्तां प्रास
ङ्गिकी खर्वादिवाक्यचिंता॥ प्रकृते तु सूर्योदयमुहूर्तत्रयव्यापिनी प्रतिपद्दानेन व्रतयोर्गृहीत
व्याः॥ एवं च सत्युदयमात्रव्याप्तिशास्त्रं घटिकामात्रशास्त्रं च वैश्वानराधिकरणन्यायेनावयु
त्यानुवादरूपतया त्रिमुहूर्तव्याप्तिं प्रशंसति अथवा यदा पूर्वेद्युरुदयकालं परित्यज्योपरिस्थ
वेत्र व्याप्नोति परेद्युरुदयकालमात्रं व्याप्नोति॥ तदानीमुदयानंतरभाविन्यां मुख्यायां त्रि
मुहूर्तव्याप्तेर्दिनद्वयेप्यभावेन द्वयोरपि दिनयोर्गौणकालत्वे सति किं ग्राह्यमिति विवक्षायां ॥त्रिव॥
पूर्वदिने कर्मकालपूर्वव्याप्तेर्भूयस्त्वात्तस्यैव ग्रहणं न्यायतः प्राप्तं केनापि निमित्तेन तत्र प्रसहेस ॥५९॥

स्नो दिवसोऽभ्यनुज्ञायते॥ अत एव देवलः॥ यां तिथिं समनुप्राप्य उदयं याति भास्करः॥ सा तिथिः
सा तिथिः सकला ज्ञेया स्नानदानजपादिषु इति॥ व्यासोपि॥ उदयन्नेव सविता यां तिथिं प्रतिपद्य
ते॥ सा तिथिः सकला ज्ञेया दानाध्ययनकर्मस्विति॥ भविष्योत्तरेपि॥ व्रतोपवासनियमे घटिके
का यदा भवेत्॥ सा तिथिः सकला ज्ञेया पित्र्यर्थे चापराह्णिकीति॥ पद्मपुराणेपि॥ व्रतोपवास
नियमे घटिकैका यदा भवेत्॥ उदये सा तिथिस्तत्र विपरीता तु पैतृक इति॥ स्कंदेपि॥ व्रतोपवा
सस्नानादौ घटिकैका यदा भवेत्॥ उदये सा तिथिर्ग्राह्या विपरीता तु पैतृक इति॥ विष्णुधर्मोत्त
रेपि॥ व्रतोपवासस्नानादौ घटिकैका यदा भवेत्॥ उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामि
नीति॥ बौधायनोपि॥ आदित्योदयवेलायां याल्पापि च तिथिर्भवेत्॥ पूर्णा इत्येव मंतव्या
प्रभूता नोदयं विनेत्यपि इति॥ नन्वेवं कृत्स्नदिवसाभ्यनुज्ञास्तु तथाप्युत्तरविधायास्तिथेः ग्र
हणे किं परिमाणमुदये सिक्षणीयमिति विवेचनीयं॥ तत्र बौधायनेनाल्पापीत्यभिधा
नान्निमेषमात्रं प्रतिभाति॥ ततो व्यासवाक्येपि प्रतिभाति उदयन्नेवेत्यभिधानात्॥ भविष्य

लिपरेद्युः कर्मकालव्याप्तिसंपादनाय पूर्णत्वमभिधायोदयविहीनस्य व्याप्तिबाहुल्यस्येह
यत्वोक्तिव्याजेन तदेव प्रशस्यते ॥ आदित्योदयवेलायां त्वल्पापि च तिथिर्भवेत् । पूर्णा इत्येवमं
तव्याप्रभूतानोदयं विनेति ॥ तदा पूर्वेद्युः संगवमारभ्य परेद्युरुदयात्प्रागेव तिथिक्षयवशा
त्प्रतिसमाप्ता तदा यद्यपि दिनद्वये सोदयमुहूर्तत्रयस्पर्शो नास्ति तथापि पूर्वेद्युरेवानुष्ठेया प्रा
तिथिः सकलाज्ञेया यस्यामस्तमितो रविरिति ॥ वचनेन संपादनीयायाः सोदयत्रिमुहूर्त
व्याप्तेर्विद्यमानत्वात् । परेद्युस्तादृग्व्याप्त्यभावात् ॥ यदा पूर्वेद्युरुदयादारभ्य परेद्युरुदया
दूर्ध्वं मुहूर्तत्रयं वर्धते तदानीं यद्यपि द्वयोर्दिनयोः सोदयत्रिमुहूर्तव्याप्तिरस्ति तथापि पूर्वे
द्युरेवानुष्ठानं युक्तं अस्तमयव्याप्तेरधिकत्वात् ॥ अतएव पद्मपुराणेऽपि विहितं ॥ व्रतेस्नाने
तथा नक्ते पित्र्यकार्ये विशेषतः ॥ यस्यामस्तंगतो भानुः सा तिथिः पुण्यभाक् भवेदिति ॥ न
न्वास्तां सोदयात्रिमूर्त्तव्याप्तिरस्तमयव्याप्तिश्च निर्णयस्तु शुक्लकृष्णपक्षाभ्यां भविष्यति ॥
तथा च मार्कण्डेयः ॥ शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ॥ कृष्णपक्षे तिथिर्ग्राह्या
यस्यामस्तंगतो रविः ॥ इति ॥ विष्णुधर्मोत्तरेऽपि ॥ वर्धमानेदुपक्षस्य उदयप्राज्यते तिथिः ॥

माध०
॥६०॥

यदा चेंदुक्षयं याति तदा स्यादापराह्णिकीति॥ अथवा पक्षद्वयक्षयाभ्यां निर्णेतव्यं॥ तथाच
वृद्धवसिष्ठः॥ वर्धमानस्य पक्षस्य उदये पूज्यते तिथिः॥ यदा पक्षः क्षयं याति तदा स्यादाप
राह्णिकी॥ बौधायनोपि॥ सा तिथिस्तच्च नक्षत्रं स्यामभ्युदितो रविः॥ वर्धमानस्य पक्षस्य
हानौ स्वस्तमयं प्रतीति॥ अत्रोच्यते॥ न ताव शुक्लकृष्णाभ्यां पक्षाभ्यां निर्णयः संभवति
तथा च बहुवचनबाधकप्रसंगात्॥ तथा हि॥ यानि वचनानि पूर्वविद्धायां शुक्लप्रतिपद्यु
पवासविधायकानि पूर्वमुदाहृतानि तानि बाध्येरन्॥ तथा कृष्णप्रतिपदः परविद्धायां उ
पोष्यत्वं निराकृतं॥ तच्च विपरिवर्त्तेत॥ एवमेकभक्तादावपि यथायोगं बाधविपरिवृत्ति उभे
यानापि पक्षक्षयवृद्धिभ्यां निर्णयो युज्यते॥ तत्राप्युक्तदोषस्यापरिहार्यत्वात्॥ यदा शु
क्लपक्षस्तिथिवृद्ध्या षोडशदिनात्मको भवति॥ तदानन्तपरविद्धायां शुक्लप्रतिपद्युपवासः
प्राप्नोति कृष्णपक्षस्य तिथिक्षयवशाच्चतुर्दशदिनात्मकत्वे पूर्वविद्धायां कृष्णप्रतिप ॥श्रीव॥
द्युपवासः॥ प्राप्नोति॥ एवं बाधोत्तरमुन्नेयं॥ अस्मिंश्च शुक्लकृष्णपक्षवाक्यस्य विना ॥६०॥
पि अन्यबाधं विषयं विशेषः॥ तथा ह्यां गिरसा स्मर्यते॥ संपूर्णा दशमी कार्या परया

ण्ड्यते॥ ॥तत्रसामान्येनापराह्णव्याप्रतिपत्पित्र्येवाविहिता॥ प्रतिपत्सुवर्धितेया याभवेदापरा
ह्णिकी॥ दैवंकर्मतथातेयंपित्र्येवामनुरब्रवीदितिहिव्यासवाक्येपूर्वमुदाहृतं॥ पित्र्यंचद्विविधं॥ एको
द्दिष्टंपार्वणंच॥ तयोस्वरूपमाहकूर्मः॥ एकमुद्दिश्ययच्छ्राद्धंएकोद्दिष्टंप्रकीर्तितं॥ त्रीनुद्दिश्यतु
यत्क्रियतेपार्वणंमुनयोविदुरिति॥ तस्यप्रतिपदस्तस्यतद्दिनेकर्तव्यतामाहयाज्ञवल्क्यः॥ संव
त्सरांतरवृत्तिन्यांतस्यांप्रतिपद्येकोद्दिष्टस्वरूपंमासिकंप्रसक्तं॥ संवत्सरांतवर्तिन्यांतस्यांप्रतिप
द्दिपार्वणरूपमाब्दिकंश्राद्धंप्राप्नोति॥ तस्यमासिकस्यतद्दिनेकर्तव्यतामहायाज्ञवल्क्यः॥ मृ
तेहनितुकर्तव्यंप्रतिमासंतुवत्सरं॥ प्रतिसंवत्सरंचैवमाद्यमेकादशेऽहनीति॥ तेषांचमासिकानां
मेकोद्दिष्टत्वात्रूपत्वंपैठीनसिराह॥ षण्मासिकाब्दिकेश्राद्धेस्यातांपूर्वेद्युरेवते॥ मासिकानिस्वकी
येतुदिवसेद्वादशेऽपिवा॥ सपिंडीकरणादर्वाक्कुर्याच्छ्राद्धानिषोडश॥ एकोद्दिष्टविधानेनकुर्या
च्छ्राद्धानितानिवैति॥ अयमर्थः॥ ऊनषाण्मासिकसप्तममासगतान्मृताहदिनात्पूर्वेद्युरेवानुष्ठेय॥
ऊनाब्दिकंतुद्वितीयवत्सरादौमृताहदिनात्पूर्वेद्युःकर्तव्यं॥ मासिकानितुतत्तन्मासमृताहदिनेनु
ष्ठेयानि॥ सएषःमुख्यःकल्पःयदातुद्वादशाहेसपिंडीकरणंतदातस्मात्पूर्वंयस्मिन्कस्मिन्नह ॥श्रीव॥
निमासिकान्यानुष्ठेयानिसोयमनुकल्पः॥ पक्षद्वयेप्येकोद्दिष्टविधानमेवनतुपार्वण

विधानमिति॥ अत्रेदंचिंत्यते॥ किमेकोद्दिष्टेपराह्णव्यापिनीतिथिर्ग्राह्या॥ किंवासायाह्नव्या
पिनीउतास्तमयव्यापिनीआहोस्वित्मध्याह्नव्यापिनीति॥ नचात्रपक्षांतराणिसंभाव्यंते॥
तत्प्रापकाभावात्॥ ननुयुग्माग्निवाक्यंतिथिह्रासवृद्धिवाक्यंशुक्लकृष्णपक्षवाक्यं॥ पक्षक्षय
वृद्धिवाक्यंकर्मकालव्याप्तिवाक्यंवापक्षांतरप्रापकंभविष्यति॥ मैवं॥ पक्षक्षयवृद्धिवाक्यस्य
शुक्लकृष्णपरत्वेनव्याख्यातत्वात्॥ शुक्लादिवाक्यंतुपूर्वोत्तरयोस्तिथ्योःशास्त्रांतराभ्यांप्रा
प्तिसाम्येसति॥ पुरुषेच्छानिवारणायव्यवस्थायकमित्युक्तं॥ तिथिह्रासवृद्धीतुकर्मकालेनबा
ध्येते॥ कर्मकालवाक्येसाक्षादेवह्रासवृद्ध्यनकारणमित्युक्तत्वात्॥ युग्मवाक्यंतु॥ नपित्र्य
विषयं॥ कर्मकालश्चैकोद्दिष्टस्यनाद्यापिनिर्णीतः॥ अतोनपक्षांतरसंभवः॥ उपन्यस्तेषुतुप
क्षेषुप्रथमंतावत्सामान्यविशेषशास्त्राभ्यामपराह्णव्यापिनीतिथिःप्रतिभाति॥ अपराह्णिकः
स्तथालेयापित्र्यर्थेतुशुभावहाइति॥ निगमवाक्यंपूर्वमुदाहृतं॥ हारीतोपि॥ अपराह्णःपि
तृणांतुयापराह्णानुयायिनी॥ साग्राह्यापितृकार्येतुनपूर्वास्तानुयायिनीति॥ बृहन्मनुरपि॥ यस्या
मस्तंरविर्यातिपितरस्तामुपासतेतिथिंतेभ्योयतोदत्तोह्यपराह्णःस्वयंभुवेति॥ तदेतत्सामान्यशा
स्त्रंतिथिमात्रमुपजीव्यप्रवृत्तत्वात्॥ प्रतिपत्सुवर्धितेयायाभवेदपराह्णिकीति॥ तुविशेषशास्त्रे
~~तुविशेषे~~ तिथिविशेषोपजीवनेनप्रवृत्तत्वात्॥ ताभ्यामुभाभ्यांशास्त्राभ्यांप्रथमपक्षस्तुतिष्ठति

माघ०
॥६२॥

द्वितीयपक्षेप्यस्ति वाक्यद्वयं बौधायनः॥ उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ॥ द्विमुहूर्त्तं त्रिरह्नश्च
सा तिथिर्हव्यकव्ययोरिति॥ वचनार्थस्तु पूर्वं व्याख्यातः॥ तदेतत्सायाह्नव्याप्तेः सामान्यशास्त्रं वि
शेषस्तु पैठीनसिना॥ दर्शितः॥ पंचमी सप्तमी चैव दशमी च त्रयोदशी॥ प्रतिपन्नवमी चैव कर्त्त
व्या संमुखी तिथिरिति न चात्र प्रतिपदः सांमुख्यमात्रं प्रतीयते न तु सायाह्नव्याप्तिरिति शं
नीयं॥ संमुखी नाम सायाह्नव्यापिनी दृश्यते यदेति। स्कंदपुराणे॥ सांमुख्यस्य व्याख्यातत्वात्॥
अस्तमयव्यापित्वपक्षो वृद्धयाज्ञवल्क्येन दर्शितः॥ देवकार्ये तिथिर्ज्ञेया यस्यामभ्युदि
तो रविः॥ पितृकार्ये तिथिर्ज्ञेया यस्यामस्तमितो रविरिति। तथा दानक्रियायामुदाहृते
षु घटिकाव्याप्तिवाक्येष्वस्तमये घटिकाव्याप्तिः पित्र्ये दर्शिता तदेतदुपन्यस्तपक्षत्रयं नैको
द्दिष्टविषयं पित्र्यकर्मसामान्यमुपजीव्य प्रवृत्तत्वात्॥ एकोद्दिष्टे चतुर्थः पक्षो वाचनिकः॥
तथा च वृद्धगौतमः॥ मध्याह्नव्यापिनी या स्यात् सैकोद्दिष्टे तिथिर्भवेत्। अपराह्णव्यापिनी या
पार्वणे साभवेत्तिथिरिति॥ शिवराघवसंवादेपि मध्याह्नव्यापिनी या स्यादेकोद्दिष्टे तिथिर्भ
वेत्। सायाह्नव्यापिनी या स्यात् पार्वणे सा तिथिर्भवेदिति। कर्मकालव्याप्तिशास्त्रेणाप्यय
मेव चतुर्थः पक्षः प्राप्यते मध्याह्नस्यैकोद्दिष्टकर्मकालत्वात्॥ तथा च हारीतः॥ तस्पाता तपोअ ॥श्रीव५
मश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं तु मध्यमे॥ पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकं॥ स्मृत्यंत ॥६२॥

पूर्वयाथवा॥ युक्ता न दूषिता यस्मादिति सा सर्वतोमुखी॥ तत्र शुक्लकृष्णपक्षाभ्यां व्यवस्था कर्त्तव्या॥
पक्षवृद्धिक्षयवाक्यमपि पूर्वेण समानविषयतया व्याख्येयं। वर्द्धमानस्य चंद्रस्य यः पक्षस्तत्से
त्तियोजनीयं॥ तथा यसति शुक्लपक्ष इत्यर्थः संभवति॥ यदा पक्षः क्षयं याति इत्यत्रापि पक्षनिवृ
हकर्मदुःक्षयं यातीति व्याख्याने कृष्णपक्ष इति लभ्यते॥ अथो यथोक्तं सोदयत्रिमुहूर्त्तव्याप्ति
केतो निर्णयः सुस्थितः॥ अत्राप्येकभक्तवत्षोढाभिधीयते॥ उदयकाले पूर्वेद्युरेव त्रिमुहूर्त्तव्या
पिनी॥ परेद्युरेव त्रिमुहूर्त्तव्यापिनी उभयत्रापि त्रिमुहूर्त्तव्यापिनी नोभयत्र त्रिमुहूर्त्तस्पर्शिनी॥
उभयत्रापि साम्येन वैषम्येण वा त्रिमुहूर्त्तैकदेशिनी चेति॥ अत्र प्रथमपक्षे स्वं उक्ततिथिला
भावान्नास्ति संदेहः॥ तृतीयादिषु चतुर्षु पक्षेष्वस्तमयव्याप्तेः कर्मकालत्वात् ह्युल्यस्य च
लाभात्पूर्वेद्युरेवानुष्ठानं॥ द्वितीये पक्षे तु क्षयगामित्वे त्रिमुहूर्त्तमप्युत्तरविद्धां परि
त्यज्य पूर्वेद्युरेवानुष्ठानं॥ वृद्धिगामित्वे साम्ये च परेद्युरिति निर्णयः॥ दृष्टांगभूता
प्रतिपत्पूर्वेनिर्णये वक्ष्यते॥ इति दानव्रतनिर्णयः॥ ॥ उक्तान्यपवसैकभक्तनक्ताया
चितदानव्रतानि प्रतिपदद्वितीयायां तावतादेवविषयो निर्णयः सुस्थितः॥ अथ पित्र्यं नि

रेपि॥ पूर्वाह्णे वैदिकं श्राद्धं अपराह्णे तु पार्वणं॥ एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तक
मिति॥ व्यासः॥ एकमुद्दिश्य यच्छ्राद्धं दैवहीनं विधीयते॥ एकोद्दिष्टं तु तत्प्रोक्तं मध्याह्ने तस्य की
र्त्तितमिति॥ मध्याह्नश्च सप्तमाष्टमनवममुहूर्तात्मकः॥ तत्र च मुहूर्त्ता गांधर्वः कुतपः रौहिण
संज्ञकाः॥ तत्रैकोद्दिष्टस्योपक्रमेणो कुतपस्य पूर्वोत्तरभागाविषयाविकल्पितौ यदाह
व्यासः॥ कुतपः प्रथमे भागे एकोद्दिष्टमुपक्रमेत्॥ आवर्तनसमीपे वा तत्रैव नियतात्मवा
नृ इति॥ समाप्तिकालमाह स्तोकगौतमः॥ आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः॥ विधि
ज्ञो विधिमास्थाय रौहिणं तु न लंघयेदिति॥ तदेवं कुतपरौहिणयोर्मध्याह्नगतमध्यमत्व
भागयोः कर्मकालत्वेन व्यवस्थितयोः सतोः तन्मुहूर्त्तद्वयव्यापिनी तिथिरेकोद्दिष्टे ग्रहीतव्ये
ति स्थितं॥ अत्राप्येकभक्तवत् षड्भेदा अवतरणीयाः॥ तत्र पूर्वेद्युरेव परेद्युरेव वा म
ध्याह्नव्याप्तिरित्येतयोः नैकोपि संदेहः॥ उभयत्र तद्व्याप्तित्वं तत्स्पर्शाभावे चेत्तन
पयोः पूर्वेद्युरेवानुष्ठानं॥ तथा सति पूर्वोदाहृतान्यपराह्णसायाह्नास्तमयव्याप्तिविष
याणि पित्र्यसामान्यवचनान्यनुगृहीतानि भविष्यंति उभयत्र साम्ये नैकदेशव्याप्तौ

खर्वादिवाक्यं द्रष्टव्यं ॥ तच्च पार्वणप्रस्तावे योजयिष्यते वैषम्ये त्वेकदेशव्याप्तौ यदा पूर्वेद्युर्महतीत दामह
त्वानुग्रहात् ॥ सामान्यवचनानुग्रहाच्च पूर्वेद्युरेवानुष्ठानं यदा तु परेद्युरेव महती तदा सामान्यशास्त्र
मुपेक्ष्यापि महत्त्वमेवादरणीयमिति ॥ पार्वणश्राद्धनिर्णये वक्ष्यते ॥ अतस्तेनैव न्यायेनाचा
पि परेद्युरेवानुष्ठानं द्रष्टव्यं ॥ इत्यष्टकोद्दिष्टनिर्णयः ॥ अथ पार्वणश्राद्धं निरूप्यते ॥ पर्वण्य
मावास्यायां विहितं पार्वणं ॥ तच्च तत्कालं च गौतम आह ॥ दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकी
र्त्तितं ॥ अपराह्णे पितृणां तु तत्र दानं विशिष्यते ॥ यद्यप्येतद्दर्शं पार्वणं प्रतिपद्दिनं प्राप्नोति
तथापि कृतिरूपतया त्रिपुरुषोद्देशेन कर्त्तव्यस्याह्निकस्य काम्यादेः पार्वणत्वं व्यवहर्तुं शक्यं अ
त एव कएववाक्यं पूर्वमुदाहृते ॥ त्रीनुद्दिश्य यत्क्रियते पार्वणं मुनयो विदुरिति तथा सति प्रति
पद्दिने तस्यावसारोऽते तन्मासतत्पक्षवर्तिन्यां प्रतिपद्याह्निकरूपं पार्वणं प्राप्नोत्येव एतस्या
र्थस्य प्रतिपादकवचनं मलमासप्रस्तावे दर्शितं ॥ मासपक्षतिथिस्पृष्टे यो यस्मिन्म्रिय
तेऽहनि ॥ प्रत्यब्दं तु तथाभूतं तस्य तद्ददुरिति ॥ वृद्धस्तपुराणेपि प्रतिपत्सं वत्सरका
ये मातापित्रोर्मृतेऽहनि ॥ पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि ॥ इति ॥ काम्यं तु पार्वण

माध०
॥ ६४॥

निरूप्यते॥ तथा शातातपोक्तो विधिरुदाहृतः॥ अपराह्णे पितॄणामिति तया वाक्यांतरमप्यपि मनुः॥
श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते इति। एवं मनुहारीतवचनेऽप्येकोद्दिष्टप्रस्तावे उदाहृतौ।
अपराह्णस्स्वयंभुवेति। अपराह्णः पितॄणामिति च श्रुतिः अपराह्णः पितॄणामिति शंखः पूर्वा
ह्णे दैविकं कर्म अपराह्णे पितुः क्रिया॥ ग्रहणे निशि वा कुर्यान्न रात्रौ पैतृकं पुनरिति। स्मृत्यं
तरेपि॥ अपराह्णे पैतृकमिष्टं॥ ननु सायाह्नस्यापि कर्मकालत्वं कुर्वित्स्मर्यते॥ दिनांते पंचना
ड्यस्तु पुण्याः प्रोक्ता मनीषिभिः॥ उदयेवत्तथापि स्युर्दैवे पैत्र्ये च कर्मणीति। मैवं। यमेन प्रति
षिद्धत्वात्॥ सायाह्नस्त्रिमुहूर्तः स्यात् श्राद्धं तत्र न कारयेत्। राक्षसी नाम सा वेला गर्हिता स
र्वकर्मस्विति। तर्हि पंचनाडीवचनं निर्विषयं स्यादिति चेन्न केनापि निमित्तेनापराह्णासंभवे
गौणकालत्वाभ्यनुज्ञापरत्वात्। अत एव व्यासः॥ स्वकालातिक्रमे कुर्याद्रात्रेः पूर्वं यथाविधीति।
व्याघ्रपादोपि। विधिज्ञः श्राद्धयोपेतः सम्यक्पात्रनियोजकः। रात्रेरप्यन्यत्र कुर्वाणः श्रेयः ॥ शिव ॥
प्राप्नोत्यनुत्तममिति। ननु सायाह्नेपि यथाकथंचित्प्रत्यूहस्तदा किं श्राद्धस्य लोप एव किंवा
रात्रावपि कर्त्तव्यं शक्यते। तत्र लोप एवेति तावद्ब्रूमः कुतः। मुख्यकालगौणकालयोरुभयो ॥ ६४ ॥

रपि निषेधात्। मुख्यकालत्वे प्रतिषेधति मनुः। रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा॥
संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते इति। नन्वेवं सति ग्रहणश्राद्धमपि प्रतिषिध्यतेति चोदनी
यं। ग्रहणातिरिक्तविषयत्वात्। रात्रौ श्राद्धं न कुर्वीत राहोरन्यत्र दर्शनात्। सूर्योदये मु
हूर्ते च संध्ययोरुभयोस्तथेति। गौणत्वमपि व्यासव्याघ्रपादाभ्यां पर्युदस्तं। रात्रेः पूर्वं रात्रेरन्य
त्रेति ताभ्यामुक्तत्वात्। तस्माद्रात्रौ श्राद्धासंभवे लोप एवेति प्राप्ते॥ ब्रूमः॥ न तावद्रात्रौ श्रा
द्धस्य सर्वात्मना निषेधो वक्तुं शक्यः। आपस्तंबेन रात्रौ श्राद्धसमाप्त्यभ्युपगमात्। न च
नक्तं श्राद्धं कुर्वीतारब्धे चाभोजनमासमापनादिति॥ ननु संध्यासमीपे प्रारब्धस्य वा रात्रौ
समाप्तिप्रसक्तिः। तादृशस्य प्रारंभः स्कंदेन निषिद्धः॥ यः उपसंध्यं प्रकुर्वीत पित्र्यं लोककर्म
वना। स कालः आसुरः प्रोक्तः श्राद्धं तत्र विवर्जयेदिति। मैवं। संध्यासामीप्यस्य मुख्यका
लत्वस्य निषेधात्। गौणकालत्वं तु पूर्वमहितं। तत्र प्रारब्धस्य रात्रौ समाप्तिः संभाव्यते।
नन्वेवमपि रात्रौ समाप्तिरेवाभ्यनुज्ञायते न त्वारंभ इति चेत्। मैवं। आरंभस्यापि तया
समाप्त्या उपलक्षणीयत्वात्। आह्निकश्राद्धपरित्यागप्रत्यवायबाहुल्यस्मरणात्।

माघ०
॥६५॥ तथा च भविष्यपुराणे प्रभासखण्डयोः पठ्यते। मृते हनि पितुर्यस्तु न कुर्यात् श्राद्धमादरात्। मातुश्
चैव वरारोहे वत्सरांते मृते हनि। नाहं तस्य महादेवि पूजां गृह्णामि नो हरिरिति। अन्यत्रापि
भोजकोयस्तु वैश्राद्धं न दैकौकरोति खगाधिप। मातापित्रोः सततं वर्षे वर्षे मृते हनि। स
याति नरकं घोरं तामिस्रं नाम नामत इति। अन्यत्रापि। पतिता स्वामिनो यापि मुखं वियो
षितएव वा। मृताहं समतिक्रम्य चांडालाः कोटि जन्मसु। मरीचिरपि। पंडिता स्वामिनो
मूर्खा स्त्रियोथ ब्रह्मचारिणः। मृताहं समतिक्रम्य चंडालेष्वपि जायते ति। ननु रात्रेरन्त्य
त्र कुर्वाणः श्रेयः प्राप्नोतीत्यनुत्तममिति स्मरणादपराह्णएव मुख्यत्वे न सायाह्नवद्गौ
णत्वेन वा प्रातःसंगवावपि कर्मकालो प्रसज्येत। नायं दोषः त्रिंशुराघवसंवादे प्रातःका
लस्य निषिद्धत्वात्। प्रातःकाले तु न श्राद्धं प्रकुर्वीत द्विजोत्तमः। नैमित्तिकेषु श्राद्धेषु न
कालनियमस्मृत इति। यद्यपि संगवो न साक्षान्निषिद्धस्तथापि कुतपमुहूर्तमुख्योप ॥त्रिवा।
क्रमस्य गांधर्वमुहूर्ते गौणोपक्रमस्याभिधाने सति अर्थान्निषेधः परिशिष्यते। उप
क्रमद्वयस्य त्रिंशराघवसंवादे एव दर्शितं। यहाद्व्यतिरिक्तस्य प्रक्रमः कुतपस्मृतः। कुत ॥६५॥

मपरपक्षे सर्वासु तिथिषु प्रत्येकं विहितं। तथा च याज्ञवल्क्यः। कन्यां कन्याविहीनश्च यशून्वैस
सुतानपि द्यूतं कृषिं च वाणिज्यं द्विशफैकशफांस्तथा। ब्रह्मवर्चस्विनः पुत्रान् स्वर्णरूप्ये स
कुप्यके ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा। प्रतिपत्प्रभृतिष्वेकं वर्जयित्वा चतुर्दशीं।
शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयत इति। मार्कंडेयोपि प्रतिपद्धनलाभाय द्वितीया द्विपद
प्रदा। वरार्थिनी तृतीया तु चतुर्थी शत्रुनाशिनी। श्रियं प्राप्नोति पंचम्यां षष्ठ्यां पूज्यतमो नरः।
गाणपत्यं च सप्तम्यां अष्टम्यां बुद्धिमुत्तमां। स्त्रियं नवम्यामाप्नोति दशम्यां पूर्णकामता। वेदां
स्तथाप्नुयात्सर्वानेकादश्यां क्रियापरः। द्वादश्यां जयलाभं च प्राप्नोति पितृपूजकः। प्रजां मे
धान्यं भूत्नवृद्धिं स्वातंत्र्यं वृद्धिमुत्तमं। दीर्घमायुर्धनैश्वर्यं कुर्वाणस्तु त्रयोदशीं। अवाप्नो
ति न संदेहः श्राद्धं श्राद्धपरो नरः। युवानः पितरो यस्य मृताः शस्त्रेण वा हताः। तेन कार्यं चतु
र्दश्यां तेषां तृप्तिमभीप्सता। श्राद्धं कुर्वन्नमावास्यां यत्नेन पुरुषः शुचिः। सर्वान्कामानवा
प्नोति त्र्यक्षयकसुरुषः सदेति। अतोपि कृतिरूपं पार्वणं प्रतिपदि संभाव्यते। तस्य पार्वण
स्यापि तां तिथिं नित्यत्वे तु प्रथमतो विधिनिषेधरूपाभ्यामन्वयव्यतिरेकाभ्यामनुष्ठानकालो

पादथचेदर्वाकू आसनं कुतपो भवेदिति ॥ ग्रहो ग्रहणं आदिशब्देन तत्संक्रांत्यादिकं निमित्तमुच्य
ते ॥ तस्य च निमित्ताधीनत्वात् ॥ कुतपो । नानियमितु वक्ष्यते ॥ इत्यतद्वस्य तु सांवत्सरिकोदरश्चि
कुतपनियमास्य च मुख्यमुपक्रमकालः कदाचित्काचिद्बहुश्राद्धस्य सहसा करणीयत्वे सति
कुतपादर्वाचीनो गांधर्वोऽप्युपक्रमतयाभ्यनुज्ञाते यो कुतपमुख्यत्वमनेकवचनविहितत्वा
दवगंतव्यं ॥ तत्र कुतपस्वरूपं भविष्यपुराणेऽभिहितं ॥ प्रविश्य भानुः स्वछायां शंकुवद्यत्र ति
ष्ठति ॥ स कालः कुतपो ज्ञेयः मंदीभूतस्य सर्वत्र येति ॥ आपस्तंबः ॥ सप्तमात्परतो यस्तु नवमा
त्पूर्वतः स्थितः ॥ उभयोरपि मध्यस्थः स कालः कुतपः स्मृतः ॥ स च कुतपो मुख्यत्वाय वायुपुरा
णे प्रदृश्यते ॥ दिवसस्याष्टमे भागे मंदीभवति भास्करः ॥ स कालः कुतपो ज्ञेयः पितॄणां
दत्तमक्षयमिति ॥ कुतपाद्र्वाक्तिरयो गांधर्वरौहिणयोर्गौणोपक्रमकालत्वमुक्तं च विष्णु
कर्तरिस्यायेन मुहूर्तत्रयं कुतपशब्देन व्याजहार नारदः ॥ मध्याह्ने त्रिमुहूर्तेषु यदा व
लति भास्करः ॥ स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयमिति ॥ कुतपे प्रक्रांतस्य सायाह्ना
— — — — — दर्वाचीनः ॥ सर्वोपि मुख्योनुष्ठानकालः ॥ तदुक्तं मत्स्यपुराणे ॥ अह्नो मुहू

माध०
॥६६॥

त्तो विख्याता दत्तापंचत्वसर्वदा ॥ तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः ॥ अष्टमो भास्करो
यस्मान्मंदो भवति सर्वदा ॥ तस्मादनंतफलदस्तत्रारंभो विशिष्यते ॥ ऊर्ध्वं मूर्त्तात्कुतुपाद्यमु
हूर्त्तचतुष्टयं ॥ मुहूर्त्तपंचकं ह्येतत्स्वधाभवनमिष्यत इति ॥ नन्वपराह्णस्यांतिमो भागोभि
षिध्यते ॥ तथा च यमः ॥ चतुर्थे प्रहरे प्राप्ते यः श्राद्धं कुरुते नरः ॥ आसुरं तद्भवेच्छ्राद्धं दाता च न
रकं व्रजेदिति स्मृत्यंतरेपि ॥ चतुर्थे प्रहरे प्राप्ते यः श्राद्धं कुरुते नरः ॥ तदन्नं राक्षसो भुंक्ते निर
शाः पितरो गता इति ॥ नैतन्नाय दोष अपराह्णस्यांतिमेन पराह्णस्य न मुहूर्त्तेन सह सायाह्नः ॥
चतुर्थप्रहरो भवति तत्र सायाह्नभागकराक्षेपणायं निषेधो न त्वपराह्णभागकराक्षेपेणेता
मेतं विवक्षाविरहात् कर्तुयमो वचनांतरेण सायाह्ने निराचकार ॥ तच्च वचनं पूर्वमुदाहृतं ॥
नन्वपराह्णस्य मुख्यकालत्वे न प्रतिनियतं शुक्लपक्षे व्यभिचारात् ॥ तथा मार्कंडेयः ॥ शुक्ल
पक्षे तु पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः ॥ कृष्णपक्षे पराह्णे तु रौहिणं तु न लंघयेदिति ॥ नैष दोषः ॥
अत्र शुक्लेष्ट कृष्णशब्दौ देवपित्र्यपरत्वाद्देवानुद्दिश्य क्रियमाणं श्राद्धं देवं ॥ तच्च फल ॥शिव॥
कामिन उत्साहहेतुतया विप्रसादं जनयतीति शुक्लशब्देनाभिधीते ॥ पित्र्यं तु पितृमरण ॥६६॥

माध॰
॥६७॥

मोत्तिकुवृत्तह्रासवृद्धीनकारणमिति॥मैव॥वचनांतरसंवादेनास्यवाक्यस्यैकोद्दिष्टविषय
त्वेनैकभक्तविषयत्वेनोपपत्तेः॥अपराह्णव्याप्तिरप्येकभक्तन्यायेनपेष्टाभिधते॥तत्रपूर्वे
द्युरेवापराह्णव्याप्तौयथोक्तवचनेनसाम्या॥परेद्युरेवापराह्णव्याप्तौयथोक्तवचनाद्यार
भकालसद्भावाच्चपरेद्युरेवप्रवृत्तास्तातुभयत्रापराह्णव्याप्तित्वेवौधायनआह॥अपराह्ण
द्वयव्यापिन्यतीतस्यचयातिथिः॥क्षयेपूर्वातुकर्त्तव्यावृद्धौकार्यातथोत्तरेपि॥अतितस्य
मृतस्य॥अत्रेदंचिंत्यते॥किंमृताहतिथेःप्रतिपदोवृद्धिक्षयाभ्यांनिर्णयः॥उतोत्तरस्याद्वि
तीयायावृद्धिक्षयाभ्यामितित्तत्रप्रतिपदोवृद्धिक्षयाभ्यामितितावत्प्राप्तं॥खर्वादिवाक्यतु
ल्यतयाप्रतिभासमानत्वात्॥तथाहि॥खर्वोदर्पस्तथाहिंस्रात्रिविधंतिथिलक्षणं॥खर्व
दर्पपरेपूज्येहिंस्रास्यात्पूर्वकालिकी॥इति॥अत्रानुष्ठानीयतिथेरेवधर्माःखर्वादर्पहिंस्राः॥
तत्तुपरितनतिथिधर्मा॥एतच्चदर्शनिर्णयेस्पष्टीकरिष्यं॥खर्वादिवाक्यवदत्रापियाद्यातिथि
गतावेववृद्धिक्षयावितिप्राप्तेब्रूमः॥उत्तरतिथिगतावेवात्रवृद्धिक्षयौनत्वाद्यतिथिगतौ ॥श्रावः॥
कुतःअपराह्णद्वयव्यापित्वाभिधानात्॥पूर्वेद्युःसममध्याह्नावसानममावास्याप्रवृत्तात ॥६७॥

तोपराह्णप्रक्रममारभ्यपूर्वेद्युरपराह्णावसानपर्यंतत्वेसतिप्रतिपदोद्वयपराह्णव्यापित्वं
भवति॥तच्चत्रिमुहूर्त्तवृद्ध्यासंपद्यतेनतुक्षयेण॥तथासतिक्षयेपूर्वातुकर्त्तव्येतिएतन्नो
पपद्यते॥उत्तरतिथिगतवृद्धिक्षयंस्वीकारेसुतरामिदंवचनमुपपद्यते॥तथाहियदपरे
द्युर्द्वितीयासायाह्नेप्रविष्टातितदातिथिवृद्धिस्तत्रपरेद्युरनुष्ठानंनायं॥कुतुपमारभ्य
रौहिणमुख्यकालव्यापित्वात्॥यदाद्वितीयापरेद्युरपराह्णेपिक्रियतीक्षीयतेतदाप्रतिप
त्पूर्वेद्युःकर्त्तव्या॥उत्तरविधायाःप्रतिपदोज्योतिःशास्त्रप्रक्रिययापराह्णव्यापित्वेपिपरि
भाषिक्यास्मात्तप्रक्रिययातदव्यापित्वात्॥तथाचस्मर्यते॥तिथ्यादेभवेद्यावान्ह्रासो
वृद्धिःपरेहनि॥तावान्ग्राह्यःसपूर्वेद्युरदृष्टेपिस्वकर्मणीति॥तिथ्यादीत्यादिशब्देननक्ष
त्रयोगगृह्यते॥तिथिनक्षत्रयोगेषुक्षीयमाणेषुसक्षयोयावत्घटिकापरिमितोभवतितत्
वत्घटिकापरिमितोभवतिवृद्धावल्पमितःक्षयःतेभ्यःपूर्वेषुतिथिनक्षत्रयोगेषुज्योतिःशा
स्त्रेणादृष्टेपिस्मार्त्तपरिभाषयाग्रहीतव्यः॥एवंवृद्धिरपिद्रष्टव्यायथासतिप्रवृत्तेद्वितीया
याअपराह्णेयावान्क्षयःतावान्पूर्वेद्युःप्रतिपदियोजनीयः॥तथासत्युत्तरविधाप्रति

माध० ॥९८॥

पञ्चापराह्णव्यापिनी पूर्वविद्धा तु तद्व्यापिनी सैव ग्राह्या भवति। ननु अस्मिन्वचने स्वकर्मणीत्युच्य
ते॥ ततः स्वकर्मनिमित्तौ वृद्धिक्षयप्रक्षेपइत्यर्थः॥ संपद्यते न च प्रकृतं प्रत्याब्दिकं न द्वितीयायाः
स्वकर्म अतः कथं तदिय वृद्धिक्षययोर्वचनस्यास्य विषयौ भवेतः नैष दोषः माभूत्प्रत्याब्दिकं द्वि
तीयायाः कर्म प्रतिपदस्तु तद्भवत्येव तथा सति प्रतिपदो यत्स्वकर्म तस्मिन्निमित्तभूते सति
तस्यां प्रतिपदि वृद्धिक्षययोः प्रक्षेपणीयावितिवचनार्थः संपद्यते॥ तौ च वृद्धिक्षयौ प्रक्षेपाक
रणे तिथ्यादेरुत्तरत्रेत्यादिगतावित्युपलभ्यते न तु तिथ्यन्तरगतयो वृद्धिक्षययोर्निष्यं। त
त्प्रक्षेपे सति ज्योतिःशास्त्रस्य प्रसिद्धिः सर्वत्र विप्लवेत। तत्तान्तरतो प्रसिद्धिमुपजीव्य प्रवर्त
मानः स्मार्तनिर्णयः सर्वोपि विलुप्येतेति चेत्। मैवं॥ खल्वयं वृद्धिक्षयप्रक्षेपोऽनुष्ठेयतिथि
निर्णयायोपन्यस्यते॥ किं तर्हि शास्त्रान्तरेणानुष्ठेयतिथौ निर्णीतायां तदुपपादनायैता
वापाद्यो वृद्धिक्षयापन्यस्यते॥ यथा दानव्रतयोः शास्त्रान्तरेण त्रिमुहूर्तव्यापिन्यामुदय
तिथिनिर्णीतायां कर्मकालव्याप्त्यभावशंकायामनेनैव सा तिथिः सकलेत्येतद्वचनेनावि ॥त्रिव॥
द्यमानमपि साकल्यमापाद्यते। एवमप्यत्राप्यपराह्णव्यापिनीत्यनेन बोधायनवच

॥द्वित॥

दिस्मारकतया चित्तकालस्यंलनचतीति कस्मराद्देत्वाभिधीयते। शुक्लस्य दैवस्य कर्मणः
पक्षः शुक्लपक्षः॥ यद्वा दैवं श्राद्धं करिष्यामिति बुद्धिस्तदेत्यर्थः॥ एवमितरत्रापि पयोजनीयं॥
एवं च सत्यपराह्णे न पार्वणश्राद्धं व्यभिचरति। रोहिणं तु न लंघयेदित्येकोद्दिष्टविषयं। स
त्यापालतः प्रतीतएवार्थे विवचनस्यास्य परिग्रहे तैत्तदीपूर्वेद्युर्हृतं वचनजातं निखिलम
पि व्याकुलीभवेत्। तदेवं पार्वणश्राद्धस्यापराह्णः कर्मकालः कुतुपः प्रारंभकाल इति॥ भवे
तामेतौ कर्मतदुपक्रमकालौ प्रकृते तु सांवत्सरिकादौ किं प्रतिपत्तव्यं विभागे हि तव्याउतोत्तर
विस्त्येविति वक्षायांदेवस्वामी ब्रूते॥ यस्मिन्काले तु यच्छ्राद्धं विहितं कर्मोपक्रमोपसंहारयुक्तं तस्मि
न्काले तस्यां तिथौ यस्मिन्नहनि संभावयितुं शक्यते॥ तदुक्तं पूर्वेद्युर्ग्राह्यमिति॥ यदा कुतु
पापराह्णोभयव्यापिनी तत्संभवति तदा केवलापराह्णव्यापिन्यपि ग्राह्या तयापि त्यर्थे चापराह्णि
कीति भविष्यत्पुराणाभिधानान्न॥ हारीतोपि अपराह्णः पितृणां तु यापराह्णानुयायिनी॥ सा
ग्राह्या पितृकार्येषु न पूर्वास्तानुयायिनीति॥ ननु केवलापराह्णव्यापिनी वा केवलकुतुप
व्यापिन्यपि सम्यगेतत्प्रेतीयते॥ मध्याह्नव्यापिनी यास्यात्तिथिः पूर्वापरापि वा॥ तत्र क

नेन ज्योतिःशास्त्रप्रसिद्धं द्वितीयायाः पक्षद्वयमुपजीव्य पूर्वविद्धायां प्रतिपदि निर्णीतायां
कुतपादिरूपस्य कर्मकालव्याप्तिमुत्तरविद्धप्रतिपत्कृतो न ग्राह्येति शंकामपनेतुं तिथ्यादिवच
नेनोत्तरविद्धायां प्रतिपद्यपराह्णक्षयमापद्यते ॥ अतो ज्योतिःशास्त्रप्रसिद्धः स्मार्त्तनिर्णय
स्य वानर्थक्यापि विप्लवः यदा दिनद्वयेप्यपराह्णमस्पृष्ट्वा वसिष्ठं किं विकालं व्याप्नोति तदा पूर्ववि
द्धा प्रतिग्रहीतव्या ॥ तदाह मनुः ॥ द्वितीयां व्यापिनी चेत्स्यात् त्यक्ता हेतुर्यदा तिथिः ॥ पूर्वविद्धैव तु कु
र्त्तव्या त्रिमुहूर्त्ता भवेद्यदीति ॥ सुमंतुरपि ॥ न द्व्याह्नव्यापिनी चेत्स्यात्कृता हस्त्यतया तिथिः ॥ पूर्व
स्यां निर्वपेत्पिंडं इत्यंगिरसभाषितमिति ॥ नन्वपराह्णस्पर्शमुभयत्रापि समानः ॥ प्रारंभकाले
तु परेद्युः कुतपः सत्तभावोपि शिष्यते ॥ ततः परविद्धैव कुतो न ग्राह्येति चेत् गुणाधिक्यादिवमू
मः ॥ परेद्युः कुतपव्याप्तिरेकतावगुणः पूर्वेद्युस्तिथिमूलत्वं अस्तमयव्याप्तिश्चेति गुणद्वयं मू
लस्य प्राशस्त्यं नारदीयपुराणे दृष्टं ॥ पैत्र्ये मूले तिथेः प्रोक्तं शास्त्रज्ञैः कालकोविदैरिति ॥
त्रिबरहस्यसौरपुराणयोरपि ॥ प्रायः प्राप्तरूपो व्याहृतिस्तिथिर्दैवफले बुधैः ॥ मूले हि पि
— — — त्तत्स्यार्थं पैत्र्यं चोक्तं महर्षिभिः ॥ इति ॥ अस्तमयव्याप्तेः प्राशस्त्यमाह मनुः ॥

माध० यस्यामस्तं रविर्याति पितरस्तामुपासते। सा पितृभ्यो यथोदत्तो ह्यपराह्णस्वयंभुवेति। एतत्स्मृ-
॥६१॥ त्यर्थमेवोत्तरविद्धा प्रतिषेधेति व्यासः॥ अह्यस्तमनवेलायां कलामात्रानुयातिथिः॥ सैव
प्रत्याब्दिके श्राद्धे नापरा पुत्रहानिदेति न वापराह्णवेलायामविद्यमानतया कर्मकालव्याप्तिर-
हितायां तिथेः अनुपादेयत्वमिति त्रिकनीयं॥ अद्यायास्तद्व्याहेर्विद्यमानत्वात्॥ अत एव वसि-
ष्ठः॥ त्रिव्यस्तमनवेलायां स्पृष्टापूर्णा निगद्यते इति। नारदीयपुराणेपि। पारणे मरणे नृणां तिथि-
स्तात्कालिकी मता॥ पित्र्ये स्तमनवेलायां स्पृष्टापूर्णा निगद्यत इति। उदाहृताभ्यामस्तमयस्प-
र्शवाक्याभ्यां कालत्वमात्रवाक्येन च पूर्वेद्युः सायंकालव्याप्तिर्विवक्षिता परेद्युरपराह्णस्पर्शही-
नस्य पूर्वदिने सायंव्याप्तेरवश्यंभावात्॥ अन्यथा षण्मुहूर्तक्षयप्रसंगादेतदेवाभिप्रेत्य गोभिलेः॥
सायाह्नव्यापिनी या तु पार्वणे सा उदाहृतेति द्वितीयविषये पूर्वविद्धायाः कर्तव्यताभिधानरहस्य
ब्रह्मकैवर्तसौरनारदीयपुराणेषु व्यतिरेकमुखेन दर्शितो। दर्शे च पूर्णमासे च पितुः सांव-
त्सरे दिनं॥ पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते इति। ननु वस्तुत्वमुभयत्रापराह्णस्पर्शा- ॥शिव॥
भावे तथापराह्णद्वयव्याप्त्यनुत्तरतिथिगतवृद्धिक्षयाभ्यां नि र्णयोप्यस्तु उत्तरतिथेः ॥६१॥

माध० ॥७०॥ किंतु समेव वर्तेते इति विषये खर्वदर्पवाक्यान्निर्णयः ॥ तदेवं प्रतिपदि पार्वणरूपमादिकं निर्णीतं ॥
पार्वणरूपस्य तु काम्यस्य दर्शविकारत्वात् ॥ प्रातिस्विकविशेषाभावाच्च वक्ष्यमाणेन दर्शनि
र्णयेनैव निर्णयो वगंतव्यः ॥ ॥ इति श्रीमाधवीये कालनिर्णये प्रतिपन्निर्णयाख्यं तृती
यं प्रकरणं ॥ ॥ अथ द्वितीयामारभ्य पर्वदसानाश्चतुर्दशतिथयो स्मिन्प्रकरणे क्रमेण नि
रूप्यंते ॥ प्रथमद्वितीयादिनां पंचदशकलानां क्रमेण चंद्रमंडलप्रवेशनिर्गमनाभ्यां शुक्लकृ
ष्णपक्षयोः प्रतिपद्द्वितीयादीनां मध्ये यास्तिथयो भवंति ॥ तत्र प्रतिपदो निर्णयः पूर्वप्र
करणे भिहितः स एवोत्तरासु सर्वासु तिथिषु साम्येन संचारयितव्यः ॥ विशेषस्तु तत्र तत्रा
भिधीयते ॥ प्रतिपदि दैवं पित्र्यं च व्यवस्थापितं ॥ दैवं च द्विविधं ॥ उपवासैकभक्तनक्ताया
चितदानव्रतभेदेन तीर्थस्नानजपहोमादयस्तु व्रतशब्देन संगृहीताः पित्र्यं द्विविधं ॥ एको
द्दिष्टं पार्वणं चेति ॥ तत्र सर्वत्र कर्मकालव्यापिन्या एव तिथेरनुष्ठानांगत्वं स्मृतिष्वभिप्रेतं ॥
कर्मकालश्च द्विविधः ॥ मुख्यो गौणश्चेति ॥ तथा एकभक्ते मध्याह्नो मुख्यः ॥ आसायमव ॥श्रिवा॥
शिष्टः कालो गौणः ॥ तिथिव्याप्तिश्च त्रिविधा ॥ स्वाभाविकतिथिव्याप्तिः खाल्पवचनोपादि ॥७०॥

त तिथिव्याप्तिश्चेति तद्यथा ॥ यदा संगवपर्यंतममावास्या तदानीमुपरितनो म
ध्याह्नो मुख्य एव प्रतिपद्व्याप्तो भवति यदा च परा ह्रुद्धिमारभ्य तिथिक्षयवशात् पर्वे
द्युः संगवात् प्रतिपद्भवति तदा पूर्वेद्युः गौणकालव्याप्तिमुपजीव्य एकभक्तानुष्ठानाय त
स्वीकारे सति मध्याह्ने वस्यानुष्ठेयत्वात् तत्र स्वाभाविकप्रतिपद्व्याप्त्यभावे सा कल्यवच
नापादितप्रतिपद्व्याप्तिः स्वीकृता भवति एवं च सति कर्मकालव्याप्तौ सर्वस्मृतीनामत्यंत
निषेधदर्शनात् कर्मकालव्याप्तिशास्त्राभितरेभ्यः प्रबलमिति निश्चीयते ॥ तदनुसारे
ण द्वितीयाद्यास्तिथय उपवासव्रतैकोद्दिष्टादौ पित्र्ये च कर्मकालव्याप्तियुक्ताः स्वीक
र्तव्याः ॥ उपवासस्य सर्वासु तिथिषु नारदीये दर्शितः ॥ शुक्ला वा यदि वा कृष्णा प्रतिपत्प्रभृ
थीः तीस्ति[illegible]ीः ॥ उपोष्येव बलिं दत्वा विधिना ह्यपरेहनि ॥ ब्राह्मणान् भोजयित्वा तु सर्वपा
पैः प्रमुच्यते इति ॥ उपवासस्याहोरात्रः कर्मकालः अतः स्तद्व्यापिनी तिथिर्ग्राह्या ॥ तदसं
भवे त्वपि तिथिकाया ह्येनिरूप्यते ॥ तत्र सूर्योदये त्रिमुहूर्त्ता ततोधिका वा प्रतिपद्भवति
सेयं पर्व[illegible] विधा द्वितीया उत्तरदिने स्तमयादर्वाक् त्रिमूर्तात् ततोधिका वा तृतीया भव

माध०
॥१७१॥

त्ति॥ सेयमुभयरविधाद्वितीया तत्र वेधकतिथ्योरुदये स्तमये वा त्रिमुहूर्त्तत्वं वेधप्रयोजकं
न तु ततो न्यूनत्वं तदेतत्सर्वं हि निसिंधाक्येन पूर्वमुदाहृतं वेध्यतिथेश्चाद्वित्रिमुहूर्त्तत्रयं सद्भावो
पेक्षितद् इति द्विमुहूर्त्तत्रिरद्भिश्चे सनेन सुमन्तु वचनेन प्रदर्शितं॥ उदयास्तमयोरेव वेधद्वैत्य
यमर्थः॥ उदये सा तिथिर्या ह्यपि पूरिता पि चेत्कदाचित्या दिभिः॥ कात्यायनादिवचनेरवग
तव्यः॥ एवं च सति तिथियोदाहृते पूर्वविधोत्तरविद्धे ये ब्रद्वितीये तयोरुत्तरविद्धाद्वितीयोपो
ष्या॥ युग्माग्निवाक्येनान्वयव्यतिरेकाभ्यामुत्तरविद्धायाप्रशस्तत्वविधानात्॥ व्यवद्य
प्युपोष्यत्वे साक्षान्नाभिहितं॥ तथापि कर्मान्तरविशेषस्यानुपादानादुपवासविषयत्वं
परिशिष्यते॥ तथाहि॥ न तावत्त्रिविषयत्वं संभवति॥ व्यासेन युग्मादिशास्त्रस्य व
वीदिशास्त्रस्य च दैवपित्र्यविषयत्वे न व्यवस्थापितत्वात्॥ नाप्येकभक्तनक्तविषयत्वं त
योर्मध्याह्नव्याप्तिप्रदोषव्याप्त्याधीनत्वेन युग्मादिशास्त्रानधीनत्वात्॥ अयाचितस्य
तूपवासवदनुष्ठेयत्वेन पृथग्विषयत्वं नास्ति नापि दानव्रतविषयत्वं॥ दानादेर्यो यो हि
कालतिथौ कर्तव्यं तयमिनिराकुलत्वात्॥ अतउपवासविषयत्वं परिशिष्यते॥ यदि कदा ॥त्रिवध॥
चिदेकभक्तादितिथौ युग्मादिशास्त्रसंवादो भवति॥ तदा तच्छास्त्रमुपोद्बलकं भवतु न व ॥१७१॥

साम्ये तु किं चास्तमतिथिमूलत्वास्तमयव्याप्तिगुणाद्यवशात्पूर्वविद्धा कर्तव्या किं वा कुतपसद्भा
वगुणवशादुत्तरविद्धा तत्राऽपराह्णस्य गौणभावविषयन्यायेन पूर्वविद्धायां प्राप्तायां कर्तव्यता
यां देवस्वामिवचनादुत्तरविद्धेति निश्चयवचनं हि न्यायाद्बलीयः॥ यदा तु दिनद्वयेपि अपराह्ण
व्यापिनी तदापि वैषम्येण तद्व्याप्तेर्महत्त्वेन निर्णेतव्यं॥ तदाह मरीचिः॥ अपराह्णव्यापिनी ये
द्राह्निकस्य यदा तिथिः॥ महती यत्र तां वक्ष्यां प्रशंसंति महर्षयः॥ इति साम्येनोभयत्र व्याप्तिश्च तिथि
गतेर्वृद्धिक्षयसाम्यैस्त्रिधाभिद्यते॥ तथाहि॥ पूर्वेद्युरपराह्णस्य द्वितीयाघटिकामारभ्य पूरे
द्युरपराह्णस्य चरमघटिकां विहाय विशिष्टासु पंचघटिकासु यदा तिथिर्वर्तते तदा पूर्वाह्ण
स्य प्रथमघटिकां द्वितीयापराह्णस्य चरमघटिकां च विहाय वृद्धिः शिष्टासु पंचसु वर्त्तमानत्वात्॥
साम्येनैकदेशव्याप्तिर्भवति घटिकाचतुष्टयेन तु तदा तिथिर्वर्त्तते यदा पूर्वाह्णस्य चरमघटि
कायां द्वितीयापराह्णस्य प्रथमघटिकायां वर्त्तते तदा साम्येनैकदेशव्याप्तिर्भवति॥ घटि
काचतुष्टयेन तदा तिथिः क्षीयते यदा पूर्वाह्णस्य चरमे घटिकात्रये द्वितीयापराह्णस्य चाघटि
का च ये पि वर्त्ते ते तदापि साम्येनैकदेशव्याप्तिस्तदवस्था तिथिस्तु न वर्धते नापि क्षीयते

यं वारयामः॥ वचनांतरे तु युग्मतिथेरुपोष्यत्वं साक्षात्प्रतीयते॥ तथा च प्रतिपत्प्रकरणे
प्रतिपदमावास्यायुग्मस्योपोष्यत्ववचनमुदाहृतं॥ अत्रापि युग्मात्वाभिप्राये एवं द्वि
तीयायाः परविध्याय उपोष्यत्वं भृगुस्मृतिविष्णुधर्मेषु दर्शितं॥ एकादश्यष्टमी षष्ठी द्वि
तीया च चतुर्दशी॥ त्रयोदशी चतुर्थी च उपोष्याः स्युः परान्विताइति॥ यदा तु पूर्वेद्युरुदय
मारभ्य परेद्युरुदयस्योपरि त्रिमुहूर्त्तं वर्धते तदा पूर्वेद्युरेवोपवासः॥ न चैवं दृष्टे नप
रान्विताइति वचनेन विरोधः शंकनीयः परान्वितपूर्वान्वितयोर्द्वयं प्रसक्तयोरस्य वच
नस्य नियामकत्वात्॥ न चात्र पूर्वान्वितत्वं प्रसक्तमस्ति पूर्वस्य दिनस्य संपूर्णतिथित्वा
त्॥ संपूर्णखंडयोः संपूर्णस्य निःसंदेहत्वेन प्रबलत्वात्॥ असत्त्वात्तद्विरोधित्वं कृत्स्न
कर्मकाले व्याप्तित्वाभ्यां पूर्वदिनस्यैव प्राबल्यं तस्मात्तत्रैवोपवासः॥ ननु पूर्वदिनोपवा
सं प्रतिषेधति व्यासः॥ तृतीयया युता कार्या द्वितीया न तु पूर्वयेति॥ मैवं॥ अस्य वचन
स्य खंडतिथि विषयत्वेन संपूर्णे तिथौ च प्रवृत्तेः खंडतिथेर्विषयत्वं च पूर्वया युत
नेव कार्यत्वाभिधानादवगम्यते॥ ननु खंडतिथावपि द्वितीया पूर्वविद्धोपोष्या॥ प्रतिप

माध० त्वाद्द्वितीयास्यात् द्वितीया प्रतिपद्युते प्राप्तस्तत्वेन प्रतिपद्द्वितीययोर्युग्मत्वाभिधानात्॥
॥७२॥ एतदेव वचनमुपजीव्य कथं प्रतिपत्परविद्धोपोष्येति ॥ पूर्वं निर्णीतं ॥ एवं । तर्हि त्रिमुहूर्तद्वि
तीयापि कुधि पूर्वेद्युरुपोष्या भवतु ॥ तदुक्तं स्कंदपुराणे ॥ प्रतिपत्संमुखा कार्या या भवे
दापराह्णिकी ॥ पूर्वाह्णिकी न कर्तव्या द्वितीया तादृशी विभो इति ॥ तादृशी संमुखा पूर्वयु
तेत्यर्थः ॥ पूर्वेद्युरुदयमुहूर्तं परित्यज्यावशिष्टपूर्वाह्णे संबंधिनी यदा भवति ॥ तदा वेधका
रण्याः पूर्वतिथेः मुहूर्तत्रयाभावे न वेधः समसामर्थ्यात् स्वयं खंडापि सति संपूर्णत्वे पूर्वत्र
योपवासो युज्यते ॥ अत्र द्वितीया न वध्याभिधते ॥ पूर्वेद्युरुदयमारभ्य प्रवृत्ता उदयं परित्य
ज्य प्रवृत्ता पूर्वाह्णे सर्वं परित्यज्य प्रवृत्तेति ॥ त्रयो भेदाः तेष्वेकैकस्य परेद्युस्त्रिमुहूर्त
त्वन्यूनत्वशून्यत्वे सत्वे विद्धे सति मीलितत्वात् ॥ न नविधत्वं संपद्यते ॥ अतः पूर्वेद्युरुदयमा
रभ्य प्रवृत्तायाः संपूर्णत्वे न परेद्युर्मुहूर्तत्रयत्वे तन्यूनशून्यत्वेषु त्रिष्वपि पक्षेषु विवा
दविषयत्वात् ॥ पूर्वत्रैवोपवासो युक्त उदयं परित्यज्य द्वितीयपूर्वाह्णाभावो प्रक्रम्य प्रवृ ॥शिव॥
त्ताः परेद्युस्त्रिमुहूर्ता यां सत्यामपि परयुतोपवासः संभवे युग्मादिवाक्येन तत्परित्यज्य ॥७२॥

माध०
४७३॥

तिथ्यं पूर्वविद्धानिषेधकं वाक्यमाहापस्तंबः॥ तृतीया तु न कर्त्तव्या द्वितीयोपयुता विभो॥ द्विती
यया युतां तां तु यः करोति नराधमः॥ संवत्सरकृते नेह नरो धर्मेण लुप्यते॥ द्वितीयाशेषसंयु
क्तां तृतीयां कुरुते तु यः॥ स याति नरकं घोरं कालसूत्रं भयंकरं॥ द्वितीयाशेषसंयुक्तां
या करोति नरोधमः॥ विमोहिता॥ सा वैधव्यमवाप्नोति प्रवदंति मनीषिण इति॥ स्कंदपुराणे॥
तृतीया तु न कर्त्तव्या द्वितीयासंयुता तिथिः॥ या करोति विमूढात्मा स्त्री पुरुषो वा शिखिध्वज॥
द्वितीयासंयुतां तां तु पूर्वधर्मो विलुप्यते॥ विधवात्वं दुर्भगत्वं भवेन्नास्त्यत्र संशयः॥ कलाका
ष्ठापि यत्र चेद्द्वितीया संप्रदृश्यते॥ सा तृतीया न कर्त्तव्या कर्तव्या गणसंयुता॥ यदिच्छेत्परमं
पुण्यं व्रतकर्त्ता शिखिध्वजेति॥ अत्र पूर्वविद्धानिषेधस्य बाहुल्यात् सा न ग्राह्या॥ युग्म
वाक्यं तु रंभाव्रतविषयं भविष्यति॥ रंभाव्रतं तु भविष्योत्तरे दर्शितं॥ भद्रे कुरुष्व यत्नेन रं
भाख्यं व्रतमुत्तमं॥ ज्येष्ठशुक्लतृतीयायां स्नात्वा नियमतत्परेत्यादि॥ तथात्रैवापरं रंभा
व्रतं पठितं॥ रंभातृतीयां वक्ष्यामि सर्वपापप्रणाशिनीं॥ मार्गशीर्षे तथा मासि तृतीया ॥शिवा॥
यां नराधिप॥ शुक्लायां प्रातरुत्थाय दंतधावनपूर्वकं॥ इत्यादिना व्रतमभिधेयोपसंहृतं॥ ॥७३॥

सौभाग्यार्थं पुरा चीर्णं रंभया राजसत्तम॥ तेन रंभातृतीयेयं वत्स सौभाग्यदायिनी॥ एतस्य रंभाव्र
तस्य पूर्वविद्धायां कर्तव्यत्वं स्कंदपुराणे दर्शितं॥ बृहत्तपा तथा रंभा सावित्री वटपैतृकी॥ कृष्णाष्ट
मी च भूता च कर्त्तव्या संमुखा तिथिरिति॥ तत्रैव॥ पूर्वविद्धानिषेधो रंभाव्रतव्यतिरिक्तविषय
त्वेन पठ्यते॥ द्वितीयया तु विद्धा चेत्तृतीया न कदाचन॥ कर्त्तव्या व्रतिभिस्तात धर्मकामार्थतत्प
रैः॥ विहाय चैकां रंभां तु तृतीयां पुण्यवर्धनीमिति॥ उत्तरविद्धाविधायकं तु ब्रह्मकैवर्त्ते दर्शि
तं॥ चतुर्थीसंयुता यात्र सा तृतीया फलप्रदेति॥ आपस्तंबोपि॥ चतुर्थीसंयुता या च सा तृतीया
फलप्रदा॥ अवैधव्यकरी स्त्रीणां पुत्रसौभाग्यवर्धनीति॥ बृहस्पतिरपि॥ एकादश्यष्टमी षष्ठी
पौर्णमासी चतुर्दशी॥ अमावास्या तृतीया च ता उपोष्याः परान्विता इति॥ अस्य चोत्तरवि
द्धाविधायकस्य रंभाव्रतव्यतिरिक्तविषयत्वं ब्रह्मकैवर्त्ते दर्शितं॥ रंभाख्यां वर्जयित्वा तु तृती
यां द्विजसत्तम॥ अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते इति॥ क्वचित्तु सर्वव्रतेषु पूर्वविद्धैव
तदाह वसिष्ठः॥ एकादशी तृतीया च षष्ठी चैव त्रयोदशी॥ पूर्वविद्धैव कर्त्तव्या यदि न स्यात्प
रेऽहनीति॥ अत्र परेह्नि सत्त्वं त्रेधा विभिद्यते॥ सर्वथैवासत्त्वं द्विमुहूर्त्तासत्त्वं त्रिमुहूर्त्तासत्त्वं

माध०
॥७४॥

त्वंचेति।सर्वथैवासत्वेपूर्वदिनेनुष्ठानमस्तुयदातुपरेहनिघटिकात्रयंघटिकापंचकंचभवतित
दाकथंअस्तिहिमहान्संदेहः त्रिमुहूर्त्ताभावस्यमुख्यकालत्वात् षट्चघटिकापक्षेमुख्यासंभवः
द्विमुहूर्त्तसद्भावेस्यानानुकल्पत्वात्॥घटिकात्रयसंपर्केतस्याप्यसंभवःतत्तदाकिंमुख्यानुकल्प
योरभावात्॥सतत्पूर्वेद्युरनुष्ठानंकिंवापूर्वविधायानिषेधबाहुल्यात्तदपरेहनिअल्पमपिसत्व
माश्रित्यानुष्ठातुंनचात्रकिंचिन्निरूपामकंवचनमस्तिनापिन्यायेननिर्णेतुंशक्यते॥नतावत्प
रदिनंन्याय्यंप्रापकाभावात्नहिमुख्यानुकल्पव्यतिरिक्तःकल्पांतरंसंभवतियेनप्रापकमाश्री
यते।नापिपूर्वदिनंन्याय्यंनिषेधबाहुल्यात्॥वसिष्ठवचनोक्तप्रतिप्रसवेननिषेधोबा
ध्यतइतिचेत्।मैवं॥तस्यवचनस्यपरेद्युरत्यंतासत्वेप्युपपन्नत्वात्॥तस्मादागमन्याययो
रत्राप्रवृत्तेरयोगिनोसर्वज्ञस्यधर्मतत्वसाक्षात्कारासंभवाच्छिष्टाचारएवशरणं॥अ
तव्यासः॥तर्कप्रतिष्ठश्श्रुतयोविभिन्नानासौमुनिर्यस्यवचनंप्रमाणंधर्मस्यमूलंनहि ॥श्रीव॥
तंगुहायांमहाजनोयेनगतःसपंथाइति॥ ॥शिष्टास्तुमुहूर्त्तमात्रसद्भावमाश्रित्यगौरी
व्रतंपरेद्युरेवानुतिष्ठंति।अतोगौरीव्रतंपरेद्युरेवानुष्ठेयं।अन्येषुभविष्यसुरादियुक्ते ॥७४॥

पौर्वाह्णिकवचनेनपूर्वेद्युरेवोपवासोविधीयते।परेद्युस्त्रिमुहूर्त्तस्यनत्वेववेधकारित्वास्त्वती
यायाःसत्यपिवेधसामर्थ्येवेध्यायाद्वितीयायाःत्रिमुहूर्त्ताभावेनवेध्ययोग्यत्वाभावा
त्तत्रोपवासोनप्रसक्तः॥अतःपरिशेषात्पूर्वाह्णवाक्याच्चपूर्वत्रैवोपवासःपूर्वेद्युःपूर्वाह्णं
सर्वंपरित्यज्यप्रवृत्तायाःपरेद्युस्त्रिमुहूर्त्तायांउभयतिथिविधत्वात्कुत्रोपवासइतिसंदेहे
सतिव्यासेनोत्तरदिनविधानात्पूर्वदिनविषेधात्चोत्तरत्रोपवासःनचात्रशुक्लकृष्णपक्षे
व्यवस्थाशंकनीया।युग्मवाक्येनशुक्लकृष्णपक्षसाधारण्येनपरदिनविधानात्कृष्णपक्षे
पितत्प्रवृत्तौबाधाभावाच्चअंत्ययोःपक्षयोःपूर्ववदेवानर्हत्वेनपूर्वेद्युर्वेधनर्हत्वेनपूर्वाह्णिक
त्वाभावेपिपरिशेषादापस्तंबवचनयुग्मवाक्याच्चपूर्वत्रैवोपवासःइतिस्थितंएकभक्ता
दिपार्वणश्राद्धांतेषुकर्मसुद्वितीयाप्रयुक्तविशेषस्यकुत्रचिदप्यस्मरणात्पूर्ववत्प्रतिप
न्न्यायोजनीयः॥ ॥इतिद्वितीयानिर्णयः॥ ॥अथतृतीयानिर्णीयते॥ ॥तत्र
त्रिविधानिवचनानिस्मर्यंते।कानिचित्पूर्वविद्धाविधायकानिकानिचित्पूर्वविद्धानिषे
धकानि॥कानिचिदुत्तरविद्धाविधायकानिइति।तत्रयुग्मवाक्यंपूर्वविद्धाविधायकंप्र

पुविद्धेऽपराह्णादिषु व्रतेषु मुख्यकल्पे नानुकल्पे न वा परेद्युरनुष्ठानं ।। तद्विधयाश्च पूर्व
विधां न निषेधां कल्पद्वयासत्त्वे तु विद्यमानायामपि परेद्युस्तृतीयायां स्वल्पायां तां परित्य
ज्यैव त्रिंशद्घटवचनेन पूर्वेद्युरनुष्ठानं ।। एकभक्तनक्तेतु व्रतांगे व्रतानुष्ठेयस्वतंत्रयोस्तु मध्या
ह्नप्रदोषव्याप्तिवशेनानुष्ठानं रंभाव्रते प्यस्तमयादर्वाक् ।। तृतीयायाः त्रिमुहूर्त्ते सद्भावे
तस्यामेव पूर्वविधायामनुष्ठानं तद्विधायकवाक्येषु संमुखेत्यभिधानात् ।। सा मुख्यस्य
च सायाह्नव्याप्तिकत्वा मुहूर्त्तत्रयन्यूनत्वे सत्ति पूर्वविधायाः प्रापकाभावात् रंभाव्रते पर
विद्धायाअनिषिद्धत्वात् सामान्यवचनैः परविद्धाप्रशंसकैः परेद्युरनुष्ठानं यानि द्वितीयायां
गानिषेधकानि तेषु क्रियतीद्वितीयापि वक्षितेतिचेत् मुहूर्त्तत्रयपरिमितेति ब्रूमः ।। वेदत्रा
स्त्रेतथाभिधानात् ।। यद्य कूलाकाष्ठादिवचनं तत्केमुतिकन्यायेन त्रिमुहूर्त्तत्वं द्रढ
यति ।। ।। इति तृतीयानिर्णयः ।। ।। अथ चतुर्थी निर्णीयते ।। ।। सा च युग्मवाक्या
त् परविद्धा पूज्या ।। चतुर्थ्युक्तपक्षे तथात्वे कृष्णपक्षे पूर्वैव स्यादिति शंकनीयं ।। युग्मवाक्य
स्य पक्षद्वयसाधारणत्वात् चतुर्दश्याश्च पूर्णिमे त्येतच्छुक्लपक्षविषयत्वलिंगमिति चेत् ।।

माध०

॥७५॥

न तस्यैकस्य युग्मस्य शुक्लपक्षविषयत्वेपि द्वितीयादिकानां युग्मानां पक्षद्वयसाधारणत्वस्य वार
यितुमशक्यत्वात् ॥ साहचर्यशक्त्यापि शुक्लपक्षविषयाण्येवेति चेत् । न प्रतिपद्यमावास्ये
त्यनेन पक्षद्वयस्पर्शिना युग्मेन साहचर्यादितरेषामपि पक्षद्वयस्पर्शित्वं किं न स्यात् । ए
वं तर्हि साहचर्ययोर्द्वयोः परस्परकलहादनिर्णय एवेति चेत् तन्न प्रकारांतरेण निर्णेतव्यत्वा
त् । तर्हि चतुर्दशीपूर्णिमायुग्ममेकपक्षवर्त्तितिथिद्वयात्मकत्वात् द्वितीयादियुग्मैः सदृशं
प्रतिपदमावास्यायुग्मं तु भिन्नपक्षद्वयवर्त्तितिथिद्वयरूपत्वाद्विलक्षणं । अतः पूर्णिमायुग्म
साहचर्येण निर्णय इति चेत् । मैवं । श्रुत्या साहचर्यस्य बाध्यमानत्वात् द्वितीयादिशब्दमुख्य
यावृत्त्या पक्षद्वयवर्त्तिनस्तिथीन्ब्रूते । सेयं श्रुतिः । श्रुतिलिंगप्रकरणं । स्थाथश्च श्रुतिसाह
चर्ये लिंगादिषु षट्सु प्रथमं प्रमाणं साहचर्यं तु सन्निधिः स च स्थानावांतरभेदत्वात् पंचमं
प्रमाणं । तच्च प्रथमादत्यंतदुर्बलं ॥ सोयमर्थः । पूर्वमीमांसायां तृतीयेध्याये श्रुतिलिं ॥ त्रिव ॥
गादिसूत्रे महता प्रबंधेन प्रपंचितं सूत्रं चेत्थं । श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्या
नां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति ॥ इममेव श्रुतिसंनिध्योर्विरोधमुद्दिश्याह ॥७५॥

माध० विषयमेवं व्यवस्थितौ सत्यां युग्मशास्त्रेण पक्षद्वयेपि चतुर्थ्यपि परविद्धैव प्राप्नोति ॥ ननु वचनां
॥७६॥ तरेण चतुर्थीद्वयस्य व्यवस्था प्रतीयते ॥ तथा च मार्कंडेयः ॥ शुक्लपक्षे तिथिर्ग्राह्या यस्याम
भ्युदितो रविः ॥ कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविरिति ॥ अत्र वक्तव्यं किमिदं शुक्ला
दिवाक्यं युग्मादिशास्त्रं नियमद्वारा तिथीनां एकवाक्यतया व्यवस्थापकं किं वा स्वतंत्रेण
ति तन्न तावद्युग्मादिमते नियंतुं शक्यं ॥ भागे विरोधप्रसंगात ॥ तथा हि द्वितीयादिषु
पूर्णिमांतेषु षट्सु युग्मेषु षण्णां प्रथमतिथीनामुत्तरविद्धानां पूज्यत्वेन ॥ शुक्लपक्षे तिथिर्ग्रा
ह्या यस्यामभ्युदितो रविरिति ॥ एतत्पूर्वार्धमविरोधि ॥ उत्तरार्धं तु विरोधि तथा तेष्वेव
युग्मेषु चरमतिथीनां पूर्वविद्धानां पूज्यत्वेन कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रवि
रित्युत्तरार्धं अविरोधि पूर्वार्धं तु विरोधि तथा ॥ दर्शप्रतिपद्युग्मेपि कृष्णपक्षगतस्य
दर्शस्योदये पूज्यत्वं शुक्लपक्षगतायाः प्रतिपदोस्तमये पूज्यत्वं तथा सति तत्रोभयत्र
विरोधः स्फुटतरः ॥ तस्मान्न युग्मादिशास्त्रमनेन नियंतुं शक्यं ॥ नापि स्वातंत्र्येण तिथीनां ॥शिव॥
व्यवस्थापकत्वं तत्रापि युग्मादिशास्त्रविरोधस्यापरिहार्यत्वात् ॥ अविरोधेन तु शुक्लादि ॥७६॥

वाक्यस्य दशमीविषयत्वं प्रतिपत्प्रकरणे प्रसंगादुदाहृतं ॥ तस्माच्छुक्लकृष्णयोरुभयोरपि
तियुग्मादिशास्त्राच्चतुर्थी परविद्धा ग्राह्या ॥ बृहद्वसिष्ठोपि ॥ एकादशी तथा षष्ठी अमाव
स्या चतुर्थिका ॥ उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इति ॥ न तु परविद्धोपवासः
कुविसृतिषिध्यते ॥ द्वितीया पंचमी वेधाद्दशमी च त्रयोदशी ॥ चतुर्दशी चोपवासे हन्युः
पूर्वोत्तरे तिथी इति ॥ अयमर्थः ॥ पंचमी स्ववेधेन पूर्वां चतुर्थीं तिथिं ॥ उत्तरां षष्ठीं तिथिमु
पवासविषये हंति ॥ अतः पंचमीविद्धायां चतुर्थ्यां नोपवास इति नैष दोषः व्रतभेदेन व्य
वस्थोपपत्तेः ॥ संति हि चतुर्थ्यां भिन्नदेवताविषयाणि बहूनि व्रतानि ॥ तत्र विष्णुधर्मोत्त
राप्रोक्ते चतुर्मूर्तिव्रते मूर्तिचतुष्टयोपेतो विष्णुर्देवता ॥ स्कंदपुराणप्रोक्ते अंगारकचतु
र्थीव्रते भौमो देवता ॥ कूर्मपुराणोक्ते यमव्रते यमो देवता ॥ सौरपुराणादिप्रोक्तेषु दूर्वा
गणपत्यादिव्रतेषु विनायको देवता ॥ देवलप्रोक्ते नागचतुर्थीतु व्रते शेषतक्षकपालादय
नागा देवता ॥ तत्र विनायकनागव्यतिरिक्तानां देवता नां व्रते परेद्युरुपवासः विनाय
सर्वदेवताः ॥ तत्र विनायकनागव्यतिरिक्तानां कदाचिदुपवासः
– – – – – कनागयोस्तु व्रते मध्याह्नव्यापिनी ग्राह्येति यत्वात् ॥

माध०
८७७॥

पूर्वेद्युः प्राप्नोति तादृशे विषये पंचमीवेधविषयो व्यवस्थापनीयः ॥ तथा पूर्वविद्धाप्रशंसा च
तस्मिन्नेव विषये द्रष्टव्या ॥ अतएव ब्रह्मकैवर्त्तके ॥ पूर्वोत्तरविद्धयोर्विधानिषेधौ स्मर्येते ॥ चतु
र्थी संयुता कार्या तृतीया च चतुर्थिका ॥ तृतीयायां युता नैव पंचम्यां कारयेत्क्वचिदिति ॥ त
था तत्रैव पूर्वविद्धा प्रशस्यते ॥ चतुर्थीसंयुता या च सा तृतीया फलप्रदा ॥ चतुर्थी तु तृतीया
यां महापुण्यफलप्रदेति ॥ तस्याश्च विनायकव्रतविषयत्वं तत्रैव सूचितं ॥ कर्त्तव्या व्रतिभिर्व
त्स गणनाथसुतोषिणीति ॥ स्कंदपुराणेपि ॥ विनायकव्रते कार्या सिंहमासे शुभषण्मुख ॥ च
तुर्थी च तृतीयायुक्ता गणनाथसुतोषिणीति ॥ विनायकव्रतानुष्ठाने चतुर्थ्या मध्याह्नव्या
पित्वं मुख्यं प्रयोजकं ॥ तदाह बृहस्पतिः ॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ॥ म
ध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेहनीति ॥ यदा तु पूर्वेद्युर्मध्याह्नव्यापित्वं भवति तदा
मुख्यप्रयोजकस्य विद्यमानत्वान्मातृविद्धत्वगुणसद्भावाच्च सा ग्राह्या ॥ तादृशे विष ॥शिव॥
ये परेद्युः सत्यामपि मध्याह्नव्यापिन्यां सा त्याज्या ॥ अतएव प्रशस्यत इत्युक्तं ॥ यदा तु
परेद्युरेव मध्याह्नव्यापिनी तदा मातृविद्धात्वगुणाभावेपि प्रधानप्रयोजकानुसारे ८७७॥

रमीमांसायां गुणोपसंहारे विचारितं तथा हि ॥ तांडवशाखायां श्रूयते ॥ ओमित्येतदक्षरमु
द्गीथमुपासीतेति ॥ अस्यायमर्थः ॥ पंचभक्तियुक्तस्य साम्न उद्गीथाख्या भक्तिः कश्चिदवयवः तदवा
वयवमुद्गातायागकाले गायति गीयमाने च तमुद्गीथं नूद्गीतं ॥ स एवोद्गाथा तांडवशाखागतो
पनिषद्विहितैरनेकैर्गुणैरूपमीतेति ॥ ते च गुणास्तांडवशाखायामेवाभिहिताः उद्गीथभक्ति
स्तु तांडवशाखाकौथुमीयतलवकारादिषु सर्वासु सामशाखासु पठिता ॥ तत्र यद्यपि तांडय
शाखोक्तगुणमुपासनं तत्किं तांडवशाखागत एवोद्गीथसामान्यं ब्रूते विशेषव्यवतिष्ठते ॥ किंवा
सर्वशाखागतउद्गीथसामान्ये संचरतीति संशयस्तत्र संनिधिवशात्तदुद्गीथविशेषव्यवती
ति पूर्वपक्षः ॥ उद्गीथशब्दो मुख्यया वृत्त्योद्गीथसामान्यं ब्रूते ॥ न च संनिधिना पंचमप्रमाणे
न प्रथमप्रमाणस्य श्रुतेः संकोचो युक्तः तस्मादुपासनमुद्गीथसामान्ये संचरतीति राद्धां
तः अनेन न्यायेन प्रकृतेपि साहचर्यविधेन संनिधिना द्वितीयादिश्रुतेः संकोचायोगात्तदु
ग्मादिशास्त्रं पक्षद्वयविषयं द्रष्टव्यं ॥ यद्यपि चतुर्दशीपौर्णिमयोः शुक्लपक्षविषयत्वेन संभाव
ततर्हि तत्रैकत्र शुक्लपक्षविषयत्वमस्तु ॥ तथादर्शप्रतिपद्युग्ममपि गत्यंतराभावात्पक्षद्वय

लापरत्वविधेयव्याख्या ॥ तथाच स्मृत्यंतरे ॥ मातृविद्धा प्रशस्ता स्यात् चतुर्थी गणनायके ॥ मध्या
ह्नपरतश्चेत्स्यान्नागविद्धा प्रशस्यत इति ॥ ननु बहुषु वचनेषु पूर्वविद्धाया गणनाथसंतोष
हेतुत्वमुक्तं ॥ अतः पूर्वविद्धात्वस्यैव मुख्यप्रयोजकता युक्ता ॥ मैवं ॥ मध्याह्नव्यापित्वस्य वै
यर्थ्यप्रसंगादावश्यं हि तदा पूर्वविद्धात्वं मध्याह्नव्यापिप्रसंगात् न भवति ॥ अतस्तद्विधानं
व्यर्थं ॥ व्याप्त्यभावाद्दोषोच्यते ॥ पक्षांतरेप्यनेकवचनेविहितस्य पूर्वविद्धात्वस्य वैयर्थ्यं
त्वस्यैव मध्याह्नव्यापित्वेनैव तन्निर्णयादिति ॥ तन्न यदा तथा तिथिक्षयवशात् उभयत्र मध्या
ह्नव्याप्तिर्नास्ति यदा चोभयत्र कृत्स्नमध्याह्नव्यापित्वं तदेकदेशव्यापित्वं वा समानं तत्र
सर्वत्र मध्याह्नव्याप्त्या निर्णयासंभवे सति पूर्वविद्धात्वेनैव निर्णेतव्यत्वात् ॥ एवं तर्हि सावका
शनिरवकाशयोर्निरवकाशो बलीय इति न्यायेन मध्याह्नव्यापित्वस्य निरवकाशत्वात्
तयाप्राबल्यं सिद्धं एवं वक्तव्यं ॥ ननु मुख्यत्वमेवेति चेत् ॥ न मुख्यत्वस्यापि संभवात् ॥ ति
थिनिर्णये कर्मकालव्याप्तिशास्त्रस्य मुख्यत्वमस्य प्रकरणस्य प्रारंभे दर्शितं कर्मकाल
श्च विनायकव्रतस्य मध्याह्नः ॥ प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृपेतिलकल्पे

धृती

माध० ॥७८॥

विधानात्॥ अतो मुख्यत्वादपि मध्याह्नव्यापित्वं प्रबलं॥ ननु कस्यांचित्सप्तम्यां पूर्वविद्धत्वेन म
ध्याह्नव्यापित्वबाध उपलभ्यते॥ जया च यदि संपूर्णा चतुर्थ्यां क्रियते यदि॥ जया सैव हि
कर्त्तव्या नागविद्धां न कारयेदिति स्मरणात्॥ मैवं॥ अस्य वचनस्य दिनद्वये मध्याह्नस्पर्शा
भावविषयत्वेनाप्युपपत्तेः॥ तथा हि पूर्वेद्युर्विनायकव्रतप्रयोजके मध्याह्ने जया संपूर्णा
परेद्युर्मुहूर्त्तत्रयं क्षयवशात् मध्याह्नादर्वाक् चतुर्थी समाप्ता॥ तदा दिनद्वये कर्मकाले
ग्राह्यतिथेश्चतुर्थ्या अभावात्॥ विनायकव्रते किं दिनमुपादेयमिति वीक्षायां पूर्वदिन
विधानाय परदिनं निषेधति॥ अथोच्यते॥ जया च यदि संपूर्णेत्यनेन कर्मकालरूपम
ध्याह्नसमाप्तिपर्यंतत्वं विवक्षितं॥ किं तर्ह्यस्तमयपर्यंतत्वमिति। एवं तर्हि पूर्वविद्धैव ना
स्ति वेधिकायाः पूर्वतिथेः संपूर्णत्वे सति वेध्यायाश्चतुर्थ्या अवकाशाभावात्॥ अथ मा ॥श्रीः॥
भूत्पूर्वविद्धत्वं तथापि जया यां पूर्वविद्धा या परेद्युर्मध्याह्नव्यापित्वबाध्यत एवेति
चेत्॥ मैवं॥ न खलूत्तरदिनस्य हेयत्वे मध्याह्नव्यापित्वं कारणतयोपन्यस्यते॥ किंतु ॥७८॥
नागविद्धत्वं अतो नागविद्धत्वनिंदाया वचनस्य तात्पर्यं॥ न तु चतुर्थ्याः हितं जयावि

माध०
॥७९॥

यावच्च नेदृष्टव्यं॥ ननु यदा दिनद्वयेपि वैषम्येण मध्याह्नैकदेशव्यापिनी तदा पूर्वे पूर्वेदिने तन्महत्त्वे
तत्तदेवोपादेयं॥ उत्तरदिने तन्महत्त्वे किं महत्त्वगुणेन तदुपादेयं किं वा मातृविद्धत्वगुणेन पूर्वमु
पादेयमिति संशये पूर्वमिति ब्रूमः॥ परस्य नागविद्धदोषोपेतत्वात् पूर्वस्य तदभावात्॥ एतदेवा
भिप्रेत्य स्कंदपुराणे पठ्यते॥ मैषा च वटसावित्री तथानंगत्रयोदशी॥ विनायकचतुर्थी च कर्त्त
व्या संमुखी तिथिरिति॥ विनायकव्रतं नागव्रतेपि चतुर्थ्यां मध्याह्नव्यापिन्यां ग्राह्या॥ नागव्रतं च
कूर्मपुराणे विहितं तिथौ युगाद्यायां तु समुपोष्य यथाविधि॥ शंखपालादिनागानां शेषस्य च
महात्मनः॥ पूजा कार्या पुष्पगंधक्षीराप्यायनपूर्वकं॥ विषाणि तस्य नश्यंति न तं दंशंति पन्नगा
इति॥ विनायके च चतुर्थ्यां नागचतुर्थ्यां पंचमीयाविशेषः॥ एवमनेन न्यायेन मध्याह्नव्याप्तौ षो
ढा भेदे सति यदा परेद्युरेव मध्याह्नव्याप्तिः तदा विनायकचतुर्थी परा इतरेषु तु पंचसु भेदेषु
तृतीयायोगस्य प्रशस्तत्वात् पूर्वेद्युरेव सा भवति॥ यदा तु पूर्वेद्युरेव नागचतुर्थी मध्याह्नव्या
पिनी तदा नागचतुर्थी पूर्वा॥ इतरेषु तु पंचसु भेदेषु पंचमीयोगस्य प्रशस्तत्वादुत्तरा भवति ॥शिव॥
तथा शास्त्रे पंचम्यां पूजयेदिति वचनादवसीयते॥ ॥इति चतुर्थीनिर्णयः॥ ॥अथ पं
चमी निर्णीयते॥ युग्मशास्त्रेण पंचमी पूर्वविद्धा ग्राह्या न तु प्रायः प्रातःउपोष्या हि तिथिर्दैव ॥७९॥

फलेप्सुभिरिति शिवरहस्यसौरपुराणयोस्तिथ्यग्रभागस्योपवासांगत्वाभिधानात् पंचम्यु
पवासः परेद्युः प्राप्नोति॥ तन्न हारीतेन परविद्धायाः प्रतिषिद्धत्वात्॥ चतुर्थीसंयुता कार्या
पंचमी परया न तु॥ दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथासिते इति॥ न चैतावता प्रायः प्रातरुपो
ष्या इत्यस्य वचनस्य निर्विषयत्वं शंकनीयं॥ निर्णीतासु निर्णेष्यमाणासु च तिथिषु यत्र यत्र प
रविद्धोपवासः शास्त्रांतरेण प्राप्तः तस्य सर्वस्य तद्विषयत्वोपपत्तेः न चैतेन तेन शास्त्रांतरेणो
पवाससिद्धेः कृतमनेन वचनेनेति शंकनीयं॥ सामान्यविशेषरूपेण हारीतवचनेन शास्त्र
द्वयस्यापि चरितार्थत्वात् तस्य च सामान्यशास्त्ररूपस्य प्रातोपवासवचनस्य विरोधिना षष्ठी
युक्तपंचमीनिषेधकेन विशेषशास्त्ररूपेण हारीतवचनेन बाधो युज्यते॥ एतादृशं बाधमभि
लक्ष्यैव प्रायः प्रातरुपोष्येति प्रायशब्दः प्रयुक्तः प्रतिपन्न्यायेन पौर्वाह्णिकवचनबलात् संबध्य
स्यामपि दानव्रतयोः परदिनानुष्ठानप्राप्तौ तद्बाधनाय हारीतवचने दैवे कर्मणीत्युच्यते॥
ननु दैवे कर्मणि पूर्वाह्णस्य कर्मकालत्वात् कर्मकालशास्त्रप्राबल्यस्य व्युत्पादितत्वात् बा
धायत्तयुक्तमिति शंकनीयं॥ विधेर्निषेधस्य वा प्रतिपदोक्तस्य प्रबलत्वान्न च पूर्वदिनपूर्वा

माध०
॥८०॥

ह्व्यापि यां नास्यंतकर्मकालत्वं साकल्यवचनादित्येके मैकालत्वस्य सद्भावात् ईदृशामेव विषय
मभिलक्ष्य साकल्यवचनस्य प्रवृत्तत्वात् स्वाभाविकतिथ्यासिपुक्ते विषये साकल्यवचनस्य
निरर्थकत्वात्॥ तस्माद्दैवे कर्मणि पंचम्या निषेधो न विरुध्यत इति॥ नन्वेवमपि त्र्येतन्निषेधो
निरर्थकः॥ पित्र्यस्य स्वत एव परविद्धायामप्रसक्तत्वात्॥ मैवं॥ दृष्टांततयापि तदुपन्यासो
पपत्तेः॥ यथा पित्र्ये कर्मण्युत्तरविद्धा न ग्राह्या तथा दैवेपीति विवक्षया दैवपित्र्ययोः सहो
पन्यासः ननु व्यासनिगमगतं॥ शास्त्रमुदाहृतं भवता पंचम्याः पूर्वविद्धत्वमभिधीयते॥
आपस्तंबाब्दयस्तु तद्विपर्यासा युग्मास्तु दाजहुः॥ प्रतिपत्सद्वितीया स्याद्द्वितीया प्रतिपद्यु
ता॥ चतुर्थीसंयुता या च सा तृतीया फलप्रदा॥ पंचमी तु प्रकर्तव्या षष्ठ्या युक्ता तु नारद इति॥
अत एव युग्मशास्त्रपर्यालोचने पंचम्याः परविद्धत्वं प्राप्नोति॥ बाढं अत एवात्र शुक्लकृष्ण
शास्त्रेण व्यवस्था॥ तां व्यवस्थां निबध्नाति हारीतेन शुक्लपक्षे तथासितदृष्टकं॥ न च साव्यव ॥शिव॥
स्थावचनेन निषेधः अशक्या किं हि वचनं न कुर्यात्॥ नास्ति वचनस्यातिभारत्वं इति न्या
त्॥ तस्माद्धारीतवचने न पंचमी पूर्वविद्धा ग्राह्या॥ स्कंदे दपुराणेपि॥ पंचमी च तथा कार्या चि ॥८०॥

धाने अन्यथा चतुर्थीनिंदायामपि तासु यं प्रसज्यते॥ ननु तदुक्तं॥ वरघाताय कन्यामुद्वाहयंनीति
वचनन्यायात् नागविद्धा हेयत्वं कैमुतिकन्यायपरं लक्ष्यते॥ यदि नागविद्धा गणेशस्यापि जया संपूर्णा
तथापि नागविद्धा हेया॥ किमुत जया युक्ता या चतुर्थी संभवत्यामिति हि वचनव्यक्तिः॥ मध्या
ह्नव्याप्तायामतीव भक्तिः कुतस्तवेति चेत् चतुर्थीरहितायां शुद्धतृतीयायां तवापि कुतो भ
क्तिरिति समानः पर्यनुयोगः वचनबलादित्युत्तरं त्वस्माकमपि समानं वचनयोः परस्परकल
हेतु पूर्वोक्ताभ्यां मुख्यत्वनिरवकाशाभ्यां मध्याह्नव्यापिवचनमेव प्रबलं॥ तथापि विनायक
व्रते तस्य प्रतिपदोक्तत्वादपि प्रबलत्वं जयावचनं तु गौर्यादिव्रते चरितार्थं तच्च भविष्यपुराणेभि
हितं॥ विनायकं समभ्यर्च्य चतुर्थ्यां यदुनंदन॥ सर्वविघ्नविनिर्मुक्तः कार्यसिद्धिमवाप्नुयादित्य
भिधायानंतरमिदं पठ्यते॥ निद्रां रंतिं शिवां भद्रां कीर्तिं मेधां सरस्वतीं॥ पूजां पुष्टिं तथा कां
तिं तत्रैवाह्नि पूजयेत्॥ विद्याकामो विशेषेण पूजयेच्च सरस्वतीमिति॥ लिंगपुराणेपि॥ चतु
र्थ्यां तु गणेशस्य गौर्याश्चैव विधानतः॥ पूजां कृत्वा लभेत्सिद्धिं सौभाग्यं च नरः क्रमादिति॥
नारदीयेपि॥ माघशुक्लचतुर्थ्यां तु गौरीमाराधयेद्बुधः॥ चतुर्थ्यां वरदानाय गौरी तत्र सुपू
जितेति॥ अतो यथोक्तरीत्या विनायकव्रते मध्याह्नव्यापित्वेनैव निर्णयः॥ गौरीव्रते तु जया

तुर्थ्या संयुता विभो॥ इति तथा पद्मपुराणे भविष्यपुराणयोः पूर्वोत्तरविद्धाविषयो विधि
निषेधौ समर्यते। पंचमी च चतुर्थ्या तु कार्या षष्ठ्या न संयुतेति। यत्तु ब्रह्मवैवर्तेभिहितं
पंचमी तु प्रकर्तव्या षष्ठ्या युक्ता तु नारदेति॥ तद्वचनं स्कंदोपवासविषयतया संकोचनीयं
वाक्यशेषे तथाभिधानात्॥ स्कंदोपवासे स्वीयां पंचमी परसंयुतेति। हि वाक्यशेषेन चासं
जातविरोधिनो वाक्योपक्रमस्य संजातविरोधिना वाक्यशेषेण कथं संकोच इति न शंकनीयं
संदिग्धोपक्रमस्य वाक्यशेषेण निर्णेतव्यत्वात्॥ अत एव जैमिनिनापि सूत्रितं संदिग्धेतु
वाक्यशेषादिति तस्मात्स्कंदोपवासे पंचमी परविद्धा अन्यत्र पूर्वविद्धेति सुस्थितं॥ ॥इ
ति पंचमीनिर्णयः॥ ॥अथ षष्ठी निर्णीयते॥ ॥सा च युग्मवाक्यद्वयेन द्विविधा प्रति
भाति॥ तत्र षण्मुन्योरित्येकं युग्मवाक्यं तेन षष्ठ्या सप्तमी परविद्धात्वं प्रतीयते॥ पंचमी तु प्र
कर्तव्या षष्ठ्या युक्ता तु नारदेति अपरं युग्मवाक्यं तेन षष्ठ्या पंचमीविद्धत्वं प्रतीयते॥ तयोः
र्वाक्ययोः किं युक्तकल्पं द्वैभेदन व्यवस्था कार्या। किं वा देवपित्र्यभेदेन उत स्कंदव्रतान्यव्रतभे
देन तत्र न तावत्प्रथमः पक्षः समंतु नापक्षद्वयव्यवस्थापितत्वात्॥ तथा च तद्वचनं। नाग
विद्धा न षष्ठी स्यात् पक्षयोरुभयोरपि। दैवे कर्मणि तां विद्धि पित्र्ये पूर्वयासंयुतामिति॥ ना

माध०
॥८१॥

पिद्वितीयः ॥ देवपित्र्यभेदेन व्यवस्थाया अयुक्तत्वात् । तथा हि पित्र्ये पूर्वैर्योः संयुता तिथिः । यदे
न सुमंतुना दैवे कर्मणि कृष्णशुक्लपक्षद्वयगतायाः षष्ठ्या नागविद्धत्वं प्रतिषिध्यते तत
था स्कन्दनागविद्धायाः पित्र्ये व्यवस्थाने तत्र वक्तव्यं किं पूर्वविद्धत्वमेकोद्दिष्टविषये । किं वा
पार्वणविषये नोभयमप्युपपद्यते ॥ मध्याह्नापराह्णव्याप्तिभ्यामेव द्वयोर्निर्णये सति
पूर्वविद्धताया अकिंचित्करत्वात् ॥ न चैवं मन्तव्यं ॥ परेद्युः सत्यमपि मध्याह्नापराह्ण
व्याप्तौ तत्परित्यागेन पूर्वविद्धत्वविधा ॥ नापि द्विः मुख्यकर्मकालव्याप्तेः परित्यागाप्र
गात् ॥ अन्यथा मुख्यकर्मयात्रा ग्रहं दहतीति न्याय आपतेत् । तर्हि सुमंतुवचनस्य का गति
रिति चेत् उच्यते । न खल्वेतद्वचनं पित्र्ये पूर्वविद्धां विधातुं प्रवृत्तं किं तर्हि दैवे तां निवार
यितुं तत्प्रवृत्तिः तत्रापवादत्वेन पित्र्ये साभ्यनुज्ञायते ॥ तत्रेयं वचनव्यक्तिः । यदि नाम
कथंचित्पूर्वविद्धा भवेत् भवतु नाम सा पित्र्ये तिथिमूलस्य प्रायेण पितृतुष्टिहेतुत्वात्सर्व ॥शिवा॥
था दैवे पूर्वविन्न ग्राह्येति तस्मात्तृतीयः पक्षः परिशिष्यते । स्कन्दव्रते पूर्वविद्धा व्रतान्तरेषु
तरविद्धेति । स्कन्दषष्ठ्याः पूर्वविद्धत्वमाह वसिष्ठः ॥ कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रीव ॥८१॥

माध॰ ष्ठी नागविद्धा कर्त्तव्या तु कदाचन ॥ नागविद्धा तु या षष्ठी कृतपुण्याक्षया भवेत् ॥ सप्तम्या सह क
॥८२॥ र्त्तव्या महापुण्यफलप्रदेति ॥ पुण्यस्य क्षयो यस्यां सा पुण्यक्षया ॥ यदा कदाचित्तिथिक्षयव
शात् तूत्तरविद्धा न लभ्यते तदा स्कन्दव्रतं चान्यान्यपि व्रतानि नागविद्धायां कर्त्तव्यानि । त
दाह वसिष्ठः ॥ एकादशी तृतीया च षष्ठी चैव त्रयोदशी ॥ पूर्वविद्धा तु कर्त्तव्या यदि न स्या
त्परेऽहनीति ॥ ॥ इति षष्ठीनिर्णयः ॥ ॥ अथ सप्तमी निर्णीयते ॥ ॥ सन्ति सप्तम्यां ना
नादेवतानि बहूनि व्रतानि ॥ तत्र भविष्योत्तरप्रोक्तमुमामहेश्वरदेवताकमुक्ताभरण
सप्तमीव्रतं ॥ तथा भविष्यत्पुराणे ॥ सूर्यदेवताकं विजयसप्तमीव्रतमुक्तं सूर्यदेवता
कमारोग्यसप्तमीव्रतं वाराहेऽभिहितं ॥ विष्णुदेवताकं मांगल्यव्रतं गारुडपुराणेऽभिहि
तं ॥ एवमन्यान्यप्युदाहरणीयानि ॥ तत्र काश्चित्तिथयो देवताभेदेन व्यवतिष्ठमाना
लक्ष्यन्ते ॥ तद्यथा ॥ गौरीव्रते च वरं भात्तृतीया पूर्वविद्धा लक्षणादितृतीया परविद्धा
काश्चिदेकदेवताया एकस्मिन्व्रते कर्मकालव्याप्तिभेदेन व्यवतिष्ठते ॥ तद्यथा विनायक ॥शिव॥
व्रते चतुर्थी पूर्वेद्युः परेद्युर्वा मध्याह्नव्यापिनी ग्राह्या ले ॥ काश्चिच्छुक्लकृष्णभेदेन व्यवति ॥८२॥

ष्ठन्ते ॥ तद्यथा ॥ शुक्लप्रतिपत् पूर्वविद्धा कृष्णप्रतिपदुत्तरविद्धा चेति ॥ अत्र केन न्यायेन
सप्तमी व्यवस्थापनीयेति विवक्षायां न केनापि प्रतिजानीमहे ॥ सप्तम्याः पूर्वविद्धानिदर्शक
स्योत्तरविद्धाविधायकस्य वचनस्यादर्शनात् ॥ तद्विपर्यये येयं पूर्वविद्धाविधायकस्यो
त्तरविद्धानिषेधकस्य सर्वत्रोपालंभात् ॥ सर्वासु देवतासु सर्वेषु व्रतेषु शुक्लपक्षयोरु कृष्ण
भयोरपि सुसप्तमी पूर्वविद्धैव ग्राह्या युग्मादिवाक्येन षण्मुन्योरित्यभिधानात् ॥ स्कं
दपुराणे ॥ षष्ठ्या युता सप्तमी च कर्त्तव्या तात सर्वदा ॥ षष्ठी तु सप्तमी यत्र तत्र संनिहितो ह
रिरिति ॥ भविष्यत्पुराणे ब्रह्मपुराणयोः ॥ षष्ठी तु सप्तमी तात अन्योन्यं तु समाश्रि
ता ॥ पूर्वविद्धा द्विजश्रेष्ठ कर्त्तव्या सम्मुखी तिथिरिति ॥ पैठीनसिः ॥ पंचमी सप्तमी चैव
दशमी च त्रयोदशी ॥ प्रतिपन्नवमी चैव कर्त्तव्या सम्मुखी तिथिरिति ॥ उत्तरविद्धाप्रति
षेधः स्कन्दपुराणे दर्शितः ॥ षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाष्टमी ॥ सप्तमी परविद्धा च
नोपोष्यं तिथिपंचकमिति ॥ न च व्रतविधिरुपवासपर एवेत्युत्तरविद्धा नामासां कर्त्तव्यता ॥ तदु
क्तं ब्रह्मकैवर्ते ॥ सप्तमी नाष्टमीयुक्ता न सप्तम्याष्टमीयुता ॥ सर्वेषु व्रतकल्पेषु अष्टमी
परतः शुभेति ॥ यदा पूर्वेद्युरस्तमयपर्यन्ता षष्ठी परेद्युस्ति

माध॰ ॥थिक्षयेणासमयादर्वागेवाष्टमी त्रिमुहूर्त्ता तदा पूर्वविद्धायाअलाभादुत्तरविद्धायाश्च निषि
॥८३॥ द्धात्वात्कुत्रानुष्ठानमिति चेत् ॥ निषेधमुल्लंघ्याप्युत्तरविद्धायामनुष्ठानमिति ब्रूमः ॥ यद्यप्य
स्मिन्नर्थे वचनं नोपलभ्यते ॥ तथापि नःशेषलोपस्य न्याय्यत्वादुत्तरविद्धा गौणकालत्वे
न स्वीकर्त्तव्याः सन्ति चात्र दृष्टान्ताः ॥ स्कंदव्रतव्यतिरिक्तव्रतेषु पूर्वविद्धायाः षष्ठ्या निषेध
मुल्लंघ्य यदि न स्यात्सरे हनीति ॥ वाक्येन पूर्वविद्धा गृहीता तथा रंभाव्यतिरिक्तगौरीव्र
तेषु द्वितीयायुता स्वीकृता तेनैव न्यायेनात्राप्यष्टमीविद्धायाः स्वीकारोस्तु ॥ ॥इति सप्त
॥अथाष्टमीनिर्णयते॥ ॥द्विविधो हि तत्र निर्णयः ॥ व्रतसामान्य
मीनिर्णयः ॥
विषयो व्रतविशेषविषयश्चेति ॥ व्रतसामान्ये तु शुक्लकृष्णपक्षभेदाद्व्यवतिष्ठते ॥ तत्र शु
क्लाष्टमी परा ग्राह्या वसुरंध्रयोरिति युग्मवाक्यात् ॥ यद्यप्येतद्वाक्यं पक्षद्वयसाधारणमि
ति चतुर्थ्युप्रस्तावे ॥ प्रतिष्ठापितं ॥ तथापि शास्त्रांतरबलात्पक्षे पर्यवस्यति ॥ तथा च
निगमे ॥ शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी ॥ पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुता
उपवासादिकार्येषु एष धर्मः सनातन इति ॥ ब्रह्मवैवर्त्ते ॥ सप्तमी चाष्टमीयुक्ता न सप्त ॥त्रिव॥
म्या युताष्टमी ॥ सर्वेषु व्रतकल्पेषु अष्टमी परतः शुभेति ॥ पसपु ॥८३॥

तुर्दशी ॥ एताः पूर्वयुताः कार्यास्तिथ्यन्तरे पारणं भवेदिति ॥ स्कंदषष्ठी लिंगपुराणे दर्शिता ॥
प्रत्यब्दमपि पूर्वेद्युः कार्त्तिकेयाय षष्ठ्यां कार्या गुहस्य तु ॥ दीपाद्भिः समभ्यर्च्य स्यात्तस्मिन्नागामिवल्ल
रइति ॥ तथा तत्रैव रविषष्ठी दर्शिता ॥ षष्ठ्यामुपोष्य विधिवत्सप्तम्यां कर्म संचयेत् ॥ सद्भ्य
ताम रूकूच्चेव संप्राप्नोति प्सितं फलमिति फलषष्ठीमंदवाषष्ठ्यादिव्रतानि भविष्योत्तरे
प्रोक्तानि ॥ तत्र स्कंदादिव्रतेषु परविद्धा ग्राह्या ॥ तदुक्तं विष्णुधर्मे ॥ एकादश्यष्टमी षष्ठी
पु॰पौर्णिमासी चतुर्दशी ॥ अमावास्या तृतीया च ता उपोष्याः परान्विता इति ॥ यद्यप्य
त्र व्रतविशेषो नोपात्तः ॥ तथापि स्कंदव्रतस्य पूर्वविद्धायां परिशेषादन्येषामुत्तरविद्धा
भवति ॥ तेषामप्यविरोधात्पूर्वविद्धास्त्विति चेत् ॥ न प्रतिषेधात् ॥ तथा च निगमः ॥ ना
गविद्धा तु यदा षष्ठी रुद्रविद्धो दिवाकरः ॥ कामविद्धो भवेद्विष्णुर्न ग्राह्यास्ते तु वासरा इ
ति ॥ नागः पञ्चमी रुद्रः षष्ठी दिवाकरः सप्तमी कामस्त्रयोदशी विष्णुर्द्वादशी ॥ शिवपुराण
सौरपुराणयोः ॥ नागविद्धा तु या षष्ठी शिवविद्धा तु सप्तमी ॥ दशम्येकादशी विद्धा नोपोष्या
कथंचन ॥ सप्तमीसंयुता कार्या षष्ठी धर्मार्थिभिस्तके रिति ब्रह्मवैवर्त्तेपि ॥ नहिष

राणेपि॥ नाष्टमी सप्तमीयुक्ता सप्तमी नाष्टमीयुता॥ नवम्या सह कार्या स्यादष्टमी नात्र संश
यइति॥ स्कंदपुराणेपि॥ अष्टमी नवमी स्थ मिश्रा कर्त्तव्या भूतिमिच्छता॥ सप्तम्यां चाष्टमी
चैव न कर्त्तव्या शिखिध्वजेति॥ तान्येतानि वृत्तवैवर्त्तोदिवचनानि यद्यपि पक्षद्वयसाधा
रण्येन पूर्वविद्धानिषेधमुत्तरविद्धाविधिं कुर्वन्ति। तथाप्युदाहृतनिगमानुसारेण शुक्लप
क्षविषयतया योजनीयानि तथा शुक्लपक्षाभिप्रायेणैव पूर्वविद्धां प्रतिषेधति ज्ञावा
लिः॥ नागविद्धा तु या षष्ठी भानुविद्धो महेश्वरः॥ चतुर्दशी कामविद्धा तिस्रस्ता मलिनाः स्मृ
ता इति। स्कंदपुराणेपि। नागविद्धा तु या षष्ठी सप्तम्या तु तथाष्टमी॥ भूतविद्धा स्याप्यमावा
स्या न ग्राह्या मुनिपुंगवैरिति। तथा शुक्लपक्षमेवाभिप्रेत्योत्तरविद्धा विधीयते॥ विष्णुधर्मो
त्तरे॥ एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी। अमावास्या तृतीया च ता उपोष्याः परान्वि
ता इति॥ भृंगकरगीतायां तु साक्षाच्छुक्ल एव पक्षे परा विहिता। एकादश्यष्टमी षष्ठी शुक्ल
पक्षे चतुर्दशी॥ पूर्व्याः परेण संयुक्ताः पराः पूर्वेण संयुता इति। कृष्णपक्षे पूर्वविद्धा
विधिरुत्तरविद्धानिषेधश्च निगमे पठ्यते॥ कृष्णपक्षेष्टमी यत्र कृष्णपक्षे चतुर्दशी॥ पूर्व

विधात्तु कर्त्तव्या परविधानं कस्यचित् ॥ उपवासादिका येषु एष धर्मः सनातन इति ॥ नारदीये पि ॥
कृष्णाष्टमी तथा रंभा तृतीया वटपैतृकी ॥ बृहत्तपा तथा ब्रह्मन् कर्त्तव्या सम्मुखी तिथिरिति
येयमष्टम्याः शुक्लपक्षव्यवस्था साप्येन व्रतविषया व्रतविशेषस्य कस्याप्यनुपादाना
त् व्रतानि चोदाह्रियन्ते ॥ वामनपुराणे ॥ नभोमासे कृष्णाष्टम्यां कापलाष्टमीव्रतं पठ
ति ॥ विष्णुधर्मोत्तरे ॥ कृष्णपक्षे संतानाष्टमीव्रतं एतदुभयं यथोक्तरीत्या पूर्वविद्धास्वनुष्ठे
यं ॥ देवीपुराणे ॥ श्रावणे मासि कृष्णाष्टम्यां देवीव्रतं ॥ गारुडपुराणे शुक्लाष्टम्यां नृसिंहव्र
तं ॥ एतद्द्वयमुत्तरविधायामनुष्ठेयं ॥ एवमन्यान्यप्युदाहरणीयानि ॥ व्रतविशेषविषयाष्टा
ष्टमीनिर्णयो द्विविधः ॥ तत्र व्रतविशेषमात्रोपजीवनेन प्रवृत्तः एकः नक्षत्रादियोगं व्रत
विशेषं चोपजीव्य प्रवृत्तोपरः ॥ तत्र दूर्वाष्टमीसंज्ञकः कश्चिद्व्रतविशेषो भविष्यपुराणे
पठ्यते ॥ ब्रह्मन्भाद्रपदे मासि शुक्लाष्टम्यामुपोषितः ॥ महेशोपज्ञ ये यस्तु दूर्वया सहि
तं मुन इति ॥ अस्मिन्व्रतविशेषे शुक्लपक्षविषयत्वे नोत्तरविधायां प्राप्तायामपवाद
माह नारदः ॥ धान्या कृष्णाष्टमी दूर्वा सावित्री वटपैतृकी ॥ कामत्रयोदशी रंभा कर्त्त

माधव०

॥८५॥

र्थः॥अष्टम्यानक्षत्रयोगाभावेकृष्णपक्षवर्त्तिवासरेवाष्टमीग्राह्या॥यदातुपूर्वदिनेरात्रौनक्षत्र
योगोस्तितदापूर्वविधाग्राह्या॥सोयंकृष्णपक्षप्रयुक्तस्यसामान्यशास्त्रस्यनक्षत्रप्रयुक्ते
नविशेषशास्त्रेणापवादइतियोयंपूर्वोदिरात्रौनक्षत्रयोगःसोपिकश्चिदुदाहृयते॥तथ
थाचस्कंदपुराणे॥यस्मिन्दिनेभवेज्येष्ठामध्याह्नादूर्ध्वमप्यणु॥तस्मिन्हविष्यंपू.जाच
सम्पूजनाचेत्पूर्ववासरइति॥अत्रकेवलतिथितोनक्षत्रयोगस्यप्रशस्तत्वात्केवलतिथि
कृतेनिर्णयमपोह्यनक्षत्रप्रयुक्तोनिर्णयः॥आवृत्तः॥नतथानक्षत्रयुक्तविधौवारविशेष
कृतेनिर्णयमपोह्यनक्षत्रप्रयुक्तोनिर्णयःकर्त्तव्यः॥एतदेवाभिप्रेत्यस्कंदपुराणेपठ्य
स्यततोपिप्रशस्तत्वात्तेनैवयोगेननिर्णयःकर्त्तव्यः॥नीलज्येष्ठर्क्षएवच॥नीलज्येष्ठेतिसाप्रोक्तादुर्लभाब
ते॥तत्राष्टम्यांयदावारोभानोर्ज्येष्ठर्क्षएवच॥नृसिंहव्रतसेतानाष्टमीव्रतादौकृष्णक्रूरस्य
हुकालिकीति॥तदेवंत्रिधानिर्णयःसंपन्नः॥नृसिंहव्रतसेतानाष्टमीव्रतादौकृष्ण
भेदेननिर्णयः॥दूर्वाष्टम्यांव्रतविशेषनिर्णयः॥नीलज्येष्ठाअष्टम्यांयोगविशेष
यानिर्णयश्च॥इति॥तदेतन्निर्णयत्रयंदृष्टान्तीकृत्यजन्माष्टमीविचार्यते॥साष्टमीकिंप
क्षभेदेननिर्णीतव्याउतव्रत॥विशेषण॥आहोस्विद्योगविशेषेणेतितत्रैवेदमपरं
चिंत्यते॥किंजन्माष्टमीव्रतमेवजयंती

व्रतं॥उततयोर्भेदइति॥तथान्यदपिचिंतनीयं॥तिथ्यंतरवदहर्वैधः॥उतमध्यरात्रवेधइ
तिप्रथमंव्रतस्वरूपेनिश्चितेपश्चादस्मिन्व्रते॥कीदृशीतिथिःरिसाकांक्षोदेतितिथेश्चपूर्वविद्
धात्वेनपरविद्धात्वेनवानिश्चितायांपश्चाद्दिशोवेधइत्याकांक्षातस्मादादौव्रतंनिश्चीयते॥
जन्माष्टमीजयंतीशब्दाभ्यांव्रतमेकमेवेतिनावप्रासंकुलःस्वरूपभेदाभावात्॥यथायागस्य
द्रव्यदेवतेस्वरूपंयथाचोपासनस्यगुणविशेषयुक्ताई देवतास्वरूपंयथावातत्त्वविद्यायां
वेद्यंतत्त्वंस्वरूपंतथाव्रतस्यनियमविशेषःस्वरूपंनियमाश्चात्रोपवासःजागरणं॥कृष्णा
दिपूजा॥चेद्वाद्यमित्येवमादिलक्षणंसर्वमुभयत्रविद्यते॥अथोच्यते॥रूपभेदेपि
वसंतेवसंतेज्योतिषायजेतइतिनित्यज्योतिष्टोमेनस्वर्गकामोयजेतेतिकाम्यः॥नित्यका
म्ययोःज्योतिष्टोमयोरिवभेदोभविष्यतीति॥नित्याजन्माष्टमीअकरणेप्रत्यवायस्मरण
णात्॥तथाचस्मर्यते॥गृध्रमांसंत्र्येनखंडकाकंचमुनिसत्तमः॥मांसंवाद्विपदीभुंक्ते
कृष्णजन्माष्टमीदिने॥कृष्णाष्टमीदिनेप्राप्तेयेनभुक्तंद्विजोत्तम॥त्रैलोक्यसंभवंते
नभुक्तंपापंद्विजोत्तमेतिभविष्योत्तरेश्रावणेमासिबहुलेकृष्णजन्माष्टमीव्रतं॥

॥श्रीवा॥

॥८५॥

माध०
॥८६॥

नकरोति नरो यस्तु भवति क्रूरराक्षसः। कृष्णजन्माष्टमीं त्यक्त्वा योऽन्यद्व्रतमुपाश्रयेत्।
नाप्नोति स फलं किंचिद् इष्टापूर्तमथापि वा। वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतं। नक
रोति महाप्राज्ञ व्याली भवति कानने।। स्कंदपुराणेपि। येन कुर्वंति जानंतः कृष्णजन्म
ष्टमीव्रतं। ते भवंति नराः प्राज्ञ व्याला व्याघ्राश्च कानने।। रंतीहपुराणेपि भूयो भूयो
वरानने।। न भोक्तव्यं न भोक्तव्यं कृष्णजन्माष्टमीदिने। अतीतानागतं तेन कुलमेको
त्तरं शतं।। पातितं नरके घोरे भुंजता कृष्णवासरे इति। जयंतीश्च काम्या फलविशेष
स्मरणात्। विष्णुधर्मे जयंतीमधिकृत्य पठ्यते।। यद्बाल्ये यच्च कौमारे यौ
वने वार्धके तथा।। बहुजन्मकृतं पापं हंति सोपोषिता तिथिरिति। अग्निपुराणेपि।
सप्तजन्मकृतं पापं राजन् यत्त्रिविधं नृणां।। तत्क्षालयति गोविंदः तिथौ लक्ष्म्यां सुभावि
तः।। उपवासश्च संप्रोक्तो महापातकनाशनः।। जयंत्यां जगतीपाल विधिना नात्र
संशय इति।। पद्मपुराणेपि। प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः।। यैः कृता श्राव
णे मासि अष्टमी रोहिणीयुता।। किं पुनर्बुधवारेण सोमेनापि समन्वितेति।। स्कं
दपुराणे।। ममाक्षयं कुरुष्व त्वं ॐ जयंती मुक्तयेनघ ।। धर्ममर्थं च कामं च मोक्षं च

॥शिवा॥
॥८६॥

व्यो संमुखी तिथिरिति।। पद्मपुराणेपि। श्रावणी दुर्गानवमी तथा दूर्वाष्टमी तु या।। पू
र्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनमिति।। तथा शिवशक्तिमहोत्सवो नाम कश्चिद् व्रतविशे
षः तस्य पूर्वेद्युर्येन शुक्लरूपत्वे देनव्यवस्थायां प्राप्तायां तदपवादः। पद्मपुराणे पठ्यते।।
अष्टमी नवमी विद्धा नवमी चाष्टमीयुता।। अर्धनारीश्वरप्राया उमामहेश्वरी तिथिः।।
अष्टमीनवमीयोगे महोत्सवो महोत्सवः।। शिवशक्त्योः शिवक्षेत्रे पक्षयोरुभयोरपि।। म
हानुत्सवो यस्मिन्निति बहुव्रीहिः तत्पदं युग्मस्य क्षेत्रस्य वा विशेषणं यदा युग्मविशेष
णं तदा कर्मधारयो द्वौ यस्मिन् क्षेत्रे महानुत्सवो जायते तत्रोत्सवः कर्तव्य इत्युक्तं भव
ति।। नक्षत्रयोगव्रतविशेषोप जीवी नियतदा दृश्यंते।। स्कंदपुराणे।। व्रतविशेषः पठ्य
ते।। मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते।। यस्मिन् कस्मिन् दिने कुर्यात् ज्येष्ठायाः परिपू
जनमिति।। तस्य ज्येष्ठाव्रतस्य नक्षत्रयोगवशेनाष्टमी गृहीतव्या।। नाष्टमी सप्तमी
युक्ता सप्तमी नाष्टमीयुता।। नवम्या सह कार्या स्यादष्टमी नात्र संशयः।। मासि भाद्रप
दे शुक्ले पक्षे ज्येष्ठर्क्षे संयुते।। रात्रिर्यस्मिन् दिने कुर्यात् ज्येष्ठायाः परिपूजनं।। अयम

मुनिपुंगव॥ ददाति वांछितान्कामान्नोनाप्यं नापि दुर्लभमिति॥ भविष्योत्तरे जयंतीक
ल्पे॥ प्रतिवर्षं विधानेन मद्भक्तो धर्मनंदन॥ नरो वा यदि वा नारी यथोक्तफलमाप्नुया
त्॥ पुत्रसंतानमारोग्यं सौभाग्यमतुलं भवेत्॥ इह धर्मरतिं भुक्त्वा मृतो वैकुंठमाप्नुया
त्॥ तत्र दिव्येन मानेन वर्षलक्षं युधिष्ठिर॥ भोगान्नानाविधान्भुक्त्वा पुण्यशेषादि
हागतः॥ सर्वकामसमृद्धे तु सर्वदुःखविवर्जिते॥ कुले नृपवरिष्ठानां जायते हृदयंगमे
इति॥ तदेवं जन्माष्टम्या अकरणे प्रत्यवायाज्जयंत्याः फलविशेषाच्चोभयोः क्रमेण नित्य
काम्यत्वं चाभ्युपेतव्यमिति मेवं॥ गुणफलाधिकारत्वाभ्युपगमेपि जयंत्याः फलविशे
षोपपत्तेः गोदोहनदध्यादिवत्र दृष्टांतः चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्ये
ति नित्ययोर्दर्शपूर्णमासयोरपां प्रणयनं विधाय तदेवाश्रित्य पशुफलं गोदोहनपा
त्रं विहितं। दध्नेंद्रियकामस्येत्यत्र पूर्वकृते नित्याग्निहोत्रे फलाय दधि विधीयते॥
एवं जन्माष्टमीमाश्रित्य फलविशेषाय जयंतीनामको रोहिणीयोगो विधीयते॥
न च रोहिणीलक्षणस्य कालविशेषस्यानुपादेयत्वाद्दधिवैलक्षण्यं शंकनीयं॥ कालवि

माध० ॥५७॥

स्वस्यस्वरूपेणापुरुषार्थैरनुपादेयत्वेपि॥अनुष्ठानांगत्वेनशास्त्रेणावगत्यानुष्ठानापत्तत्रप्रतिष्ठा
याःकर्तुमशक्यत्वात्॥अन्यथाचसतेज्योतिषायजेतेत्यादिकः॥सर्वोपिकालविधिर्लुप्ये
त॥रोहिणीयोगस्यजयंतीनामकत्वंजयंतीलक्षणप्रतिपादकैःस्मृतिवाक्यैरध्यव
सेयंतानिचवाक्यान्युदाहरामः॥विष्णुधर्मे॥रोहिणीचयदाकृष्णपक्षेष्टम्यांद्विजोत्तम॥जं
यंतीनामसाप्रोक्तासर्वपापहरातिथिरिति॥सनत्कुमारसंहितायां॥शृणुष्वावहितोराज
न्कथ्यमानंमयानघ॥श्रावणस्यचमासस्यकृष्णाष्टम्यांनराधिप॥रोहिणीयदिलभ्येतजयंती
नामसातिथिरिति॥स्कांदे॥प्राजापत्येनसंयुक्ताअष्टमीतुयदाभवेत्॥श्रावणेबहुलेसातु
सर्वपापप्रणाशिनी॥जयंपुण्यंचकुरुतेजयंतीतिचतांविदुरिति॥विष्णुरहस्ये॥अष्टमीकृ
ष्णपक्षस्यरोहिणीऋक्षसंयुता॥भवेत्प्रोष्ठपदेमासिजयंतीनामसास्मृतेति॥पौर्णमास्यं
तेषुमासेषुस्वीकृतेषुश्रावण्यांपौर्णमास्यांश्रावणमासस्यसमाप्तत्वादुपरितनीप्रतिपद
मारभ्यभाद्रपदमासइत्यभिप्रेत्यप्रोष्ठपदइत्युक्तं॥विष्णुधर्मोत्तरे॥प्राजापत्यर्क्षसंयु ॥शिव॥
क्ताकृष्णानभसिचाष्टमी॥सोपवासोहरेःपूजांतत्रकृत्वानसीदति॥वसिष्ठसंहितायां॥श्रा ॥५७॥

देशभेदाच्च तथाहि। पूर्वोदाहृतेष्वकरणप्रसकायप्रतिपादकस्मृतिवाक्येषु जन्माष्टमीत्येवं नामव्य
वहृतं तथा पूर्वोदाहृतफलवाक्येषु जयंतीव्रतमिति नामव्यवहारः नामभेदाच्च कर्मभेदो ज्यो
तिरधिकरणे व्यवस्थितः तस्य चाधिकरणस्य संग्राहकाविमौ श्लोकौ भवतः॥ अथैष ज्योति
रित्यत्र गुणो वा कर्म वा पृथक् गुणः सहस्रसंख्या नाम्ना ज्योतिष्टोमविधीयते तथेति प्रकृते
धिनएतच्छब्दो ग्रवंवदेत्॥ संख्ययैवान्यकर्मत्वमुपस्थितिगतसंख्यया॥ अयमर्थः॥ एष ज्यो
तिरेतेन सहस्रदक्षिणेन यजेतेति श्रूयते॥ तत्र संशयः किं प्रकृत एव ज्योतिष्टोमे सहस्र
दक्षिणो गुणविधिः उत्तरयागांतरविधिरिति। एष ज्योतिरेतेनेत्याभ्यामेतच्छब्दाभ्यां प्रकृ
तज्योतिष्टोममनूद्य गुणविधिरिति पूर्वपक्षः॥ अर्थांतरके नाथशब्देन प्रकृतस्य ज्यो
तिष्टोमस्य विच्छेदः क्रियते येतच्छब्दस्तु प्रत्यासन्नं ब्रूते। प्रत्यासत्तिश्च द्विविधा। अतीता
आगामिनी च तत्रातीतायाः प्रत्यासत्तेर्विच्छेदे सति आगामिप्रत्यासत्तिपरत्वेनैतच्छ
ब्दोपपन्नौ तथाप्येककर्मत्वं माभूत्॥ कर्मभेदे किं प्रमाणमितिचेत्॥ अपूर्वसंख्येति वि
दामः। एष ज्योतिरित्येतस्मिन्नुपस्थितिवाक्ये पूर्वप्रकृतिकर्मविशेषवाच्यायाः ज्योतिष्टो ॥ शिव ॥
॥ ८८ ॥

मसंख्याया अन्या ज्योतिरित्येषा संख्या श्रूयते। तत्र यथा पूर्वाधिकरणे सप्तदश प्राजापत्या
नुपशुनालभतइत्यस्योपस्थितिगतायाः संख्यायाः कर्मभेदो निरूपितः॥ तथात्राप्युपस्थितिगत
यान्यया संख्यया कर्मभेदोभ्युपगंतव्य इति। एवं च सति प्रकृतेप्यनेन न्यायेनोपस्थितिगता
भ्यां जन्माष्टमीजयंतीव्रतसंज्ञाभ्यां व्रतभेदोभ्युपगंतव्यः॥ तथा निमित्तभेदादपि व्रतभे
दः। जन्माष्टमीव्रते तिथिरेव निमित्तं जयंतीव्रते तु रोहिणीयोगः। ननु जन्माष्टमीत्यस्मि
न्नपि व्यवहारे योग एव विवक्षितव्यः। नक्षत्रयुक्तायामेव तिथौ देवकीनंदनस्योत्पत्ते
रेवं। तज्जन्माष्टम्यामेव प्रधानप्रयोजकत्वात्॥ रोहिणीतद्योगयोर्विद्यमानयोरपि बुधवा
रादिवदुपलक्षणत्वात्। अत एव शास्त्रेषु सर्वत्र जन्माष्टमीत्येवं समाख्यायते। अन्यथा जन्म
रोहिणीशिवजन्मयोगइतिवा समाख्यायेत॥ सद्भावमात्रेण प्रयोजकत्वे बुधवारोपि प्रयोज
कस्यात्॥ अस्ति तिथिचेत् नातिप्रसंगात्। जन्मकाले द्वापरावसानस्य सर्वसरविशेषस्य च
सद्भावेन तयोरपि प्रयोजकत्वं केन वार्येत॥ तस्माज्जन्माष्टम्या एव प्राधान्यं तत्प्राधान्ये
सद्भावेन तयोरपि प्रयोजकत्वं केन वार्येत॥ तस्माज्जन्माष्टम्या एव प्राधान्यं तत्प्राधान्ये
न श्रुतिलिंगादिषु षट्सु प्रमाणेषु समाख्यारूपप्रमाणमुपन्यस्तं वेदितव्यं। तथा प्रत्यक्षा
...

माध०
॥८९॥

नुमानादिषु संभवेति ह्यौ तेष्वेषु प्रमाणेषु श्रुतिस्वरूपमागमरूपमागमं वा प्रमाणमुन्नेयं भव
ति ॥ ननु निरर्थकोयं वाग्वादलक्षणः कोलाहलः यद्येकं व्रतं यदि वा व्रतद्वयं ॥ उभयथाप्यनु
ष्ठाने को नामातिशयः स्यादुच्यते ॥ अस्त्येवमहानतिशयः यस्मिन्संवत्सरे श्रावणबहुला
ष्टमीं परित्यज्यान्यस्मिन्नवम्यादौ रोहिणी भवति तस्मिन्संवत्सरे जयन्तीस्वरूपे तो
व नास्ति ॥ अतो जयन्तीव्रतस्य तत्राप्राप्तत्वात्तस्यैव जन्माष्टमीव्रतत्वे तदपि न प्राप्नुयात् ॥ भे
दपक्षे तु तस्यामपि जयन्त्यां जन्माष्टमीव्रतं तत्र प्रवर्त्तते इत्ययमनुष्ठानेतिशयः ॥ भवत्वेवं
तथापि नोपपन्नस्तो निमित्तभेदो व्रतभेदमावहति ॥ कर्मभेदहेतुषु शब्दान्तराभ्याससंख्या
गुणप्रक्रियानामधेयेषु षट्सु प्रमाणेषु निमित्तस्यानन्तर्भावादिति चेत् ॥ बाढमेव ॥ तथापि नैमित्तिक
संज्ञाभेदसंपादितं व्रतभेदं निमित्तभेद उपोद्बलयति ॥ तस्मादत्र निमित्तभेदाद्व्रतभेदः तथा
रूपभेदादपि व्रतभेदोवगन्तव्यः ॥ रूपभेदस्य कर्मभेदहेतुत्वमामिक्षाधिकरणेभिहितं ॥ त
स्य चाधिकरणस्य संग्राहकावेतौ श्लोकौ भवतः ॥ गुणः कर्मान्तरं वास्याद्दधि जिभ्यो वाजिनेष्विति
गुणो देवाननुद्योक्तः समुच्चयविकल्पतः ॥ आमिक्षे सक्तिस्त्विशिष्टत्वात्प्रबलान्तरवाजिनो
गुणो प्राप्तिस्य कर्मान्यत्कल्प्यं यो द्विजिदेवकमिति ॥ तप्ते पयसि दध्यानयति ॥ सा वैश्वदे ॥शिवा॥ ॥८९॥

व्योकानभस्ये यारोहिणीसहिताष्टमी ॥ यदा कृष्णे नरैर्लब्धा सा जयन्ती प्रकीर्तिता ॥ श्रावणे न
भवेद्योगो नभस्ये तु भवेद्ध्रुवं ॥ तयोरभावे योगस्य तस्मिन्वर्षे न संपदद्विति ॥ अत्र श्रावण
इति मुख्यः कल्पः नभस्य इत्यनुकल्पः यदि श्रावणः यदि वा नभस्यः सर्वथापि रोहिणीकृष्णा
ष्टमीयोगो जयन्तीत्येतदविवादं ॥ पुराणान्तरे ॥ रोहिण्यां सा यदा कृष्णपक्षेष्टम्यां द्विजोत्त
म ॥ जयन्ती नाम सा प्रोक्ता सर्वपापहरा तिथिरिति तदभिरेतैः स्मृतिवाक्यैर्जयन्त्याः कृष्णा
ष्टमीरोहिणीयोगस्वरूपे सति पूर्वोदाहृतफलकामिनस्तादृग्योगो दोहनदध्यादिवद्गुणत्वे
न विधीयते काम्ये तु ज्योतिष्टोमेपि गुणविशेषेण न कोपि फलविशेषो विहितः ॥ अतः का
म्यज्योतिष्टोमवैषम्याद्गोदोहनदध्यादिसामान्यात्पूर्वोदाहृतफलवाक्यानि प्रकृते नित्ये
जन्माष्टमीव्रते गुणफलप्रतिपादकत्वेनोपपद्यन्ते ॥ न तथा सति यो दर्शपूर्णमासाभ्यामन्यो
पि कश्चित्स्वतुफलको गोदोहनसंज्ञको यागो नास्ति किं तु गुण एव केवलं गोदोहनं तथा न जन्मा
ष्टमीव्रतादन्यज्जयन्तीव्रतं किं तु प्रकृत एव व्रते फलाय गुणविधिरित्येवं प्राप्ते ब्रूमः ॥ व्र
तद्वयमिदं भवितुमर्हति ॥ कुतः नामभेदान्निमित्तभेदाद्रूपभेदाद्गुणमिश्रत्वभेदान्नि

व्यामिक्ष्या वाजिभ्यो वाजिनमिति। आम्लदधिसंबंधात्क्षीरनीरयोर्विभेदे सति यो घनीभूतः क्षी
रांशः सामिक्षा तस्याश्च विश्वेदेवा देवता॥ तत्र यत्पृथक्कृतं तद्वाजिनं तस्य च वाजिनो देवता तत्रामिक्षा
द्रव्यकं विश्वेदेवताकमेकं कर्म तथा सति किमुपरितनेन वाजिभ्यो वाजिनमित्यनेन वाक्येन पू
र्वस्मिन्नेव कर्मणि वाजिनगुणो विधीयते उत कर्मान्तरं विधीयत इति संशयः। तत्र वाजोन्नं
मामिक्षा सा येषां विश्वेषां देवानामस्ति ते वाजिन इति व्युत्पत्त्या प्रकृतान्देवाननूद्य वाजिनगुणो
विधीयते एवमामिक्षया सह समुच्चीयते विकल्प्यते वेति पूर्वः पक्षः उत्पत्तिशिष्टामिक्षागु
णावरुद्धस्य कर्मणो गुणाकांक्षाभावाद्वाजिनस्यात्र तत्र प्रवेशासंभवे सति अन्यथानु
पपद्यमानो वाजिनगुणो वाजिनशब्दार्थस्य प्रकृतदेवताव्यतिरिक्तदेवतात्वं कल्पयित्वा क
र्मभेदे पर्यवस्यतीति राद्धांतः। अत्र यथा द्रव्यदेवताविलक्षणस्य यागरूपस्य भिन्नकर्म
भेदः॥ तथा प्रकृतेपि रूपभेदाद्व्रतभेदोभ्युपगंतव्यः। उपवासमात्रं जन्माष्टमीव्रतस्य स्वरू
पं॥ तदुक्तं वाक्येन तन्मात्रस्य प्रतीयमानत्वात्। ननु जयंतीव्रत एवोपवासं कुर्यादिति सुस
तिमात्रं वाक्यं स्मर्यते॥ ननु जन्माष्टमीव्रते। बाढं तथाप्यत्र विधिरुन्नेतव्यः। अन्यथैक

थाभोजने प्रत्यवायस्मरणानुपपत्तेः॥ सद्योज्जीयमानो विधिरुपवासमात्रं विधत्ते॥ ननु मै
उँ उपनिर्माणजागरणप्रतिमादानादिकं विध्युन्नयनहेतुप्रकरणप्रत्यवायवाक्येषु भोज
नमात्रनिषेधस्मरणात्॥ नहि तत्र निद्रायां दानाभावे च प्रत्यवायः स्मर्यते॥ अतउपवास
मात्रं तस्य स्व॰रूपं न तु दानादिकं॥ अत एवाकरणे प्रत्यवायमभिधाय वाक्यशेषे जयंति
प्रत्यक्षदानादिशंकाव्यावृत्तये केवलशब्द उपवासविशेषणत्वेन पठ्यते॥ केवलेनोपवासे
न तस्मिन्जन्मदिने मम॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र संशय इति॥ तस्माज्जन्मा
ष्टम्या एव तस्योपवासमात्रं स्वरूपं॥ यद्दिशिष्टास्तत्रापि जागरणदानादिकमनुतिष्ठंति
अनुतिष्ठंतु नाम अविरुद्धैः॥ पुण्यविशेषैर्व्रतस्योपोद्बलनसंभावात्॥ शास्त्रेण तु प्रापि
तउपवासमात्रे जयंती तस्य तु दानादिसहितउपवासः स्वरूपं॥ तद्विधायकशास्त्रेषु तथाभि
धानात्॥ तथा च पुराणे॥ तुष्टमर्ध्ये देवकीसूनो जयंतीसंभवव्रतं॥ कर्तव्यं वित्तमानेन भ ॥शिवा॥
क्त्या भक्तजनैरपीति॥ भविष्योत्तरेपि॥ मासि भाद्रपदेष्टम्यां निशीथे कृष्णपक्षके॥ शशां
कं वृषराशिस्थे ऋक्षे रोहिणिसंज्ञके॥ योगेऽस्मिन्वसुदेवाद्धि देवकी मामजीजनत्॥ ॥९०॥

माध० ॥१२१॥

नरकं यावदिंद्राश्चतुर्दशेति॥ स्कंदपुराणेपि॥ रुद्र उवाच॥ ननु यत्पापं संख्या बहुस्तस्य भोजने॥ तत्
पापं लभते मर्त्यो जयंत्यां भोजने कृते॥ ब्रह्महत्या सुरापानं गोवधः स्त्रीवधोपि वा॥ न लो
कायद्वारान्दूर्ल जयंती विमुखस्य च॥ क्रियाहीनस्य मूर्खस्य परान्नं भुंजतोपि वा॥ न कृत
घ्नस्य लोकोस्ति जयंती विमुखस्य च॥ न करोति यदा विष्णो जयंती संभवं व्रतं॥ यमस्य
वशमापन्नः सहते नरकव्यथां॥ जयंती वासरे प्राप्ते करोत्युदरपोषणं॥ स पीड्यते तिमा
त्रं तु यमदूतैः कलेवरं॥ यो भुंक्ते विमूढात्मा जयंती वासरे नृपेति॥ तैरेतैरकरणे
प्रत्यवायवाक्यैः पूर्वोक्तफलवाक्यैश्च नित्यकाम्यं जयंती व्रतं॥ ननु जन्माष्टमी व्रतेपि फ
लं स्मर्यते॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र संशय इति॥ अतस्तदपि नित्यकाम्यमिति
चेत्॥ मैवं॥ उपात्तदुरितक्षयमात्रेण काम्यत्वे संध्यावंदनादेरपि काम्यत्वप्रसंगात्॥ अ
तः सत्यपि पापक्षये फलं तत्र स्मरणं॥ तेन केवलं नित्यत्वं जन्माष्टमीव्रतस्य युक्तं॥ अतः ॥त्रिका॥
केवलनित्यत्वभेदाद्व्रतयोर्भेदः॥ तथा निर्देशभेदादपि व्रतभेदो द्रष्टव्यः॥ निर्देशभेद
श्च भृगुवाक्ये दृश्यते॥ जन्माष्टमी जयंती च शिवरात्रिस्तथैव च॥ पूर्वविद्धैव कर्त्तव्या ॥१२१॥

तिथिभांते च पारणमिति॥ यत्र जन्माष्टमी रोहिणीति पाठस्तत्रापि रोहिणी शब्देन नक्षु
त्रातिथिर्विवक्षिता॥ न तु केवलं रोहिणी तस्मिन्वाक्ये निर्दिष्टयोः पूर्वोत्तरवाक्ययोः जन्मा
ष्टमीशिवरात्र्योस्तिथित्वात् यद्येकमेवं व्रतं स्यात् निर्देशभेदो नोपपद्येत॥ ननु व्रतभे
देप्यस्ति दोषः यदा दिनद्वयेष्टमी वर्त्तते॥ रोहिणी तूत्तरदिन एव तदा पूर्वदिने जन्माष्टम्युपवा
सः परेद्युर्जयंत्युपवास इति॥ नैरंतर्येणोपवासद्वयं प्रसज्येत प्रसज्यतां नाम प्रमाणत्वादिति
चेत्॥ न परदिने भोजनोपवासलक्षणविरुद्धधर्मप्रसंगात् दुपवासस्यांगं पारणमिति वक्ष्य
ते॥ तथासति जन्माष्टम्युपवासांगस्य पारणस्य जयंत्युपवासस्य चैकत्र प्राप्तिः सो
यमेको दोषः॥ व्यतिरेकानुपलंभश्चायमपरो दोषः तथाहि॥ यथा जयंती व्यतिरिक्ता जन्माष्ट
मी क्वचिदुपलभ्यते तथा जन्माष्टमीव्यतिरिक्ता जयंती क्वचिदुपलभ्यते नत्वेव
मुपलभ्यते॥ अतो व्रतभेदपक्षोपि दुष्ट एव॥ अत्रोच्यते॥ न तावत्पारणोपवासानां काय
लक्षणो दोषोस्ति॥ आद्यो योदकपारणादिना पारणे संपादितेपि उपवासभंगाभावात्॥ अ
न्यथा द्वादशी पारणात्रयोदश्युपवासयोः क्वचित्सांकर्यं केन वार्यते न चाप्युपवासनैरंतर्यं॥
रोहिणी योगसंभवे जन्माष्टम्यामपि तत्रैव कर्तव्यत्वात्॥ सर्वत्र तिथिष्वलभ्ययोगस्य

माध०
॥१२२॥

केवलतिथिरूपत्वेन केवलायास्तिथेस्तत्रोपेक्षणीयत्वात्॥ अत एव व्यतिरेकानुपलंभोपप्ल
कारायानतु दोषाय। जन्माष्टम्यां रोहिणि निरपेक्षत्वेन व्यतिरेके उपलभ्यते नाम जयंत्या
स्तु योगरूपत्वेन रोहिण्या मिवाष्टम्या मपि सापेक्षत्वेन कथं व्यतिरेकशंकावकाशः॥ त
स्मात् व्रतद्वयपक्षे दोषो न कोप्यस्ति। किंच यदा रोहिणीयोगोस्ति तदा जन्माष्टमी जयंत्या
सोः सहप्रयोगस्यावश्यंभावित्वेन जयंतीव्रतवत् जन्माष्टमीव्रतं॥ अंतर्भवति। तस्मा
दपि नोपवासद्वयप्रसंगः॥ तदेवं व्रतभेदे दोषाभावात् साधकानां च नामभेदादीनां पंचाना
हित्रूनां सद्भावात् व्रतभेद एवावश्यमभ्युपेतव्यः॥ व्रतैक्यमस्तु यथोक्तरूपद्वयस्यानु
संधानभावादष्टम्युपवासस्सादृश्याच्च केचित्केषांचिदिति। सादृश्यं च गुणविकृति
त्वाद्वाश्रयाश्रयीभावाच्च संभाव्यते॥ तथा दर्शयागस्यापि गुणविकृतिः साकंप्रस्था
य्यनामको यागस्तत्र दर्शयागे यावंतोंगानि विषयाः प्रयोगास्ते सर्वेपि साकंप्रस्थाप
य्ये विधीयते भेदस्तु स्वल्प एव भवति। दर्शयागे सान्नाय्यहविषदधिपयसोः पृथगवदान
साकंप्रस्थायी ये तु सहैव अवदानं प्रस्थानं एतावता भेदेन गुणविकृतिर्विधीयते॥ ॥शिवा।
तथाग्निष्टोमस्य गुणविकृतिरुक्थ्याः अग्निष्टोमे द्वादशस्तोत्राणि उक्थ्ये कद्वाद ॥१२२॥

तस्मात्तां पूजयेत्तत्र शुचिः सम्यगुपोषितः। ब्राह्मणान्भोजयेद्भक्त्या दद्याद्धास्यां च दक्षि
णां॥ हिरण्यं मेदिनीं गावो वासांसि कुसुमानि च॥ यद्यदिष्टतमं श्रेष्ठं तत्तत्कृष्णो मे प्रीयता
मिति॥ भविष्यद्वह्निपुराणयोः॥ जयंत्यामुपवासश्च महापातकनाशनः॥ सर्वैः कार्यो महा
भक्त्या पूजनीयश्च केशव इति॥ वह्निपुराणेपि॥ कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि
जयंती नाम सा प्रोक्ता उपोष्या सा प्रयत्नतः इति स्मृत्यंतरेपि प्राजापत्यर्क्षसंयुक्ता श्रावणस्या
सिताष्टमी॥ वर्षे वर्षे तु कर्तव्या तुष्ट्यर्थं चक्रपाणिन इति। नारदसंहितायां॥ जयंतीं प्रकृत्य
स्मर्यते॥ उपोष्य जन्मचिह्नानि कुर्याज्जागरणं ततः॥ अर्धरात्रयुताष्टम्यामश्वमेधफ
लं भवेदिति॥ एवमेतेषु विधिवाक्येषु दानादियुक्त एवोपवासो जयंतिव्रतरूपत्वेन प्रती
यते॥ अतो रूपभेदात् हेतुभेदः शुद्धमिश्रत्वभेदादपि व्रतभेदो द्रष्टव्यः॥ अकरणे प्रत्यवाय
स्मरणात् शुद्धं नित्यं जन्माष्टमीव्रतं॥ करणे फलविशेषस्मरणादकरणे प्रत्यवायस्मर
णाच्च नित्यत्वेन काम्यत्वेन च मिश्ररूपं जयंतीव्रतं॥ तत्र फलवाक्यानि पूर्वपक्ष एव प्रसं
गादुदाहृतानि अकरणे प्रत्यवायश्च जयंतीं प्रकृत्य कस्मिंश्चित्पुराणे स्मर्यते। अकुर्वन्याति

त्राभ्योधिकानि त्रीणि स्तोत्राणि ततो गुणाधिक्यात् गुणविकृतित्वं एवमेवात्रापि जन्माष्टम्या
मुपवासोनुष्ठेयः जयंत्यां तु दानादिरधिको गुणः अतः सा गुणविकृतिः॥ आश्रयाश्रयीभावश्च ज्यो
तिष्टोमे मेतदंगावबलोपवासने च दृष्टः॥ तत्र ज्योतिष्टोम आश्रयः॥ तस्यांगान्युक्थोद्गीथानि॥
तत्रोक्थ्यं नाम बहृचाध्याधिना होत्रा शस्यमानं आज्यमरुत्वतीयनिष्केवल्यादिनामकं शास्त्रं॥
तत्रोक्थमाश्रित्य बहृचब्राह्मणोपनिषद्युपासनानि विहितानि तथा च श्रुतिः॥ उक्थमुक्थ्य
मिति वै प्रजा वदंति तदिदमेवोक्थमियमेव पृथिवीति अहमुक्थमस्मीति विद्यादिति च॥ उ
द्गीथो नाम साम वेदोदित उद्गात्रा यागे गीयमानः॥ साम्नो भागविशेषः॥ तच्चोद्गीथमाश्रित्य
छंदोग्योपनिषद्युपासनानि विहितानि॥ ओमित्येतदक्षरमुद्गीथमुपासीतेति॥ एवं प्रकृतेपि
जन्माष्टमीव्रते योयश्रावणकृष्णाष्टमीतामाश्रित्य सरोहिणीयोगनिमित्तं दानादिकं जयं
ती॥ व्रते विधीयते॥ अतो गुणविकृतित्वेनाश्रयाश्रयिभावेन वा सादृश्यसद्भावस्थानयोः
स्यता व्रतैक्यभ्रमो मंदबुद्धेर्जायतां॥ नाम प्रमाणन्यायदर्शिभिस्तु सर्वथैव व्रतभेदोंगीकर्त्त
व्यावृत्तिसिद्धांतयदेतादृग्वादश्चात्र यं पूर्वमुपपक्षितं व्रतभेदेपि तिथिनिर्णयवेपेचे

माध०
॥९३॥

त्ति॥ तत्र व्रतभेदो निरूपितः॥ ॥अथ तिथिर्निर्णेतव्या॥ निर्णयश्च वेधाधीनः अतो वेधः पूर्वम
भिधीयते॥ तिथ्यंतरेण वेधः एव प्रायेण कर्मकालत्वादुदयास्तमयवेलया त्रिमुहूर्त्तवेधः सा
मान्येन दर्शितः॥ पंचम्यां तु विशेषतः षण्मुहूर्त्तवेधो दर्शितः॥ जन्माष्टम्यां जयंत्यां चार्धरात्रि
प्रधानत्वाद्रात्रिवेधो योग्यो वेधोऽत्र प्रशस्तः॥ एतच्च जाबालिवक्षगोतमाभ्यां दर्शितं॥ अहःसु
तिथयः पुण्याः कर्मानुष्ठानयोर्दिवा॥ नक्तादिव्रतयोगेषु रात्रियोगो विशिष्यत इति॥ यद्यप्यु
पवासव्रतत्वादहनि रात्रौ च मुख्यत्वं युक्तितः समानं॥ तथाप्यर्धरात्रस्य मुख्यकालत्वं व
सिष्ठसंहितायामुक्तं॥ अष्टमी रोहिणीयुक्ता रात्र्यर्धे दृश्यते यदि॥ मुख्यकाल इति ख्यातस्त
त्र जातो हरिः स्वयमिति॥ एवं च सत्यर्धरात्रसद्भाव एवात्र कर्मकालव्याप्तिरित्यभिधीय
ते॥ एतदेवाभिप्रेत्य विष्णुरहस्ये पठ्यते॥ रोहिण्यामर्धरात्रे तु यदा कृष्णाष्टमी भवेत्॥
तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजमिति॥ तस्मिन्नर्धरात्रे कियत्प्रमाणमपे ॥त्रिवचा॥
क्षितमित्याकांक्षायामादित्यपुराणे दर्शितं॥ अर्धरात्रादधश्चोर्ध्वं कलयापि युता भवे
त्॥ जयंती नाम सा प्रोक्ता सर्वपापप्रणाशि ॥९३॥

माध०
॥१९८॥

यंतीनामसाप्रोक्तासर्वपापप्रणाशिनीति। कलया अतिसूक्ष्मत्वेन दुर्लक्ष्यत्वात् स एव यक्ष
तरमाह। अर्धरात्राद धस्ताद् ऊर्ध्वे एकार्धघटिका ग्राह्या। रोहिणी चाष्टमीयोगः सा उपवास व्रत
तादिष्विति। एका चार्धघटिका च एकार्धघटिके ताभ्यां आचेता कलामपेक्ष्या र्धघटिका
स्थूलातामप्येक्षपे घटिकास्थूलास्तत्रायमर्थः संपद्यते। पूर्वभागावसाने एका घटिका
उत्तरभागादावेकामिलित्वा ते तु निशीथशब्दवाच्यमुहूर्ते तावत्प्रविष्टाः सर्वैरपि सुल
क्षत्वान्मुख्यः कल्पः तदसंभवे घटिकान्वेषितव्या तस्या अप्यसंभवे कलेति। तत्र मुख्य
पक्षमभिप्रेत्य भविष्योत्तरे निशीथकृष्णपक्षगा तद्रूपकं तच्च वचनं पूर्वमेवसां कल्पेनो
दाहृतं। अत्र जयंत्यां चंद्रार्घ्यस्यावश्यकर्तव्यत्वात्। तस्य च चंद्रोदयकालीनत्वान्निश
थयोगप्रशस्तः। एतदवाभिप्रेत्य विष्णुधर्मोत्तरे अभिहितं। अर्धरात्रे तु योगो यं तारा
पस्कृदयेतथा। नियतात्मा शुचिस्नातः पूजां तत्र वर्तयेदिति। सोयमर्धरात्रयोगो ॥त्रिका॥
मुख्यः कल्पः यस्तु कृत्स्नाहोरात्रयोगः सो त्यंतमुख्यः पद्मपुराणे कदाचिदीदृग्योगः संभुक
ल्पः स च वसिष्ठसंहितायां प्रदर्शितः। अहोरात्रं तयोर्योगो ह्यसंपूर्णो भवेद्यदि। मु ॥१९८॥

हूर्तमप्यहोरात्रे योगश्चेत्तामुपोषयेदिति। पुराणांतरेपि। रोहिणी च यदा कृष्णपक्षेष्ट
म्यां द्विजोत्तम। जयंती नाम सा प्रोक्ता सर्वपापहराति थिः। वासरे वा निशायां वा य
त्र स्वल्पा च रोहिणी। विशेषेण नभोमासे सैवोपोष्या मनीषिभिरिति। योयं जयंती
व्रते योगनिर्णयः स एव जन्माष्टमीव्रते द्रष्टव्यः। यस्मिन्वत्सरे योगो नास्ति तस्मिन्वत्सरे
जन्माष्टमीव्रतमेकमेव वर्तते। तत्रापि नेतराष्टमीवद्दिवसवेधः। किंतु रात्रिवेध एव। त
स्मिन्नेव पुराणांतरे। दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणी कला। रोहिणीयुक्तारोहिणी
रहितास्त्वेति तत्र या रोहिणीरहिताष्टमी सापि द्विविधा। शुद्धा सप्तमीविद्धा चेति। स्त्र यो
दयमारभ्य प्रवर्तमानाष्टमी शुद्धा। निशीथादर्वाक् सप्तम्या कियत्यपि युक्ता वि
द्धा शुद्धापि पुनर्निशीथव्याप्त्यव्याप्तिभ्यां द्विविधा तत्र निशीथव्यापिन्यष्टमी व्र
तेमुख्या। विशेषेणेन्दुसंयुतामिति वचनात्। निशीथव्याप्तिरहितापि रात्रियु
क्ता प्रकुर्वीत तत्र वचने न गृहीतया भवति। ननु पूर्वेद्युर्निशीथादूर्ध्वमारभ्य पर
द्युर्निशीथादर्वाक् या समाप्यते। तस्या उभयत्र रात्रिसंबंधित्वात् कुत्रोपवास इति चे
त्। परेद्युरिति ब्रूमः।

माध०
॥९५॥

उभयत्र निशीथव्याप्त्यभावस्य रात्रिसंबंधस्य च तुल्यत्वेपि परेद्युः॥ प्रातःसंकल्पः कालमा
रभ्य प्रवर्तमानतया प्राशस्त्यं द्रष्टव्यं॥ सप्तमीविद्धापि त्रिविधा॥ पूर्वेद्युरेव निशीथव्यापि
नी परेद्युरेव निशीथव्यापिनी उभयत्र निशीथव्यापिनी चेति॥ तत्र प्रथमद्वितीययोः पक्ष
योर्निशीथव्याप्तेः प्रयोजकत्वेन या निशीथव्यापिनी सा विशेषेणेंदुसंयुतामिति वचनेन ग्र
हीतव्या भवति॥ या तु दिनद्वयेपि निशीथव्यापिनी तस्या उभयत्र रात्रियोगस्येंदुयोग
स्य च तुल्यत्वादनेन वचनेन न निर्णयः संभवति॥ नापि कृष्णपक्षेष्टमी चेदित्यादिभिरष्टमी
मात्रमुपजीव्य प्रवृत्तौ निर्णेतुं शक्यते तेषां महावैधविषयत्वात्॥ अन्यथा व्रतांतरेष्वपि नि
शीथवेधः प्रसज्येत तस्मादस्मिन्न्यायः परिशिष्यते॥ न्यायश्च परेद्युरुपवासं प्रापयति॥ सं
कल्पकालमारभ्य तिथिव्याप्तिसद्भावात् न च सा कल्याभिधायिवचनेन पूर्वेद्युरेव सं
कल्पकाले तिथिरस्त्विति शंकनीयं तस्या मुख्यतिथित्वाभावात्॥ किंच सा तिथिः स
कलाहेयायस्यामभ्युदितो रविरिति॥ वचनेन निशीथव्यापिनीमष्टमीं न विषयीकरोति॥
तस्मात्परेद्युरेवोपवासः॥ तदेवं चतुर्विधा रोहिणीरहिताष्टमी निर्णीता॥ अथ रोहि ॥श्राव५॥
णीसहिताष्टमी निर्णीयते॥ सापि चतुर्विधा शुद्धा विद्धा शुद्धाधिका विद्धाधिका चेति॥ ॥९५॥

नीति॥ वराहसंहितायामपि॥ सिंहेर्के रोहिणीयुक्ता नभःकृष्णाष्टमी यदि॥ रात्र्यर्ध
पूर्वापरगा जयंती कलयापि चेति॥ रात्रेरर्धं रात्र्यर्धं पूर्वं च परं च पूर्वापरे रात्र्यर्धपूर्वा
परे तयोर्गच्छति वर्तत इति रात्र्यर्धपूर्वापरगा घटिकयाशीत्यधिकशततमो भागः का
लः तावता परिमाणेन पूर्वार्धावसाने उत्तरार्धादौ च वर्तमाना ग्रहीतव्या॥ एवं तिथिरू
पा कृष्णाष्टमी द्विधा॥ पूर्वेद्युः सप्तमीयुक्ता परेद्युर्नवमीयुक्ता चेति तत्र सप्तमीयुक्ताया रा
त्रिपूर्वार्धावसाने एवं तिथिकलासद्भावो विधीयते॥ उत्तरार्धादौ स्वतःसिद्धत्वेन विनाभिवि
धेयत्वात् एतद्विपर्ययेण नवमीयुक्ताया मुत्तरार्धादौ विधीयते॥ पूर्वार्धावसानकलायाः सप्त
मीयत्वविषयत्वं विस्पष्टमेव तैरभिहितं॥ रोहिणीसहिता कृष्णा मासे च भाद्रपदेष्टमी॥ सप्त
म्यामर्धरात्राधः कलयापि यदा भवेत्॥ तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः॥ त
मेवोपवसेत्कालं कुर्यात्तत्रैव जागरणमिति॥ येयमष्टमी कृष्णपक्षादिमासविवक्षया भाद्र
पदे भवति॥ सैवाष्टमी शुक्लपक्षादिमासविवक्षया श्रावणे भवति॥ अत एव योगीश्वरः॥
रोहिण्यासहिता कृष्णा मासे च श्रावणेष्टमी॥ अर्धरात्रादधश्चोर्ध्वं कलयापि यदा भवेत्॥ ज

तत्र शुद्धायां संपूर्णयोगो निशीथयोगो यत् । किंचिन्मुहूर्त्तयोग इति त्रैविध्यं भवति ॥ एवं विद्धा
यामपि द्रष्टव्यं । एतेषु षड्भेदेषु दिनांतरयोगाभावाद् उपवासे संदेहो नास्ति । किंतु केवलं यो
गातारतम्यात् प्राशस्त्यतारतम्यं भवति । यत्किंचिन्मुहूर्त्तयोगाः प्रशस्तः अर्धरात्रयोग
प्रशस्ततरः । संपूर्णयोगः प्रशस्ततमः सर्वेष्वपि योगेषु योगमुपजीव्योपवासो विहितः
विष्णुरहस्ये । प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी ॥ मुहूर्त्तमपि लभ्येत सोपोष्या सा
महाफला ॥ मुहूर्त्तमप्यहोरात्रे यस्मिन्युक्तं हि लभ्यते । अष्टम्यां रोहिणीऋक्षं तां सुपुण्यामु
पोषयेदिति ॥ शुद्धाधिका तु सूर्योदयमारभ्य प्रवृत्ता परेद्युः सूर्योदयमतिक्रम्य वर्धते
सा च त्रिविधा ॥ परेद्युरेव रोहिणीयुक्ता पूर्वेद्युरेव रोहिणीयुक्ता दिनद्वयेपि रोहिणीयुक्ता
चेति ॥ तत्राद्ययोर्द्वयोः पक्षयोर्नास्त्युपवासे संदेहः । रोहिणीयुक्तायां द्वितीयकोर्ध
भावात् । तृतीयपक्षे तु रोहिणीयोगस्योभयत्र समानत्वेपि गुणाधिक्यात्पूर्वापरावो
पोष्यगुणाधिक्यं च प्रदर्शयिष्यते । येयमत्रोपोष्यत्वेनोक्ता पूर्वतिथिः सापि रोहिणीयोग
भेदात्त्रिधा भिद्यते । अष्टमी च सूर्योदयमारभ्य प्रवृत्ता रोहिणी कदाचित् । परेद्युरपि कियत्

माध०
॥१९६॥

तावर्धते ॥ कदाचित्पूर्वेद्युर्निशीथमारभ्यपरोहिणीप्रवर्तते ॥ कदाचिन्निशीथादूर्ध्वमारभ्यप्रवर्तते ॥
तत्रप्रथमपक्षेसंपूर्णत्वमेकोगुणः ॥ सकलकालमारभ्यकृत्स्नकालव्याप्तिर्द्वितीयोगुणः ॥ निशीथ
व्याप्तिस्तृतीयोगुणः परेद्युः न संभवति ॥ द्वितीयपक्षेनिशीथेजयंतीसद्भावोगुणः ॥ नचपरेद्युः
सोस्ति ॥ तृतीयपक्षेदिनद्वयेपिनिशीथे जयंतियोगोनास्ति ॥ पूर्वेद्युः केवलाष्टमीपरेद्युः के
वलारोहिणीतत्राष्टम्याप्रधानत्वात्प्राशस्त्यमभ्युपेयं ॥ सर्वत्रजयंतिव्यपदेशेषुरोहिणीसहिताष्ट
मीतिव्यवहारादष्टमीसहितारोहिणीतिव्यवहाराभावाच्चतिथिनक्षत्रयोः क्रमेणप्राधान्योप
सर्जनकालेवागंतव्यः ॥ उक्तेगुणाधिक्यात्पूर्वाधिकापूर्वैवोपोष्या ॥ निशीथादर्वाक्सप्तम्या
युक्तापरेद्युरपिविद्यमानाविद्धाधिका ॥ नन्वत्रनिशीथवेधाग्रासद्[illegible] ॥ बाढं वेधाया
अष्टम्या निशीथेसद्भावोत्रनिशीथवेधः नतुवेधिकायाः सप्तम्याः सद्भावः विद्धाधिका
यामपिपक्षत्रयं द्वयोः पक्षयोः संदेहाभावात्पूर्ववद्योजनीयः ॥ तत्रयापूर्वेद्युरेवरोहि
णीयुक्तातस्यामुपवासः आदित्यपुराणेस्मर्यते ॥ विनार्क्षंनुकर्तव्यानवमीसंयुताष्ट ॥त्रिवा॥
मी ॥ कार्याविद्धापिसप्तम्यारोहिणीसंयुताष्टमीति ॥ विष्णुधर्मेपि ॥ जयंतीशिवरात्रिश्च
कार्येभद्राजयान्विते ॥ कृत्वोपवासंतिथ्यंतेतथाकुर्यात्तुपारणमिति ॥ गारुडेपि ॥ जयं ॥१९६॥

माध०
॥९७॥

ह्रिया महती परेद्युः स्वल्पा अष्टमी तु निशीथादूर्ध्वं प्रवृत्तत्वात् पूर्वदिने स्वल्पा परेद्युर्महतीति सोऽयं
द्वितीयः प्रकारः ॥ उक्तविपर्ययेणाष्टमी रोहिण्योर्महत्त्वस्वल्पत्वे सोऽयं तृतीयः प्रकारः ॥ त्रिष्वप्येते
षु प्रकारेषु परेद्योपाष्यादिनद्वये ऽर्धरात्रयोगविषये ॥ पूर्वेद्युर्हतस्य वर्जनीयाप्रयत्नेनेति व
चनस्यात्रापि संचारयितुं शक्यत्वात् ॥ किंच प्रथमप्रकारस्यायोग्युद्दलको सिपरेद्युः संकल्प
कालमारभ्य तिथिनक्षत्रयोगस्य बहुकालव्यापित्वात् प्रशस्तत्वं द्रष्टव्यं ॥ द्वितीयप्रकारे प
रेद्युरष्टमीबाहुल्येपि नक्षत्रयोगस्यालब्धत्वादनुपादेयत्वमित्याशंक्य न कर्तव्या ॥ अतः
यु स्कंदपुराणे पठ्यते ॥ सप्तमीसंयुताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम ॥ प्राजापत्यं द्वितीयेह्नि मुहूर्ता
र्धं भवेद्यदि ॥ तदाष्टयामिकं ज्ञेयं प्रोक्ता व्यासादिभिः परेति तृतीयः प्रकारः ॥ परेद्युर्न
क्षत्रबाहुल्येप्यष्टमीयोगस्याल्पत्वादनुपादेयत्वमित्याशंका भवति ॥ सा च पद्मपुराणे निरसे
वर्त्यते ॥ पूर्वविद्धाष्टमी या तु उदये नवमीदिने ॥ मुहूर्तमपि संयुक्ता संपूर्णा साष्टमी भवेत् ॥ ॥श्रीव॥
कलाकाष्ठामुहूर्तापि यदा कृष्णाष्टमी यदि तिथिः ॥ नवम्यां सैव ग्राह्या स्यात् सप्तमीसंयु
तानहीति ॥ तदेवं जन्माष्टमीजयंतीभेदाश्च निरूपिताः ॥ तत्र जयंतीदिनेषूपवासदिने यदि
सोमवारो बुधवारो वा भवति तदा फलाधिक्यं भवति ॥ यदु ॥९७॥

क्तं पद्मपुराणे ॥ प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः ॥ यैः कृता श्रावणे मासि अष्टमी रो
हिणीयुता ॥ किं पुनर्बुधवारेण सोमेनापि विशेषतः ॥ किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मु
क्तिदेति ॥ स्कंदपुराणेपि ॥ उदये चाष्टमी किंचिन्नवमी सकला यदि ॥ भवेच्च बुधसंयुक्ता
प्राजापत्यर्क्षसंयुता ॥ अपि वर्षशतेनापि लभ्यते वाथवा न वेति ॥ विष्णुधर्मोत्तरेपि अष्ट
मीबुधवारेण रोहिणीसंयुता यदा ॥ भवेत्तु मुनिशार्दूल किं कृतैर्व्रतकोटिभिरिति ॥ यथो
क्तनित्याविहिततिथावुपवासं कृत्वा परेद्युः पारणेनोपवासं समापयेत् ॥ पारतीरसमा
साविन्त्या समाधानो निषेधेनोपपारणशब्दो यद्यपि समाप्तिमात्रमभिधत्ते तथाप्युपवास
समाप्तावेव लोकशास्त्रयोः प्रयोगात् ॥ पंकजादिशब्दवद्योगरूढो द्रष्टव्यः ॥ तथा च रूढो
पवासस्य चरमांगं भोजनमभिधत्ते ॥ अंगत्वं चोपवासविधिवाक्ये तिथिभांते च पार
णमिति विधानादवगंतव्यं ॥ नच नागप्रासस्य भोजनस्थाने नचैवं वचनेनोपवासांगति
थिनक्षत्रशेषयोर्निषेधः क्रियते न तु पारणानामकं किंचिदंगं विधीयत इति शंकनीयं ॥ तथा
सति पारणशब्दानुपपत्तेः ॥ ग्रासे हि भोजनशब्दः प्रसिद्धः उपवासांगे पारणशब्दः ॥ तत्र पा
रणशब्देन नागप्रासभोजनमविवक्षायां मुख्यार्थो बाधितव्यः स्यात् ॥ एकं दिना यदि पा
रणांगं न स्यात् तदा प्रतिनिधौ न विधिविधा

माध०
॥९८॥

नं नोपपद्येत। तद्विधानं च द्वादशीप्रस्तावे देवलेन स्मर्यते॥ संकटे विषमे प्राप्ते द्वादश्यां पारये
कथं॥ अद्भिस्तु पारणं कुर्यात् पुनर्भुक्तं न दोषकृदिति। अतः पारणशास्त्रबलात् प्रतिनि
धिबलाच्च पारणस्यांगत्वं। अत एवादित्यपुराणं॥ पारणांतं व्रतं ज्ञेयं व्रतांते द्विजभोजनं॥
असमाप्ते व्रते पूर्वे नैव कुर्याद्व्रतांतरमिति॥ तच्च पारणमुपवासादिनात्परदिने पूर्वाह्ने
कर्तव्यं॥ उपवासेषु पूर्वाह्णे पारणं भवेदिति। देवलस्मरणात्। एवं सामान्यतः पूर्वाह्णे पा
रणे प्राप्ते कृष्णदयवादाय तिथिभांते च पारणमित्यभिधीयते॥ शुद्धाधिकायां पूर्वेद्युरेव ज
यंतीयोगः उभयत्र जयंतीयोग इत्यनयोः पक्षयोः पूर्वेद्युरेवोपवासविधानात्। परेद्युः
केवलतिथेस्तिथिनक्षत्रयोर्वसिद्धत्वात्तदंते तथा पारणं विधीयते॥ विद्धाधिकायाम
पि पूर्वेद्युरेव निशीथे जयंतीयोग इत्यस्मिन्पक्षे तत्रैवोपवासविधानात्। परेद्युः केवलति
थेस्तिथेर्योर्वसिद्धत्वात्तत्तदंते पारणविधिः॥ तथा शुद्धाधिका विद्धाधिकयो
रुभयोरपि यदा परेद्युरेव जयंतीयोगः॥ तदा परतिथावुपवासविधिरेव जयंतीयोग ॥श्री॥
उभयत्रापि जयंती योग इत्यनयोः पक्षयोः पूर्वेद्युरेवोपवासविधानात् प्रतिषिध्यते॥ ॥९८॥
अष्टम्यामथ रोहिण्यां न कुर्यात्पारणं क्वचित्। हन्यात्पुराकृतं कर्म उपवासार्जितं फलं॥

स्यात्पूर्वविद्धायामुपवासं समाचरेत्॥ तिथ्यंते वोत्सवांते वा व्रती कुर्याच्च पारणमिति॥ या परेद्युरे
व रोहिणीयुक्ता विद्धाधिका तत्रोपवासः॥ पूर्वतिथौ रोहिणीयोगाभावात्॥ परेद्युस्तु तत्सद्भा
वात् पूर्वदिने हते नप्राजापत्यर्क्षसहिता विष्णुरहस्यवचने नोपवासो विधीयते॥ या तूभयत्र रो
हिणीयुक्ता विद्धाधिका सापि निशीथे जयंतीयोगमपेक्ष्य पूर्ववदुपविधाभिधीयते॥ पूर्वेद्युरेव निशी
थे योगवती परेद्युरेव तादृशी॥ उभयत्रापि तादृशी॥ उभयत्र निशीथयोगरहिता चेति तत्रया
पूर्वेद्युरेव निशीथे योगवती सा पूर्वे पोष्या॥ तदुक्तं॥ पद्मपुराणे॥ कार्या विद्धापि सप्तम्या सरो
हिण्या सहिताष्टमी॥ तत्रोपवासं कुर्वीत तिथिभांते च पारणमिति॥ अर्धरात्रेषु त्रिषु पक्षेषु परदि
न एवोपवासः॥ तत्र दिनद्वये निशीथयोगमभिलक्ष्य ब्रह्मवैवर्तेपि दृश्यते॥ वर्जनीया प्रयत्नेन
सप्तमीसंयुताष्टमीति। सर्क्षापि न कर्तव्या सप्तमीसंयुताष्टमी॥ अविद्धायां सनक्षत्रायां
जातो देवकीनंदन इति। यदा दिनद्वये निशीथयोगेपि परत्रोपवासः तदा किमु वक्तव्यं परेद्युरे
व निशीथयोगे दिनद्वयेपि निशीथयोगराहित्यं बहुधा जायते॥ तद्यथा॥ पूर्वेद्युर्निशीथादूर्ध्वं
तिथिनक्षत्रद्वयं प्रवृत्तं तच्च परेद्युर्निशीथादर्वाक् गेवसमाप्तमित्येकः प्रकारः पूर्वदिने रो

तिथिरष्टगुणं हंति नक्षत्रं तु चतुर्गुणं ॥ तस्मात् प्रयत्नतः कुर्यात् तिथिभांते च पारणमिति ॥
स्कंदपुराणेपि ॥ तिथिनक्षत्रनियमे तिथिभांते च पारणं ॥ अतोन्यथा पारणे तु व्रतभंगम
वाप्नुयादिति ॥ तिथिभांतश्च द्विविधः ॥ उभयांत एकतरांत इति दिनद्वये जयंतीयोगवत्यां
मुख्याधिकायां परदिने अष्टमीमुहूर्त्तत्रयं नातिक्रामति ॥ रोहिणी तु पूर्वेद्युर्निशीथाद
र्वाक् कदाचित्प्रवृत्ता सती तदनुसारेण परेद्युः समाप्यते तत्र यदि दिवैव समाप्यते तदा
तामतिवाह्यैव पारणं कुर्यात् ॥ यदि रात्रौ समाप्तिस्तदा तत्समाप्तिः प्रतीक्षणीया रा
त्रिपारणस्य निषिद्धत्वात् ॥ तथा च ब्रह्मवैवर्त्ते ॥ सर्वेष्वेवोपवासेषु दिवा पारणमिष्य
ते ॥ अन्यथा पुण्यहानिः स्यात्कृते धारणपारणमिति ॥ गरुडपुराणे ॥ अन्यतिथ्याग
मे रात्रौ तामसस्त्वेजसो दिवा ॥ तामसे पारणं कुर्वन् तामसीं गतिमश्नुत इति ॥ दिवाप
पारणं कुर्वन्नपि नाष्टमीवेलां कुर्यात् ॥ एकतरस्याभावात् ॥ अष्टमीव्रतिभिः रात्रौ रोहि
ण्यां वर्त्तमानायामपि पारणं कार्यं ॥ स एव नारदीये ॥ तिथिनक्षत्रसंयोगे उपवा
सो यदा भवेत् ॥ पारणं न कर्त्तव्यं यावन्नैकस्य संक्षयः ॥ संयोगिके व्रते प्राप्ते यत्रैकोपिरा

माध॰ युज्यते॥ तत्रैवं पारणं कुर्यादेवं देवविदो विदुरिति। पूर्वेद्युरेव निशीथे जयंती योगवत्यां वि
॥९९॥ द्धाधिकायां पारणादिने तिथिभांतो बहुधा संपद्यते अहन्युभयांते तदेकतरांते वा रात्रावु
भयांते तदेकतरांते वेति॥ तेषु चतुर्ष्वपि भेदेषु निर्णयः स्मर्यते॥ तिथ्यंतो न भवेद्यद्धि
नक्षत्रांतमथापि वा॥ अर्धरात्रेऽथवा कुर्यात्पारणं त्वपरेहनीति। उपवासदिनादपरे
ऽहनि दिवसे यद्युभयांतस्तदा पारणमिति मुख्यः कल्पः नक्षत्रांतमित्यनेनैकतरां
तत्वं विवक्षितं सोयमनुकल्पः यदि रात्रौ निशीथादर्वागुभयांतस्तदेकतरांतो वा भवति
तदा दिवसे मुख्यानुकल्पयोरुभयोरप्यसंभवाद्रात्रौ पारणस्य निषिद्धत्वात्तद्बाधार्था
तत्राप्युपवासप्राप्ते पारणस्य प्रतिप्रसवः क्रियते। अर्धरात्रेपि वा कुर्यादित्युक्तिरनु
पारणे एप्यलस्य प्रतीक्षणीयत्वेपि रोहिण्यंतो न प्रतीक्षणीयः याः काश्चित्तिथयः प्रोक्ताः
पुण्या नक्षत्रसंयुताः॥ ऋक्षांते पारणं कुर्याद्विना श्रवणरोहिणीमिति। स्मरणान्नै
वं॥ नक्षत्रं चतुर्गुणमिति प्रसवापस्योदाहृतत्वात्॥ तस्माद्विना श्रवणरोहिणीमिति ॥शिव॥
वचनेन केवलनक्षत्रोपवासविषयं॥ पूर्वोक्तानुकल्पविषयं वेत्यवगंतव्यं॥ अत्रोक्त ॥९९॥

माध०
॥१००॥

मेयदुदाहृतवचनस्यापि सामान्यरूपत्वात्॥ तस्मात्पक्षयोरुभयोरपि पूर्वविद्धैव ग्राह्या॥
इति नवमीनिर्णयः॥ ॥आश्वियुक्शुक्लनवमी मूलाद्यक्षेषु च त्रिषु। येन केनापि संयु
क्ता महती परिकीर्तिता॥ चंडिकामर्चयेत्तत्र विधिवत्प्रयतो नरः॥ मूलपूर्वोषाढोत्तराषा
ढाख्येषु त्रिषु नक्षत्रेषु येन केनापि यानक्षत्रेण युक्ता॥ आश्वियुक्शुक्लनवमी महतीति म
हानवमीत्यर्थः॥ प्रभासखंडे॥ आश्वियुक्शुक्लपक्षे तु याष्टमी मूलसंयुता॥ सा महान
वमी प्रोक्ता त्रैलोक्येपि सुदुर्लभा॥ भविष्यपुराणे॥ कन्यागते सवितरि शुक्लपक्षेष्टमी यु
ता मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता॥ अष्टम्यां च नवम्यां च जगन्मातरमंबिकां॥
पूजयित्वाश्विने मासि विशोको जायते नर इति। ॥अथ दशमी निर्णीयते॥ ॥तस्या
च न तिथ्यंतरविद्धयोरूपादेयविभागोस्ति। तिथ्यंतरे काश्चित्पूर्वविद्धा ग्राह्या काश्चिदु
त्तरविद्धा न तु दशम्यां किंचिन्नियामकमस्ति एतदेवाभिप्रेत्य अंगिरा आह। संपूर्णा दश
मी कार्या परया पूर्वयाथवा॥ युक्ता नर्दूषिता यस्मात्तिथिः सा सर्वतोमुखीति। य
था संपूर्णा तिथीर्दोषरहिता तथा विद्धापि। प्रतिपत्संमुखी कार्या स्यादोति थेर्मुखं पूज्य ॥श्री वा॥ ॥१००॥

मित्यक्तं॥ दशम्यास्तु मूलाग्रयोरुभयोरपि मुख्यत्वात्॥ पूज्यत्वमुभयत्र समानं॥ एवं स्थि
ते सति अत्रेदं चिंत्यते॥ किं पुरुषेच्छया पूर्वोत्तरविद्धयोरन्यतरा ग्राह्या किं वा नियामकं शा
स्त्रमस्तीति। तत्र न तावदिच्छा स्त्रेपत्त्ययमः॥ किंचिन्म्रत्यक्तं सर्वतोमुख्यत्वं कथं नाम पूर्वोत्तर
विद्धयोर्द्वयोः समबलत्वं शास्त्रेण प्रतीयते॥ अतो व्रीहिभिर्यजेत यवैर्वेत्यादिवदैच्छिको
विकल्पोवगंतव्यः॥ न चाष्टदोषग्रस्तत्वाद्विकल्पो न युक्त इति शंकनीयं॥ गत्यंतराभावेन दो
षग्रस्तस्याप्यवश्याश्रयणीयत्वात्॥ तदुक्तमाचार्यैः॥ एवमेषोष्टदोषोपि यद्व्रीहियववाक्य
योः विकल्प आश्रितस्तस्य गतिरन्या न विद्यत इति। तस्मादैच्छिको विकल्प इति प्राप्ते ब्रू
मः॥ अस्त्यत्र वचनं व्यवस्थापकं॥ ॥तथा च मार्कंडेयः॥ ॥शुक्लपक्षे तिथिर्ग्राह्या य
स्यामभ्युदितो रविः॥ कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविरिति॥ नन्वनेन वचने
न पक्षभेदेन विकल्प आश्रितः॥ तथा थासति दोषाष्टकस्य तादवस्थ्यादैच्छिकविक
ल्प एव कुतो न स्वीक्रियत इति चेत्॥ मैवं॥ सति व्यवस्थापके शास्त्रे पुरुषेच्छाया अप्रसरा
त्॥ अत एव स्मर्यते॥ उदासीने तु शास्त्रार्थे पुरुषेच्छा नियामिकेति ननु पक्षभेदेन व्यवस्थै

माध० स्यानुपपन्नाः स्कंदपुराणे पूर्वविद्धायाएव ग्राह्यत्वाभिधानात् ।। दशमी चैव कर्त्तव्या सदुर्गा द्वि
।।१०२।। जसत्तमेति ।। सदुर्गा नवमीमिश्रा एवं ।। पक्षद्वयेपि पूर्वविद्धास्वीकारे पूर्वयापरयाथवेति
परविद्धाविधानस्य निरवकाशत्वप्रसंगात् ।। नवमीमिश्रत्ववचनं ।। कृष्णपक्षे चरिता
र्थं ।। ननु परविद्धानिषेधो ।। ब्रह्मवैवर्ते पठ्यते प्रतिपत्पंचमीभूता सावित्रीवटपौर्णिमा ।।
नवमीदशमीचैव नोपोष्या परसंयुतेति ।। ।।कूर्मपुराणे।। ।।नंदाविद्धातु या पूर्णा
द्वादशीमकरेसिता ।। मृगुणा नष्टचंद्राद्या चैएता वै निःफलास्मृता इति ।। अत्रैकादशा
नंदात्वात् दशम्याश्च पूर्णत्वादेकादशीविद्धा दशमी निःफलेतिगम्यते ।। बा दं ।। अयमपि
निषेधः पूर्वोक्तन्यायेन कृष्णपक्षविषयतया योजनीयः ।। तस्मात्पूर्वोत्तरविषयो दशम्याः पक्षभे
देन व्यवस्था द्रष्टव्या ।। ।।इति दशमीनिर्णयः ।। ।।अथैकादशीनिर्णयते ।। ।।तत्रैकादश्या ।।शिका।
मुपवासो दानादिकं चेत्युभयं वेदितव्यं ।। उपवासोजयंतीवन्नित्यकाम्यरूपः द्विरूपं चत
स्य विधिप्रमाणबलादध्यवसीयते ।। उपवासविधिवाक्येषु नित्यशब्दसदाशब्दादीनां नि ।।१०२।।
त्यत्वसाधकानां स्मरणात् नित्यत्वसिद्धिः ।। तानि साधकानि संग्रहकारपि संगृहीतानि ।।

स्य तु तिथिनक्षत्रयोरुभयोरनुपवर्तमानयोरपि प्राक्देवसंपूज्य क्रियमाणपारणंनै
वदुष्यति ।। तिथ्यंते वोत्सवांते वा व्रती कुर्वीत पारणमितिस्मरणात् ।। ।।इत्यष्टमीजयं
तीनिर्णयः ।। ।।अथ नवमीनिर्णयते ।। सा च विधिनिषेधरूपाभ्यामन्वयव्यतिरेका
भ्यां पूर्वविद्धैव ग्राह्या ।। तद्विधिश्च युग्मादिवाक्येवसुरंध्रयोरितिपठ्यते ।। पद्मपुराणे
पि ।। अष्टमी नवमी विद्धा नवम्या चाष्टमीयुता ।। अर्धनारीश्वरप्राया उमामाहेश्वरी ति
थिः ।। भविष्यपुराणे द्वादशीकल्पेपि ।। नवम्या सह कार्या स्यादष्टमी नवमी तथेति ।। नि
षेधस्तु स्कंदपुराणे दर्शितः ।। न कुर्यान्नवमीं तात दशम्यां तु कदाचनेति ।। विधिनिषेधा
वुभावपि ब्रह्मवैवर्त्ते दर्शितौ ।। अष्टम्या नवमी विद्धा कर्त्तव्या फलकांक्षिभिः ।। न कुर्यान्न
वमीं तात दशम्यां तु कदाचनेति ।। सेयं नवमी भविष्योत्तरपुराणोक्तदुर्गाव्रतादौ द्रष्टव्या ।।
ननु कृष्णनवम्याः पूर्वविद्धत्वेपि शुक्लनवमी परविद्धा स्यात् शुक्लपक्षे तिथिर्ग्राह्या यस्याम
भ्युदितो रविरिति ।। वचनादितिचेन्न पूर्वोक्तेषु वचनेषु दशमीविद्धाया साक्षान्निषेधा
त् तस्य निषेधस्य सामान्यरूपत्वात् ।। कृष्णपक्षे संकोचोस्त्विति चेत् ।। तत्संकोचहेतो

नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत्। इत्यकृतातिक्रमेदोषः श्रुतेस्त्यागचोदनात्।
फलाश्रुतेर्वीप्सया च तन्नित्यमिति कीर्तितमिति। अत्र शब्दादीन्यपि नित्यत्वसाधकानि। नित्य
शब्दस्तु दाहृतो गारुडपुराणे। उपोष्यैकादशी नित्यं पक्षयोरुभयोरपीति। सदाशब्दस्तु सनत्कु
मारसंहितायां। एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोरिति। यावदायुःशब्दस्तु विष्णुर
हस्ये। एकादशी न प्रमोक्तव्या यावदायुःप्रवृत्तिभिरिति। अतिक्रमनिषेधः कात्यायनेन दर्शितः।
एकादश्यामुपवासेन्न कदाचिदतिक्रमेत्। विष्णुनापि। एकादश्यां न भुंजीत कदाचिदपि मान
व इति। अकरणे दोषमाह सनत्कुमारः। न करोति हि यो मूढ एकादश्यामुपोषणं। स नरो नर
कं याति रौरवं तमसावृतं। एकादश्यां मुनिश्रेष्ठ यो भुंक्ते मूढचेतनः। प्रतिग्रासं स भुंक्ते तु कि
ल्बिषं श्वादिविट्समं। निष्कृतिर्मद्यपस्योक्ता धर्मशास्त्रे मनीषिभिः। एकादश्यां त्वकामस्य नि
ष्कृतिः क्वापि नोदितेति। मद्यपानान्मुनिश्रेष्ठ पातेवन रके व्रजेत्। एकादश्यां त्वकामस्त्वपि त्व
भिः सह मज्जतीति। नारदीयेपि। यानि कानि च पापानि ब्रह्महत्यासमानि च। अन्नमाश्रित्य ति
ष्ठंति संप्राप्ते हरिवासरे। तानि पापान्युपाश्नाति संप्राप्ते हरिवासर इति। स्कांदे। मातृहापि

माध०

॥१०२॥

स्पृहान्वै च गुरुहा भ्रातृहा तथा ॥ एकादश्यां तु यो भुंक्ते पक्षयोरुभयोरपीति ॥ अकरणे वा समापनेपि
दोषमुक्तो विष्णुरहस्ये ॥ समाधाय विधानेन द्वादशीव्रतमुत्तमं ॥ तस्य भंगं नरः कृत्वा रौरवं नरकं
व्रजेत् ॥ परिगृह्य व्रतं सम्यक् एकादश्यादिकं नरः ॥ न समापयते तस्य गतिः पापीयसी भवे
त् ॥ नारदीयेपि ॥ द्वादशीव्रतमादाय व्रतः भंगं करोति यः ॥ द्वादशाब्दं व्रतं चीर्णं निःफलं तस्य
जायते ॥ इति ॥ अत्यागश्चोदनादर्शितो विष्णुरहस्ये ॥ परमापदमापन्नो हर्षे वा समुपस्थि
ते ॥ सूतके मृतके चैव न त्यजेद्द्वादशीव्रतमिति ॥ फलश्रवणं केषुचिद्वचनेषु विस्पष्टं ॥ तत्र
कात्यायनः ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपीति ॥ स्कांदे ॥ उपोष्यैकादशीं सम्यक् पक्ष
योरुभयोरपीति ॥ कूर्मपुराणे ॥ पि ॥ वदन्तीह पुराणानि भूयोभूयो वरानने ॥ न भोक्तव्यं न भो
क्तव्यं संप्राप्ते हरिवासरे इति ॥ वीप्सामाह सनत्कुमारेपि ॥ पक्षे पक्षे च कर्त्तव्यमेकादश्यामु
पोषणमिति ॥ नारदोपि ॥ नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ॥ पक्षे पक्षे च कर्त्तव्य
मेकादश्यामुपोषणमिति ॥ तदेवं नित्यशब्दादिभिरष्टभिर्हेतुभिरुपवासस्य नित्यत्वं सि ॥शिव॥
द्धं ॥ काम्यत्वं च सायुज्यादिफलश्रवणादवगम्यते ॥ तदुक्तं विष्णुरहस्ये ॥ यदीच्छेद्विष्णुसायु ॥१०२॥

रुषार्थ एव तस्य खादिरत्ववत्क्रत्वंगबोधकप्रमाणाभावात्॥ बाढं अस्त्येव वैषम्यं अप्रयोजकं
तु तत्सूत्रकारेण प्रमाणद्वयस्यैव द्वैरूप्ये साधकत्वोपन्यासात्॥ तथा च सूत्रं॥ एकस्य
तूभयत्वे संयोगपृथक्त्वमिति॥ अतः केवलपुरुषार्थस्याप्युपवासस्य द्वैरूप्यमविरु
द्धं॥ यदि बुध्यारोहाय सदृष्टांतोपेक्षितः॥ तर्ह्यग्निहोत्रादिदृष्टांतो न ह्यग्निहोत्रं क्र
त्वर्थं तस्य स्वयमेव क्रतुत्वात् तस्य च नित्यकाम्यत्वे वाक्यद्वयादवगम्यते॥ यावज्जीवम
ग्निहोत्रं जुहोतीति नित्यत्वावगमकं वाक्यं अग्निहोत्रं जुहुयात्स्वर्गकाम इति काम्यत्वाव
गमकं तत्र क्रत्वर्थत्वाभावेन केवलपुरुषार्थस्यैव अतोग्निहोत्रस्य नित्यत्वं काम्यत्वं
चेति द्वैरूप्यमस्ति॥ तत्र यस्य तन्त्रांतराभ्यासादिकर्मभेदहेत्वाभावेनैकस्यैव कर्मणा
स्तत्प्रयोगभेदादवगंतव्यं॥ प्रयोगभेदश्च यावज्जीवाधिकरणे निरूपितः॥ तस्य चाधिक
रणस्य संग्राहकावेतौ श्लोकौ भवतः॥ यावज्जीवं जुहोतीति धर्मः कर्मणि पुंसि वा॥ काल ॥शिव॥
त्वात्कर्मधर्मोतः काम्य एकः प्रयोज्यते॥ न कालो जीवनं तेन निमित्तप्रविभागतः॥ का
म्यप्रयोगो भिन्नस्याद्यावज्जीवप्रयोगत इति॥ अयमर्थः॥ अग्निहोत्रं जुहुयात्स्वर्ग ॥१०३॥

काम इति काम्याग्निहोत्रं श्रूयते॥ तथा वाक्यांतरं पठंति॥ यावज्जीवमग्निहोत्रं जुहोतीति तत्र संश
यः॥ यावज्जीवमित्यनेनाधिकारांतरं चोद्यते किं वा काम्याग्निहोत्रे गुणविधिरिति॥ तदर्थम
यं निरधितं किं वा यावज्जीवमित्यत्र कः कर्मधर्म उत पुरुषधर्म इति॥ यावज्जीवमित्यनेन शब्देन
पुरुषपरमितः कालो विधीयते॥ काम्येन चाग्निहोत्रेण कालविशेष आकांक्षितः॥ तस्य च का
लस्यानेन समर्पणाद्यं कर्मधर्मः तस्माद्गुणविधिः॥ तथा चाग्निहोत्रस्य काम्यप्रयोग एव
न त्वन्यो नित्यप्रयोग इति प्राप्ते ब्रूमः॥ जीव शब्दः प्राणधारणं च पुरुषधर्मः कालस्याचेतन
स्य तदसंभवात् तेन स्वर्गकामेनेव यावज्जीवनमपि किंचिन्निमित्तं तस्मादधिकारांतरचोदना
तथा सति जीवननिमित्तो नित्यप्रयोगः कामनानिमित्तः कादाचित्कप्रयोगश्च परस्परं भिद्यत
इति सिद्धांतः॥ अनेनाग्निहोत्रन्यायेन प्रकृतस्याप्युपवासस्य निमित्तभेदेन परस्परं भिन्नेद्य
त इति सिद्धांतः॥ अनेनाग्निहोत्रन्यायेन प्रकृतस्याप्युपवासस्य निमित्तभेदेन नित्यप्र
योगः काम्यप्रयोगश्चास्त्येकस्य कर्मणः कालभेदेन कर्तृभेदेन वा विना द्वौ प्रयो
गौ न संभवतः॥ न चात्र कालभेदः संभवति॥ नित्यकाम्ययोर्द्वयोरप्येकादश्यामेव विधाना

माध० त्॥ नाप्यत्र कर्तृभेदोऽस्ति यद्यपि काम्यं परित्यज्य नित्यमनुष्ठानं तु शक्यं तथापि काम्यमनु
॥१०४॥ तिष्ठासुना नित्यस्य परित्यक्तुमशक्यत्वात्॥ अतः कर्त्रैक्यात् कालैक्याच्च नित्यकाम्यरूपौ
द्वौ प्रयोगौ न घटेते॥ नायं दोषः॥ विविदिषाधिकरणन्यायेन सकृदेवानुष्ठितः॥ प्रयोग
द्वयसिद्धेः तस्यां चाधिकरणस्य संग्राहकावेतौ श्लोकौ भवतः॥ विद्याधर्माश्रयार्थं च द्विः
प्रयोगोऽथवा सकृत्॥ प्रयोजनविभेदेन प्रयो गोऽपि विभिद्यते॥ श्राद्धार्थभुक्त्या तृ
प्तिः स्यात्मनाश्रमस्तथा॥ अनित्यनित्य संयोगयुक्तिः स्यात् खदिरे स्तुतेति॥ अय
मर्थः॥ तमेतं वेदानुवचनेन ब्राह्मणा विविदिष षंति॥ यज्ञेन दानेन तपसानाशकेनेति॥
श्रुतिवाक्येन परमात्मविद्यासिद्धये गृहस्थाश्रमधर्मत्वं यज्ञादीनां सर्वश्रुतिस्मृतिषु
प्रसिद्धमिति तत्संशयः किं यज्ञादीनां द्विः प्रयोगः उत सकृदिति॥ तत्र प्रयोजनभेदात् प्र
योगभेद इति पूर्वः पक्षः निमंत्रितेन ब्राह्मणेन क्रियमाणस्य भोजनस्य द्विप्रयोजने अ ॥श्रीरा॥
न्यकर्तृकश्राद्धनिष्पत्तिः स्वात्मतृप्तिश्च न च तत्र द्विर्भुज्यते॥ तद्वद् ब्रह्मविद्यार्थमनुष्ठि
तेन यज्ञादिकर्मणा प्रयोजनद्वयं सिध्यति॥ न च नित्यानित्यसंयोगविरोधः खदिरे ॥१०४॥

सुकलत्रप्रदा ह्येषा शरीरारोग्यदायिनी ५

ज्यं सुसुस्कृता संपदमात्मनः॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपीति॥ कूर्मपुराणेऽपि॥ यदीच्छे
दिति पूर्ववत्॥ कात्यायनः॥ संसारसागरोत्तारमिच्छन् विष्णुपरायणः॥ ऐश्वर्यं संततिं
स्वर्गं मुक्तिं वा यद्यदिच्छति॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपीति॥ स्कंदपुराणेऽपि॥ यदी
च्छेद्विपुलान् भोगान् भुक्तिं वात्यंतदुर्लभां॥ एकादश्यामुपवसेत् पक्षयोरुभयोरपीति॥ नारदोऽपि॥
एकादशीसमं किंचित् पापत्राणं न विद्यते॥ स्वर्गमोक्षप्रदा ह्येषा राज्यपुत्रप्रदायिनीति॥ ए
तदेव फलश्रवणं काम्यत्वे सिद्धं॥ ननु काम्यत्वमनित्यत्वं॥ असति काम्ये परित्यक्तुं श
क्यत्वात्॥ तथा सत्येकस्य कर्मणो नित्यत्वकाम्यत्वाभ्यां द्वैविध्यांगीकारे नित्यानित्यसंयो
गविरोधः प्राप्नोति॥ नायं दोषः खादिरत्ववक्ष्यमाणन्यायेन द्वैरूप्योपपत्तेः॥ तथा हि खादिरो
यूपो भवतीति क्रतौ नित्यः खादिरो विहितः॥ खादिरं वीर्यकामस्य यूपं कुर्वीतेति तस्मि
न्नेव क्रतौ काम्यत्वेनानित्यः खादिरो विहितः॥ तत्र यथा प्रमाणद्वयसंबंधादेकस्यापि खा
दिरस्य द्वैरूप्यमंगीकृतं॥ तथात्रापि द्विविधप्रमाणसद्भावादुपवासस्य द्वैरूप्यं किं न स्यात्॥
ननु विषमो दृष्टांतः नित्यः खादिरः क्रत्वर्थः काम्यस्तु पुरुषार्थः॥ उपवासस्तु नित्योऽपि पुरु

एवद्वाक्यद्वयेनानुष्ठानप्रसक्तेः ॥ तच्च पूर्वमुपपादितं तस्मात्सकृदेव प्रयोग इति एवमत्रापि सकृदेवो
पवासं कुर्वतः काम्यप्रयोगो नित्यप्रयोगश्चेत्युभयं सिध्यति । ननु सकृदनुष्ठानेनानेकार्थसिद्धौ
धाभवति तंत्रेण वा प्रसंगेन वा ॥ एतद्यथा दर्शपूर्णमासयोः षट्प्रधानयागानां मध्ये त्रयाणां
सकृत्सकृदनुष्ठितेन प्रयाजाद्यंगेनोपकारः सिध्यति तदिदं तंत्रं पश्वर्थमनुष्ठितेन प्रयाजादिना
पशुतंत्रमध्यवर्तिनः पुरोडाशस्याप्युपकारः सिध्यति सोयं प्रसंगः एवं च सति प्रकृतेपि तंत्रप्रयोग
योः कतरस्योपादानमिति चेत् ॥ प्रसंगस्येति ब्रूमः ॥ काम्यप्रयोगेणैव नित्यप्रयोगस्यापि सि
द्धत्वात् ॥ तथा च स्मृतिः ॥ काम्येपि नित्यसिद्धिः स्यात्प्रसंगेनोभयात्मके इति तदेवमेकादश्युप
वासस्य नित्यत्वकाम्यत्वलक्षणं द्वैरूप्यं विरोधाभावाद्द्वैरूप्यमभ्युपेयमिति स्थितं ॥ अत्रो
पवासांगतिथिनिर्णयस्य वेधाधीनत्वात् प्रथमं दशमीवेधो निरूप्यते ॥ स च वेधस्त्रिविधः ॥
अरुणोदयवेधः सूर्योदयवेधः पंचदशनाडिवेधश्चेति तत्र अरुणोदयवेधो भविष्यपुराणोद
र्शितः ॥ अरुणोदयकाले तु दशमी यदि दृश्यते ॥ सा विद्धैकादशी तत्र पापमूलमुपोषणं
॥ अरुणोदयवेलायां दशागंधो भवेद्यदि । दूषितं तु प्रयत्नेन वर्जनीयं नराधिपेति । गरुडपुरा

लेपि॥ दशमीशेषसंयुक्तो यदि स्यादरुणोदयः॥ नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतमिति॥ अ-
रुणोदयस्य प्रमाणं स्कंदनारदाभ्यामुक्तं॥ उदयात्प्राक् चतस्रस्तु नाडिका अरुणोदय इति॥
तस्मिन्नरुणोदयकाले वेधा बहुविधास्ते च प्रश्नोत्तराभ्यां ब्रह्मकैवर्ते दर्शिताः॥ कीदृशास्तु
भवेद्वेधो योगो विप्रेंद्र कीदृशः॥ योगवेधौ ममाचक्ष्व याभ्यां दुष्टमुपोषणं॥ चतस्रो घटि-
काः प्रातररुणोदयनिश्चयात्॥ चतुष्पंचविभागोत्र वेधादीनां किलोदितः॥ अरुणोदयवेधः स्या-
त्सार्धं तु घटिकात्रयं॥ अतिवेधो द्विघटिकाप्रभासंदर्शनाद्रवेः॥ महावेधोपि तत्रैव दृश्यते
र्को न दृश्यते॥ तुरीयस्तत्र विहितो योगः सूर्योदये बुधैरिति॥ अयमर्थः॥ वेधातिवेधमहावेध-
योगाश्चत्वारस्तूपवासस्य दूषकाः॥ तत्र रवेः प्रभासंदर्शनात्पूर्वं सार्धघटिकात्रयमेकादश्या
व्याप्तं ततः प्राचीने घटिकार्धे अरुणोदयसंबंधिनि दशमीसद्भावे वेध इत्युच्यते॥ यदा घटि-
काद्वयमुपरितनमेकादश्या व्याप्तं पूर्वं तु घटिकाद्वयं दशम्या व्याप्तं तदानीमयमतिवेध इ-
त्युच्यते॥ यदा सूर्योदयदर्शनादर्वाङ्निसंदेहकालमेकादशी व्याप्नोति ततः पूर्वः सर्वोप्य-
रुणोदयकालो दशमीव्याप्तः तदा महावेध इत्युच्यते॥ यदा सूर्योदये स्पष्टे सति पश्चादेकादशी

माध० ॥१०६॥

द्वादशनाडीभिर्दिक्‌ पंचदशभिस्तथा॥ भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति॥ तदेवं
वेधत्रयं निरूपितं॥ तत्र पंचदशनाड्यादिवेधस्य वेधांतरस्य निगमो दर्शितः॥ सर्वप्रकारवे
धोयमुपवासस्य दूषकः॥ सार्धसप्तमुहूर्तैस्तु वेधोयं बाध्यते व्रतमिति॥ सर्वप्रकार इत्यत्र
प्रकारशब्देन कलाकाष्ठादयो वेधादयो वा गृह्यंते॥ नात्र त्रिमुहूर्तत्वं॥ तिथ्यंतरवद्वेधो विव
क्षितं॥ किंतु लवकाष्ठाद्यधिकमपि पर्याप्तं तदुक्तं नारदीये॥ लववेधोपि विप्रेंद्र दशम्यैका
दशीं त्यजेत्॥ सुराया बिंदुना स्पृष्टं गांगं भांडं वनिर्मलमिति॥ स्कंदपुराणेपि॥ कलाकाष्ठा
दिगाप्येव दृश्यते दशमी विभो॥ एकादश्यां व्रतं राजन्कर्तव्यं न कदाचनेति॥ स्मृत्यंतरेपि क
लार्धेनापि विद्धा स्याद्दशम्यैकादशी यदि॥ तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेदिति॥
सोयं कलाकाष्ठादिवेधोरुणोदयेस्पृश्यदि ये च समानः॥ तत्रारुणोदयवेधो वैष्णवविषयः
तत्र गारुडपुराणे विस्पष्टमवगम्यते॥ दशमीदोषसंयुक्तो यदि चेदरुणोदयः॥ नैवोपोष्यं वै
ष्णवेन तद्दिनैकादशीव्रतमिति॥ वैखानससंपंचरात्रादिवैष्णवागमोक्तदीक्षां प्राप्तो वैष्ण
वागमोक्तदीक्षां प्राप्तो वैष्णवः॥ अत एव स्कंदपुराणे वैष्णवस्वरूपमभिहितं॥ परमापद ॥श्री॥
मापन्नो हर्षे वा समुपस्थिते॥ नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी॥ समात्मा सर्वजीवे ॥१०६॥

५ वोपाध्यं वेद्धवेनतद्दि [illegible] ५

षु निजाचारादविप्लुतः॥ विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यते॥ इति विष्णुपुराणे
पि॥ न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे॥ न हरति न च हंति किंचि
दुच्चैः सितमनसं तमवेहि विष्णुभक्तमिति॥ यथोक्तगुणसंपन्नो वैष्णवदीक्षां प्राप्तो यस्तं प्र
ति तिथिरेवं निर्णेतव्या॥ एकादशी द्विविधा॥ अरुणोदयवेधवती शुद्धा चेति॥ तत्र वेधवती
सर्वथा त्याज्या तत्र नैकादशीव्रतमिति गारुडपुराणे॥ सामान्येन प्रतिषेधात्॥ विशेषतस्तु
संयुक्तादिभेदेन प्रतिषेधो द्रष्टव्यः॥ तथा हि॥ य एते वेधातिवेधमहावेधयोगाख्या दोषाः
पूर्वमुक्ताः तेषु सत्स्वेकादशी संयुक्ता संपूर्णा संदिग्धा संकीर्णा नामभिर्व्यवह्रियते॥ अरुणोद
यस्य प्रथमघटिकायां दशमीसद्भावो वेध इत्युक्तः॥ स च द्विविधः॥ घटिकाप्रारंभे कृत्स्नघ
टिकायां च दशमीव्याप्तिभेदात्॥ तत्र प्रारंभमात्रे दशमीयुक्तैकादशी संयुक्तेत्युच्यते॥ कृत्स्न
घटिकाव्याप्तिदशमीयुक्तैकादशी संदिग्धेत्युच्यते॥ अरुणोदयप्रथममुहूर्ते दशमीव्याप्ति
रतिवेधः तद्युक्तैकादशी संयुक्तेत्युच्यते॥ सूर्यमंडलसंदर्शनात्पूर्वं देहवेलायां दशमीस
द्भावो महावेधः तद्युक्तैकादशी संपूर्णेत्युच्यते॥ ता एताः संयुक्तादयश्चतस्रोपि त्याज्याः

माध० ज्याः तथाच गोभिलः ॥ अरुणोदयवेलायां दशमी यदि संगता ॥ संपृक्तैकादशी तां तु मोहिन्यै
॥१०७॥ न्याद्दत्तवान्प्रभुरिति ॥ गारुडपुराणेपि ॥ उदयात्प्राक् त्रिघटिकाव्यापिन्येकादशी यदा संदिग्धै
कादशी नाम सा त्याज्या धर्मकांक्षिभिरिति ॥ उदयात्प्राक् मुहूर्तेन व्यापिन्येकादशी यदा ॥ संयुक्तै
कादशी नाम वर्जयेद्धर्मविप्लवे ॥ आदित्योदयवेलायां आरभ्य षष्टिनाडिका ॥ संकीर्णैकाद
शी नाम त्याज्या धर्मफलेप्सुभिः ॥ पुत्रपौत्रप्रवृद्ध्यर्थं द्वादश्यामुपवासयेत् ॥ तत्र क्रतुशतं पुण्यं
त्रयोदश्यां तु पारणमिति ॥ यद्यपि पूर्वत्र वेधवाक्ये सार्धं तु घटिकात्रयमित्युक्तं ॥ अत्र सं
दिग्धैकादशीवाक्ये त्रिघटिकेत्युक्तं ॥ तथापि नैतावता वैषम्येणाविरोधः शंकनीयः ॥ उभ
यत्र द्वयस्यापि दशमीवेधत्यागपरत्वात् ॥ तदेवं सामान्यविशेषाभ्यां प्रतिषिद्धत्वात् ॥ अरु
णोदयविद्धैकादशी वैष्णवेन परित्याज्या ॥ यस्तु योगसंज्ञश्चतुर्थो वेधस्तस्य त्याज्यत्वम
र्थसिद्धं ॥ अरुणोदयवेधोपि यदा त्याज्यते ॥ तदा किमु वक्तव्यं ॥ सूर्योदयवेध इति वचनं
कएव प्रोक्तं ॥ पूर्वमेवोदाहृतं ॥ या तु चतुर्विधवेधरहिता शुद्धैकादशी सा द्विधा आधिक्ये ॥श्री॥
न युक्ता तद्रहिता चेति ॥ आधिक्यं च त्रिविधं ॥ एकादश्याधिक्यं द्वादश्याधिक्यं उभयाधि ॥१०७॥

शी प्रवृत्ता ततः प्राप्यामुदयवेलायां दशमी विद्यते ॥ तदा योगाख्यो नामिधेयो दोषो भवति
स च वेधाद्यपेक्षया तुरीयो भवतीति ॥ नन्वरुणोदयात्पूर्वं यद्यर्धरात्रादूर्ध्वं दशमीकला वि
द्येत तदा नोपवासः तदभावे तूपवासः कर्तव्यः ॥ तथा च स्मृतिः ॥ अर्धरात्रात्परा यत्र एका
दश्युपलभ्यते ॥ तत्रोपवासः कर्तव्यो न तु वै दशमीलुप्तिआ तो यथा निर्दिष्टेभ्यस्त्रिभ्यो वेधेभ्यो
न्योपि कश्चित्त्वेधोस्तीति चेत् ॥ मैवं ॥ अर्धरात्रेपि यदा वर्ज्यः तदा किमु वक्तव्यमरुणोदयवेध
इति वक्तुमर्धरात्रवेध इत्युपन्यस्तः ॥ न तु वेधाभिप्रायेण तदेकैतद्बहुलकेवर्तिनो नकेनस्प
ष्टीकृतं अर्धरात्रे तु केषांचिद्दशम्या वेध इष्यते ॥ अरुणोदयवेलायां नावकाशो विचार
णा ॥ कपालवेध इत्येके त्याहुराचार्या ये हरिप्रियाः ॥ नतन्मममतं यस्मात् त्रियामा रात्रिभि
ष्यत इति यस्तु वेधातिवेधमहावेधयोगाः पूर्वमभिहिताः ॥ ते पुत्रपौत्ररूपा वेधाः चतुर्थउद
यवेधः तच्चोदयवेधं क्वापोह्यत ॥ उदयोपरि विद्धा तु दशम्यैकादशी यदा ॥ दानवेभ्यः प्री
णनार्थं दत्तवान्पाकशासन इति ॥ स्मृत्यंतरेपि ॥ दशम्याः प्रांतमादाय यदोदेति दिवाकरः
तेन स्पृष्टं हरिदिनं दत्तं जंभासुराय वै इति ॥ पंचदशनाडीवेधस्तु स्कंदपुराणे दर्शितः ॥ नागो

धिक्यं चेति। विष्णुधर्मे तु पक्षे ष्टरुणोदयमारभ्य प्रवर्त्तां शुद्धामप्येकादशीं परित्यज्य
ज्यपरेद्युरुपवासः कर्त्तव्यः॥ तत्रैकादश्याधिक्ये नारद आह॥ संपूर्णैकादशी यत्र द्वा
दश्यां वृद्धिगामिनी॥ द्वादश्यां लंघनं कार्यं त्रयोदश्यां तु पारणमिति॥ स्मृत्यंतरेपि॥
एकादशी यदा पूर्णा परतः पुनरेव सा॥ पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणमिति॥
विष्णुरहस्ये॥ एकादशी कलाप्राप्ता येन द्वादश्युपोषिता॥ तुल्यं क्रतुशतेन स्यात्त्रयोद
श्यां तु पारणमिति॥ द्वादश्याधिक्ये व्यास आह॥ एकादशी यदा लुप्ता परतो द्वादशी भवेत्॥
उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिमिति॥ उभयाधिक्ये विष्णुरहस्ये॥ संपूर्णैकाद
शी यत्र प्रभाते पुनरेव सा॥ तत्रोपोष्या द्वितीया तु परतो द्वादशी यदीति॥ नारदोपि॥
संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ सर्वैरेवोत्तरा कार्या परतो द्वादशी यदीति॥
स्मृत्यंतरेपि॥ एकादशी यदा पूर्णा द्वादशी परतो यदि॥ एकादशी परित्याज्या द्वादशीं
समुपोषयेदिति॥ उभयाधिक्यरहितायां तु शुद्धायां न कोपि संदेहोस्ति॥ इति वैष्ण
वदीक्षायुक्तानामेकादशीनिर्णीता॥ ॥अथ श्रौतस्मार्तानुष्ठान

माध०
॥१०८॥

पर्यवसितानां पंचरात्रादिदीक्षारहितानामेकादशी निर्णीयते ॥ अरुणोदयवेधस्य वै
ष्णवविषयत्वेप्युक्तितो ॥ सत्कदयवेधः स्मार्त्तानुष्ठायिविषयत्वेन परिशिष्यते ॥ अत
एवस्मर्यते ॥ अतिवेधामहावेधा ये वेधास्तिथिषुस्मृताः ॥ सर्वेप्येवे धाविज्ञेयावेधः
सूर्योदयेमतः इति ॥ एवंच सूर्योदयवेधमपेक्ष्यैकादशी द्विधा भिद्यते शुद्धा विद्धा चेति ॥
तत्र शुद्धायां पूर्ववच्चातुर्विध्यं भवति ॥ एकादश्याधिक्यं द्वादश्याधिक्यमुभयाधिक^
क्यं चेति ॥ एवं विद्धायामपि चत्वारो भेदा उन्नेयाः ॥ शुद्धायामेकादश्याधिक्ये द्वयोस्तिथ्यो^ रनुभयाधिक्ये
रुपवासयोग्यतामह बृहद्वसिष्ठः ॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ॥ लुप्यते द्
द्वादशी तस्मिन्नुपवासः कथं भवेत् ॥ उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैः इति ॥ उ
भयोरधिकारिभेदेन व्यवस्था स्कंदपुराणे दर्शिता ॥ प्रथमेहनि संपूर्णा व्याप्याहोरा
त्रसंयुता ॥ द्वादश्यां च तथा तात दृश्यते पुनरेव च ॥ पूर्वा कार्या गृहस्थैस्तु यतिभिस्तु
त्तरा विभो इति ॥ एतच्चापरेद्युर्द्वादश्यभावविषयं ॥ तथा च स्मृत्यंतरं ॥ पुनः प्रभात ॥शिवा॥
समये घटिकैका यदा भवेत् ॥ अत्रोपवासो विहितश्चतुर्थाश्रमवासिनां ॥ विधवायां ॥१०८॥

माध०
॥१०१॥

दर्शितः॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ तत्रोपोष्या परा पुण्या परतो द्वादशी यदीति
वाराहपुराणेपि। एकादशी विष्णुना चेद् द्वादशी परतो यदि। उपोष्या द्वादशी तत्र यदी
च्छेत् परमं पदमिति॥ स्मृत्यंतरेपि। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ वैष्णवी चे
त्त्रयोदश्यां घटिकैकापि दृश्यते॥ गृहस्थोपि परां कुर्यात् पूर्वां नोपवसेत्तदा॥ पूर्णा
प्येकादशी त्याज्या वर्धते द्वितयं यदीति एवमेकैकाधिक्येपि निर्णयो दर्शितः॥
अनुभयाधिक्ये तु नास्ति संदेह इति शुद्धायां चत्वारो भेदा व्यवस्थापिताः॥
अथ विद्धायां चत्वारो भेदा व्यवस्थाप्यंते। अत्राप्येकादश्याधिक्ये पूर्ववद् गृहिय
त्योर्व्यवस्था द्रष्टव्या॥ तदाह प्रचेताः॥ एकादशी विवृद्धा चेत् शुक्ले कृष्णे विशेष
तः॥ उत्तरां तु यतिः कुर्यात् पूर्वामुपवसेद् गृहीति॥ न चैतद्वचनं शुद्धाधिक्यविषयता
यामिति शंकनीयं। बाधकाभावेन विद्धाधिक्येपि तद्वचनप्रवृत्तेर्निवारयितु ॥ शिव॥
मशक्यत्वात्॥ द्वादश्याधिक्ये परेद्युरुपवासः॥ तदाह व्यासः॥ एकादशी यदा
लुप्ता परतो द्वादशी भवेत्। उपोष्या द्वादशी तत्र यदीच्छेत् परमां गतिमिति॥ ॥१०१॥

लुप्ता आद्ये मिश्रितत्वात् परतो वृद्ध्यभावाच्चाक्षयं गतेत्यापत्। उभयाधिक्येपि परेद्युरुपवासः॥
तदुक्तं भविष्यपुराणे। एकादशी द्वितीयुक्ता वर्धमाने विवर्जयेत्। क्षयमार्गस्थिते सोमे कुर्वीत तद्द
शमीयुतामिति। उभयानाधिक्ये तु नैवास्ति संदेहः॥ कोट्यंतराभावात्॥ न च विद्धत्वादस्ति सं
देह इति वाच्यं। असति कोट्यंतरे विद्धाया अप्युपादेयत्वात्। तथा च विष्णुरहस्ये। एकादशी भवे
त्काचिद्दशम्या दूषिता तिथिः। वृद्धिक्षयौ भवेतां चेत् क्षयपक्षे तु पुण्यदेति। इति विद्धाभेदा व्यवस्था
पिताः। अत्र शुद्धविद्धयोरुभयोरप्येष निर्णयसंग्रहः। एकादशीद्वादश्योरुभयोरपि वृद्धौ
परेद्युरुपवासः॥ द्वयोरप्यवृद्धौ पूर्वदिने एकादशीमात्रवृद्धौ गृहियत्योर्व्यवस्था द्वादशीमात्र
वृद्धौ शुद्धायां सर्वेषां पूर्वेद्युर्विद्धायां परेद्युरिति। तदेवं शास्त्रार्थे व्यवस्थिते सति। यानि
यावंति मुनिवाक्यानि विज्ञापकानि निषेधकानि वा तानि सर्वाण्यपि यथोक्तनिर्णयाविरोधे
न व्यवस्थापनीयानीति। तं व्यवस्थापनप्रकारं प्रदर्शयामः॥ प्रतिपत्प्रभृतयः सर्वा उद
यादोदयाद्रवेः॥ संपूर्णा इति विख्याता हरिवासरवर्जिता इति। हरिवासरे तु संपूर्णत्वं प्रका
रांतरेणोक्तं। गारुडपुराणे। उदयात् प्राग्यदा विप्र मुहूर्तद्वयसंयुता॥ संपूर्णैकादशी नाम
तत्रैवोपवसेद् गृहीति। भविष्यपुराणेपि। आदित्योद

मा०प०

॥११०॥

यवेलायां प्राकृमुहूर्त्तद्वयान्विता ॥ एकादशी तु संपूर्णा विद्धान्या परिकीर्तिता इति । तदेतद्वचनेत्रयम
रुणोदयोपजीवनेन प्रवृत्तत्वात् । वेधस्य वीयविषयं । दशमीवेधनिंदकानि वचनानि द्विविधान्
युपलभ्यंते ॥ तत्र कानिचिदरुणोदयानुवादेन प्रवृत्तानि । तथा भविष्यपुराणे ॥ अरुणोदय
काले चेद्दशमी यदि दृश्यते ॥ तत्रनैकादशी कार्या धर्मकामार्थनाशिनी इति । कौत्सः ॥ अरुणोदय
वेलायां विद्धा काचिदुपोषिता ॥ तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेदिति । एतद्दृशानि स
र्वाणि वेधस्य विषयाणीति द्रष्टव्यानि । अरुणोदयानुवादमंतरेण दशमीवेधनिंदकानि वच
नान्युपलभ्यंते ॥ तथाह नारदः ॥ दशम्यानुगता यत्र तिथिरेकादशी भवेत् । तत्रापत्यवि
नाशश्च परेत्य नरकं व्रजेदिति । ब्रह्मवैवर्त्ते । दशमीशेषसंयुक्तां यः करोति विमूढधीः ॥ एकाद
शीफलं तस्य न स्याद्द्वादशवार्षिकमिति विष्णुरहस्येपि । दशमीशेषसंयुक्तामुपोष्यैकादशीं कि
ल ॥ संवत्सरकृतेनेह नरो धर्मात्प्रमुच्यत इति । इमानि सर्वाण्यप्यरुणोदयसूर्योदयवेधद्वयसा
मान्येन प्रवृत्तत्वाद्वेधस्मार्तोभयविषयाणि ॥ तत्र वेधस्य विषये निरंकुशं प्रवर्त्तते ॥ स्मा
र्त्तविषयेत्तु भयाधिक्ये द्वादश्याधिक्ये च सर्वपुरुषविषयाणि एकादश्याधिक्ये तु यतिमात्रवि
षयाणि द्रष्टव्यानि । दशमीविद्धाभ्यनुज्ञापकानि कानिचिद्वचनान्युपलभ्यंते ॥ तथा स्कंद

॥शिव॥

॥११०॥

श्वस्तत्रैव परतो द्वादशी न चेदिति ॥ गारुडपुराणेपि ॥ पुनः प्रभातसमये घटिकैका य
दा भवेत् । अत्रोपवासो विहितो वनस्थस्य यतेस्तथा । स्याद्विधवाया अत्रैव पर
तो द्वादशी न चेदिति ॥ पुराणांतरेपि ॥ एकादशी यदा पूर्णा परतः पुनरेव सा । पूर्व्वं कृ
तु शतं स्यात् त्रयोदश्यां तु पारणमिति ॥ एवमेकादश्याधिक्यपक्षे गृहस्थयत्यो
र्व्यवस्थाभिहिता । द्वादश्याधिक्ये तु पूर्वेद्युरुपवासमाह नारदः ॥ नैव चेदेकादशी
त विद्धा द्वादशी परतः स्थिता ॥ उपोष्यैकादशी तत्र यदीच्छेत्परमं पदमिति । स्कंदपुराणे
पि ॥ शुद्धाप्यदा समा हीना समाक्षीणाधिकोत्तरा ॥ एकादश्यामुपवसेन्न शुद्धां
वैष्णवीमपीति । दशमीवेधरहिता शुद्धैकादशी यदा ॥ परेद्युरुदयादूर्ध्वं नास्ति किंतु
दयसमा ततो न्यूना वा द्वयोरपि पक्षयोर्द्वादशी परेद्युरुदयसमा न्यूनाधिका वा भव
ति ॥ तत्र सर्वत्र शुद्धैकादश्युपोष्या न तु शुद्धां वैष्णवीं द्वादशीमुपवसेदित्यर्थः ॥ ए
वं च सति प्रकरणे द्वादश्याधिक्ये कादशीसमान्यूनयोरन्यतरत्वा प्रथमे चोपोष्या स्या
त्फलं च भवति । उभयाधिक्ये परेद्युरुपवासो गारुडपुराणे

पुराणे॥ त्रयोदश्यां न लभ्येत द्वादशी यदि किंचन। उपोष्यैकादशीं तत्र दशमीमिश्रितापि
वेति। मन्वंतरे। उपोष्यैकादशी तत्र द्वादशी न भवेद्यदि। दशम्यापि हि मिश्रैव एकादश्येव ध
र्मकृदिति। बृहद्वसिष्ठः॥ द्वादशी स्वल्पमल्पापि यदिनस्यापरे हनि। दशमीमिश्रिता कार्या
महापायकनाशिनीति। कृष्णशृंगः॥ एकादशी न लभ्येत सकला द्वादशी भवेत्। उपोष्य दशमी॥
विद्धा ऋषिरुद्दालको ब्रवीत्। हारीतोपि। त्रयोदश्यां यदा तस्या द्वादशी घटिकाद्वयं॥ दशम्ये
कादशी विद्धा सैवोपोष्या सदा तिथिरिति। एतद्वचनानि सर्वाण्यप्यभ्याधिक्ये सर्वपुरुषविषया
णि। एकादश्याधिक्येनुग्रहमात्रविषयाणि द्रष्टव्यानि न त्वेतानि वैष्णवविषयाणि।
वैष्णवप्रकरणे बुधिधाम्यनुक्तायाअदर्शनात्। संपूर्णैकादशीपरित्यागविषयाणि कानिचिद्व
चनान्युपलभ्यंते। तथा स्कांदे। एकादशी भवेत्पूर्णा परतो द्वादशी यदि। तदा ह्येकादशीं त्यक्त्वा
द्वादशीं समुपोषयेदिति। कालिकापुराणे। एकादशी यदा पूर्णा परतो द्वादशी भवेत्। उपोष्या द्वाद
शी तत्र तिथिवृद्धिः प्रशस्यत इति। गरुडपुराणे। पूर्णा भवेद्यदा नंदा भद्रा चैव विवर्धयेत्। तदो
पोष्या तु भद्रा स्यात् तिथिवृद्धिः प्रशस्यत इति॥ ईदृशानि सर्वाण्यपि वैष्णवविषयाणि॥ तिथिक्षय
विषयाणि कानिचिद्वचनान्युपलभ्यंते॥ नारदः॥ यदि दैवात्तु संसिध्येत् एकादश्यां तिथित्रयं।

माध०
॥१११॥

तत्र क्रतुशतं पुण्यं द्वादश्यां पारणं भवेदिति ॥ कूर्मपुराणे ॥ द्विस्पृष्टैकादशी यत्र तत्र संनिहितो
हरिः ॥ तामेवोपवसेत्कामी अकामो विष्णुतत्परः ॥ इति ॥ अत्राद्यंतयोर्दशमीद्वादश्योर्मध्ये एकाद
शीवृद्धेत्यादशादिनत्रयं यदा प्राप्नोति तदा परतो द्वादशीवृद्धिरवृद्धिश्चेत्युभयं भवति ॥ तत्र यदा
वृद्धिस्तदा यथोक्तैवदनुपोष्यं ॥ तदुक्तं पुराणांतरे ॥ दिनत्रयस्पृते देवि नोपोष्या दशमीयुता ॥
सैवोपोष्या सदा पुण्या परतश्च सरेहनीति ॥ द्वादशीवृद्धौ एकादशीवृद्धौ यदालुप्तेत्यनेन पर
युरुपवास इति पूर्वमेवाभिणउक्तं ॥ यदा त्वाद्यंतयोरेकादशीत्रयोदश्योर्मध्ये द्वादशी स्येताहु
त्रं दिनत्रयं तदा नारदेन स्मर्यते ॥ एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ॥ तत्र क्रतुशतं
पुण्यं त्रयोदश्यां तु पारणमिति ॥ एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ॥ त्रिस्पृशा नाम
सा प्रोक्ता ब्रह्महत्यापहेति ॥ तदेतद्वैष्णवविषयं यतिविषयं वा द्रष्टव्यं ॥ गृहस्थेतु तन्नि
षिद्धं ॥ तथा च कूर्मपुराणे ॥ एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ॥ उपवासं न कुर्वी
त पुत्रपौत्रसमन्वित इति ॥ पद्मपुराणे ॥ एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ॥ गृहस्थे
कृतदेहो रात्रेरोपोष्यं तस्कतार्थिभिरिति ॥ यत्तु [illegible] ॥ अविद्धानि निषिद्धैश्च
लभ्यंते दिनानितु ॥ मुहूर्तैः पंचभिर्विद्धा ग्राह्या चैकादशी तिथिरिति ॥ तदर्थे विद्धा

॥शिव॥
॥१११॥

माध० ॥१९३॥

नतु स्ताता पितृत्वत्री सुतेन वा। निष्फलं तु भवेत्तस्य यः करोति व्रतादिकमिति। आदिशब्दाद्दत्ता
लंकारगंधधूपं जनानामुपसंग्रहं मनुः। पुष्पालंकारवस्त्राणि गंधधूपानुलेपनमिति। पत्य
नुमत्या पत्नी व्रतादिष्वधिकारिणी भवति। तदाह कात्यायनः। भार्या भर्तुर्मतेनैव व्रतादी
नाचरेत्सदेति। अत्र कूर्मे वक्ष्येच कारः कृष्णैकादश्यामुपवासनिषेधपरः। तथा च कूर्मपुरा
णे। संक्रांत्यां कृष्णपक्षे रविशुक्रदिने तथा। एकादश्यां न कुर्वीत उपवासं च पारणमिति।
गौतमोपि। आदित्येऽहनि वै संक्रांतावसिते कादशीषु च। व्यतिपाते कृते श्राद्धे पुत्री नोपव
सेद्गृहीति। अत्र पुत्रीति विशेषणं पुत्रवतो विशेषदोषदर्शनार्थं तथा च पद्मपुराणे।
संक्रांत्यामुपवासेन पारणेन युधिष्ठिर। एकादश्यां च कृष्णायां ज्येष्ठपुत्रो विनश्यतीति।
नारदोपि। द्वादशक्षये च संक्रांत्यामेकादश्यां सितारवेः। उपवासं न कुर्वीत यदीच्छेत्संततिं ध्रु
वमिति। यत्र संक्रांत्यादिषूपवासनिषेधः। संक्रांत्यादिनिमित्तको नैकादशीनिमित्तकः।
तथा च कात्यायनः। एकादशीषु कृष्णासु रविसंक्रमणे तथा। चंद्रसूर्योपरागे च न कुर्या ॥शिव॥
त्पुत्रवान्गृहीति। तत्र प्रयुक्तोपवासस्य निषेधोयमुदाहृतः। प्रत्यक्षं युक्तं तरयुक्तस्य न विधि
र्न निषेधनमिति। जैमिनिरपि। तन्निमित्तोपवासस्य निषेधोयमुदाहृतः। नानुषंग ॥१९२॥

कृतो यास्तोपवासो नित्यमुपोषणमिति। अयमर्थः। एकादश्युपवासस्य नित्यत्वात्संक्रांत्या
उपवासस्य काम्यत्वात्काम्योपवासनिषेधेन नित्योपवासनिषेधः सिध्यतीति। संक्रांत्या
दिनिमित्तकोपवासः संवर्तेनोक्तः। अमावास्या द्वादशी च संक्रांतिश्च विशेषतः। एताः प्रशस्ता
स्तिथयो भानुवारस्तथैव च। अत्र स्नानं जपो होमो देवतानां च पूजनं। उपवासं तथा दानमेक
कैकं पावनं स्मृतमिति। गृहस्थस्य शुक्लायामेव नित्योपवास इत्युक्तं। नैमित्तिककाम्यो
पवासौ तु कृष्णायामपि कर्तव्यौ। तत्र नैमित्तिकं स्मृत्यंतरे पठ्यते। शयनीबोधिनीमध्ये
या कृष्णैकादशी भवेत्। सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचनेति। काम्यः स्कांदपु
राणे। पितॄणां गतिमन्विच्छन् कृष्णायां समुपोषयेदिति सनत्कुमारः। भानुवारेण संयुक्ता च
कृष्णा संक्रांतिवर्जिता। एकादशी सदोपोष्या सर्वसंपत्करीति थिरिति। मत्स्यपुराणेपि। ए
कादश्यां तु कृष्णायामुपोष्य विधिवन्नरः। पुत्रान्नायुः समृद्धिं च वसायुज्यं च समश्नुती
ति। दिनक्षये पुत्रवतो गृहस्थस्योपवासो निषिद्धः। तथा च पितामहः। एकादश्यां दिन
क्षये उपवासं करोति यः। तस्य पुत्रा विनश्यंति मघायां पिंडदो यथेति। मत्स्यपुराणेपि॥

दिनक्षये र्कसंक्रांतौ ग्रहणे चंद्रसूर्ययोः॥ उपवासं न कुर्वीत पुत्रपौत्रसमन्वित इति। दिनक्ष
यलक्षणं॥ पद्मपुराणे॥ तिथ्यंतावेकवारे यस्मिन्स स्याद्दिनक्षयः इति॥ वसिष्ठोपि।
एकस्मिन्सावने त्वह्नि तिथीनां त्रितयं यदा॥ तदा दिनक्षयः प्रोक्तः स्तत्र साहस्रिकं फल
मिति। फलमात्रोपवासव्यतिरिक्तदानादिजं द्रष्टव्यं॥ उपवासस्य निषेधात्॥ ईदृशे वि
षये किं कर्तव्यमिति आकांक्षायां वायुपुराणे पठ्यते॥ उपवासनिषेधे तु भक्ष्यं किंचि
त्प्रकल्पयेत्। न दुष्यत्युपवासेन उपवासफलं भवेत्॥ नक्तं हविष्यान्नमनोदनं वा फलं।
क्षीरमथांबु चाज्यं॥ यत्पंचगव्यं यदि वापि वायुः प्रशस्तमात्रोत्तरमुत्तरं चेति। उपवा
सासमर्थस्तु एकभक्तादीनि कुर्यात्॥ तथा च स्मृतिः॥ उपवासेत्वशक्तानां अशी
तेरूर्ध्वजीविनां। एकभक्तादिकं कार्यमाह बौधायनो मुनिरिति। मार्कंडेयोपि। एकभक्ते
न नक्तेन क्षीणवृद्धातुरः क्षपेत्। नातिक्रमे द्वादशीं तु उपवासव्रतेन वेति॥ स्मृत्यंतरे
पि। एकभक्तेन नक्तेन वालवृद्धातुरः क्षपयेत्। पयोभुक्त्या फलैर्वापि न निर्दिष्टदिने भ ॥तिथ॥
वेदिति। भविष्यत्पुराणेपि। एकादश्यामुपवसेन्नक्तं वापि समाचरेदिति॥ नित्यकाम्य ॥११३॥

न्यान्निदिनामुपवसेद्बुधः॥ पूर्वविधानकर्तव्या षष्ठ्येकादश्यथाष्टमी। एकादशीं न कुर्वीत क्षीय
ते द्वादशी यदा इति। अत्र निषेधो यतिविषयः॥ विधिर्गृहस्थविषयः॥ वेधबाहुल्ये न हेयत्वं शंका
मा भूदिति पंचभिर्मुहूर्तैरित्युक्तं॥ तदेव नानाविधवचनैर्व्यवस्थापनप्रकारो व्युत्पादितः॥ अन
या व्युत्पत्त्या मंदबुद्धिरपि व्यवस्थापयितुं शक्ष्यत्येव॥ ॥ उत्कृष्टोपवासतिथिर्निरूपिता॥ ॥ अ
थाधिकारी निरूप्यते तत्र नारदः॥ अष्टाब्दादधिको विप्रो ह्यपूर्णाशीतिहायनः॥ भुंक्ते यो मानवो
मोहादेकादश्यां स पापकृदिति। कात्यायनोपि। अष्टवर्षाधिको विप्रो ह्यपूर्णाशीतिवत्सरः॥ ए
कादश्यामुपवसेत्पक्षयोरुभयोरपीति। गृहस्थस्य तु शुक्लैकादश्यामेव नित्योपवासः॥ तथा
च कूर्मपुराणे॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि। वनस्थयतिधर्मोयं शुक्लामेव सदा गृही
ति॥ स्कंदपुराणेपि॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि। वानप्रस्थो यतिश्चैव शुक्लामेव
सदा गृहीति। भविष्योत्तरेपि॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि। ब्रह्मचारी च नारी च
शुक्लामेव सदा गृहीति। नारी विधवा तस्या एव यतिसधर्मत्वात्॥ पतिमत्यास्तूपवासे निषे
धात्॥ विष्णुः॥ पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत्। आयुष्यं हरते भर्तुर्नरकं चैव गच्छति
--- तिमनुरपि। नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणमिति। मार्कंडेयः॥ नारी खल्व

शक्तास्तु प्रतिनिधिभिर्व्रतं कारयेयुः ॥ तथा च विष्णुरहस्ये ॥ असामर्थ्ये शरीरस्य व्रते
च समुपस्थिते ॥ कारयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितं ॥ पैठीनसिः ॥ भार्याभर्तुर्व्रतं कु
र्यात् भार्यायाश्च पतिर्व्रतं ॥ असामर्थ्ये परस्ताभ्यां व्रतभंगो न जायत इति ॥ स्कंद
पुराणेपि ॥ पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा ॥ एषामभाव एवान्यं ब्राह्मणं विनि
योजयेत् ॥ भ्रातरं भगिनीं शिष्यं ब्राह्मणं दक्षिणादिभिरिति ॥ स्मृत्यंतरेपि ॥ पितृमा
तृगुरुभ्रातृश्वश्रूगुर्वादिभर्तृजां ॥ अदृष्टार्थमुपोषित्वा स्वयं च फलभाग्भवेदिति ॥ के
कात्यायनः ॥ पितृमातृस्वसृश्वश्रूभ्रातृगुर्वर्थे च विशेषतः ॥ उपवासे प्रकुर्वाणः पुण्यं क्र
तुशतं भवेत् ॥ दक्षिणा नात्र दातव्या शुश्रूषा विहिता स्वसा ॥ नारी वा पतिमुद्दिश्य एका
दश्यामुपोषिता ॥ पुण्यं क्रतुशतं प्राहुर्मुनयः पारदर्शितः ॥ उपवासफलं तस्याः पतिः
प्राप्नोत्यसंशयं ॥ राज्यस्थः क्षत्रियस्यार्थे एकादश्यामुपोषितः ॥ पुरोधाः क्षत्रियेः
सार्धफलं प्राप्नोति निश्चितं ॥ मातामहादीनुद्दिश्य एकादश्यामुपोषणे ॥ कृते ते तु फ
-- विप्राः समग्रं फलमाप्नुयुः ॥ कर्तादिशांशं पुण्यं प्राप्नोत्यत्र न संशयः ॥ यमुद्दिश्य व्र

माध० ॥१२४॥

तं फलं सोपि संपूर्णफलमाप्नुयादिति॥ प्रतिनिधौ कश्चिद्विशेषः स्मर्यते॥ काम्ये प्रति
निधिर्नास्ति नित्ये नैमित्तिके च सः॥ काम्येप्युपक्रमादूर्ध्वं केचिदिच्छन्ति सूरय इति॥ अयमर्
थः॥ नित्ये नैमित्तिके प्रतिनिधिनाप्युपक्रम्य कारयेत्॥ काम्यं स्वसामर्थ्यं परीक्ष्य स्वयमे
वोपक्रम्य कुर्यात्॥ असामर्थ्येप्युपक्रमादूर्ध्वं प्रतिनिधिनापि तत्कारयेत्॥ उपवासाप्र
करणे प्रायश्चित्तं स्मर्यते॥ अथ मध्ये चतुर्दश्यां दिवाभुक्ते द्वैरं चरेत्॥ एकादश्यां महा
रात्रं नक्तं चैव तत्पर्वणीति॥ स्मृत्यंतरे अर्कपर्वद्वये रात्रौ चतुर्दश्यष्टमी दिवा॥ एकादश्
यामहोरात्रं भुक्त्वा चांद्रायणं चरेदिति॥ ॥अथ काम्योपवासक्रमः॥ ॥अथाग्निरा॥
सायमाद्यंतयोरह्नोः सायं प्रातश्च मध्यमे॥ उपवासफलं प्रेप्सुर्जह्याद्भक्तचतुष्टयमिति॥
देवलः॥ दशम्यामेकभक्तस्तु मांसमैथुनवर्जितः॥ एकादशीमुपवसेत्पक्षयोरु
भयोरपीति॥ देवलास्तु तुष्यंति कामिकं तच्च सिध्यतीति॥ बृहस्पतिरपि॥ दिवानि
द्रां परान्नं च पुनर्भोजनमैथुनं॥ क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेत्॥ विष्णुध ॥श्रीरा॥
र्मे॥ असंभाष्याहिसंभाष्य तुलस्यतसिकालं जलं॥ आमलक्याः फलं वापि पारणं प्रा ॥१२४॥

ययदा नित्यं श्राद्धं नैमित्तिकं भवेत्॥ उपवासं तदा कुर्याद् आघ्राय पितृसेवितं॥ माता पित्रोः
क्षये प्राप्ते भवेदेकादशी यदि॥ अभ्यर्च्य पितृदेवांश्च आघ्राय पितृसेवितमिति॥ यत्तु वच
नं॥ श्राद्धं कृत्वा तु ये विप्रा न भुंजते पितृसेवितं॥ हविर्दैवा न गच्छंति कव्यं चापितरस्तथे
ति॥ आघ्राणेनापि भोजनं कार्यं सिध्यति तस्य भोजनकार्ये विधानात्॥ अयमिह व
तानुष्ठानक्रमः॥ प्रथमं दशम्यामेकभक्तं कृत्वा अनंतरं दंतधावनं कुर्यात्॥ तथा च
स्मर्यते॥ दैं दशम्यामेकभक्ताः खादये दंतधावनमिति॥ तदनंतरं दशम्या रात्रौ नियमग्र
हणं कुर्यात्॥ तदुक्तं ब्रह्मकैवर्ते॥ प्राप्ते हरिदिने सम्यक् कृ विधाय नियमं निशि॥ दशम्या
मुपवासस्य प्रकुर्याद्वित्तसर्वं च व्रतमिति॥ नियमो नारदीये स्मर्यते॥ अक्षार लवणाः
सर्वे हविष्यान्ननिषेविताः॥ अवनीतल्पशयना प्रियासंगविवर्जिता इति॥ ततः प्र
प्रातः एकादश्यां बाह्याभ्यंतरशुद्धिं विदध्यात्॥ तत्प्रकारस्तु॥ शारीरं मंतःकर ॥शिवा॥
णोपघाते वाच्च श्रविधिर्भगवानशेषं॥ नामं नयत्वस्तु ममेह चाम पापादनंते हृदि
संन्निविष्टे॥ ॐ अंतःशुद्धिं बहिःशुद्धिं शुद्धो धर्मभयोच्युतः॥ स करोतु ममैतस्मिन् शु ॥२२५॥

चिरत्वास्मिन्सर्वदा॥ बाह्योपघातानननघो वै ध्यांश्च भगवानजः॥ नामं नयत्वनंतात्माऽवि
ष्णुश्चेतसि संस्थितः॥ इति अनंतरं प्रातः संकल्पं कुर्यात्॥ तदुक्तं वराहपुराणे॥ गृहीत्वौ
दुंबरं पात्रं परिपूर्णमुदङ्मुखः॥ उपवासं तु गृह्णीयाद्यद्वा चैव विधारयेत्॥ औदुंबरे वा ताम्र
पात्रे संकल्पमंत्रमहा विष्णुः॥ एकादश्यां निराहारः स्थित्वाहमपरेहनीति॥ भोक्ष्यामि पुं
डरीकाक्ष शरणं मे भवाच्युत इत्युक्त्वा यततो विद्वान् पुष्पांजलिमथार्पयेदिति॥ अ
नंतरं तत्साक्षगतं जलं पिबेत्॥ तदाह कात्यायनः॥ अष्टाक्षरेण त्रिर्जप्तेनाभिमंत्रितं॥
उपवासफलं प्रेप्सुः पिबेत्पात्रगतं जलमिति॥ विद्वेकादश्युपवासे रात्रौ संकल्पः॥ तथा
च नारदीये॥ विद्धोपवासे नक्तं तु स्तुदिनस्य क्रमाद्धितः॥ रात्रौ संपूजयेद्विष्णुं संकल्पेन
तदा तरेदिति॥ मध्यरात्रादुपरि दशमी युक्ता च एकादशी तस्यां मध्याह्नस्योपरि संकल्पः॥
तथा च स्मृतिः॥ दशम्यां संगदोषेण मध्यरात्रात्परेण तु॥ वर्जयेच्चतुरो यामान् संकल्पा
चैन योऽस्स देत्ति॥ एकादश्यां देवस्योपरि पुष्पमंडपं कुर्यात्॥ तदुक्तं ब्रह्मपुराणे॥ देव
स्योपरि कुर्वीत श्रद्धया समुपाहितः॥ नानापुष्पैर्मुनिश्रेष्ठ विचित्रं पुष्पमंडपं॥ कृ
त्वा चैवरणोपश्यात्त्वागरं कारयेन्निशीति॥ तस्मिन्

माधु०

॥११६॥

नं दृष्ट्वा देवमर्चयेदिति ॥ तदुक्तं पद्मपुराणे ॥ एकादश्यां सितेपक्षे निराहारः समाहितः ॥
स्नात्वा सम्यग्विधानेन सोपवासो जितेंद्रियः ॥ संपूज्य विधिवद्विष्णुं श्रद्धया सुसमाहितः ॥
पुष्पैर्गंधैस्तथा धूपैर्दीपैर्नैवेद्यकैः परैः ॥ उपहारैर्बहुविधैर्जपहोमप्रदक्षिणैः ॥ स्तोत्रैर्ना
नाविधैर्दिव्यैर्गीतैर्वाद्यैर्मनोहरैः ॥ दंडवत्प्रणिपातैश्च जयशब्दैस्तथोत्तमैः ॥ एवं संपू
ज्य विधिवद्रात्रौ कृत्वा प्रजागरं ॥ याति विष्णोः परं स्थानं नरो नास्त्यत्र संशयः ॥ अथ द्वा
दश्यां यत्कर्तव्यं तदाह कात्यायनः ॥ प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत् ॥ अज्ञा
नतिमिरांधस्य व्रतेनानेन केशव ॥ प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव ॥ मंत्रं जपि
त्वा हरये निवेद्योपोषणं व्रती ॥ द्वादश्यां पारणं कुर्याद्वर्जयित्वा ह्युपोदकीमिति ॥ सूतके
कादो दानार्चनरहितव्रतमुपवासमात्रं कुर्यात् ॥ तदुक्तं कूर्मपुराणे ॥ काम्योपवासे
प्रक्रांते त्वंतरा मृतसूतके ॥ तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितमिति ॥ वराहपुरा
णेपि ॥ सूतके च नरः स्नात्वा प्रणम्य मनसा हरिं ॥ एकादश्यां न भुंजीत व्रतमेवं न लुप्य ॥श्रीग॥
ते ॥ मृतकेपि न भुंजीत एकादश्यां सदा नरः ॥ द्वादश्यां तु समाश्नीयात्स्नात्वा विष्णुं प्रण ॥११६॥

स्य शुध्यतीति ॥ असकृज्जलपाने च दिवास्वापं च मैथुनं ॥ तांबूलचर्वणं चैव वर्जयेद्व्रतवा
सर इति वसिष्ठः ॥ उपवासे तथा श्राद्धे न कुर्याद्दंतधावनं ॥ दंतानां काष्ठसंयोगो हंति सप्त कु
लानि चेति ॥ दंतधावने प्रायश्चित्तमुक्तं विष्णुरहस्ये ॥ श्राद्धोपवासदिवसे खादित्वा दंत
धावनं ॥ गायत्र्या शतसंपूतमंबु प्राश्य विशुध्यतीति ॥ हारीतः ॥ पतितपाषंडिकानास्तिक
भाषणानृताश्लीलादिकमुपवासदिने वर्जयेदिति ॥ कूर्मपुराणे ॥ बहिर्यो मांसजान्सू
तिं पतितं च रजस्वलां ॥ न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे ॥ स्त्रीणां च प्रेक्षणात्संग
ताभिः सकथनादपि ॥ निष्पंदते ब्रह्मचर्यं न दारेष्वृतुसंगमादिति विष्णुरहस्ये ॥ स्मृत्या
लोकनगंधादिस्वादनं परिकीर्तितं ॥ अन्नस्य वर्जयेत्सर्वं ग्रासानां चाभिकांक्षणं ॥ गात्रा
भ्यंगं शिरोभ्यंगं तांबूलं चानुलेपनं ॥ व्रतस्थो वर्जयेत्सर्वं यच्चान्यत्र निराकृतमिति ॥ ब्र
ह्मांडपुराणे ॥ कांस्यं मांसं मसूरं च क्षौद्रं तैलं चानृतभाषणं ॥ व्यायामं च प्रवासं च दि
वास्वप्नं प्रमथांजनं तिलपिष्टं मसूरांश्च द्वादशैतानि वैष्णवः ॥ द्वादश्यां वर्जयन्नित्यं स
र्वपापैः प्रमुच्यत इति ॥ एकादश्यां श्राद्धं कृत्वापि न भोक्तव्यं तदाह कात्यायनः ॥ उपवासो

स्यचेति ॥ तत्र परित्यक्तं ॥ देवतार्चनादिकं सूतकांते कुर्यात् ॥ तदुक्तं मत्स्यपुराणे ॥ सूतकां
ते नरः स्नात्वा पूजयित्वा ॰ जनार्दनं ॥ दानं दत्वा विधानेन व्रतस्य फलमश्नुत इति ॥ स्त्री
णां तु रजोदोषदर्शनेपि न व्रतत्यागः ॥ किंतु देवतार्चनादिरहितं सूतकादाविवोपवासमा
त्रं कार्यं तदाह पुलस्त्यः ॥ एकादश्यां न भुंजीत नारी दृष्टे रजस्यपीति ॥ ऋष्यशृंगोपि ॥ संप्र
वृत्ते तु रजसि न स्याऽत्यंद्वादशीव्रतमिति ॥ प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् ॥ न
तत्रापि व्रतस्यस्यादुपरोधः कदाचनेति ॥ शुद्ध्यनंतरं देवतार्चनादि कुर्यात् ॥ तथा च स्मृ
तिः ॥ स्नाता भर्तुश्चतुर्थेह्नि शुद्धा स्याद्धरिचारणे ॥ पंचमेहनि शुद्धा स्याद्देवपित्र्ये च कर्म
णीति ॥ नित्योपवासप्रकारो विष्णुरहस्येभिहितः ॥ अथ नित्योपवासः ॥ त्रिसायं प्रायंत
र्भुक्तिक्रियां ॥ वर्जयेन्नानिमान्विप्रः संप्राप्ते हरिवासर इति ॥ ब्रह्मकैवर्तेपि ॥ इति विज्ञाय
कुर्वस्तावद्वयमेकादशीव्रतं ॥ विशेषनियमात्स्मेहोरात्रं भुक्तिवर्जितः ॥ निराहीतं द्विपः
श्रद्धासहायो विष्णुतत्परः ॥ उपोष्यैकादशीं पापात् मुच्यते नात्र संशय इति ॥ शक्तो सत्यां
नियमेनाचरेत् ॥ तथा च कात्यायनः ॥ शक्तिमांस्तु पुनः कुर्यात्रियमं सविशेषणमि

ति॥ यदा द्वादश्यां श्रवणा नक्षत्रं भवेत्॥ तदा ह्युक्तैकादशीमपि परित्यज्य द्वादश्यामेवोपवसेत्॥
तथा च नारदीये॥ शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता॥ तयोरेवोपवासश्च त्रयोदश्यां
तु पारणमिति॥ एकादश्यां त्वविद्धायां संप्राप्ते श्रवणे तदा॥ उपोष्या द्वादशी पुण्या सर्वपा
पक्षयापहेति॥ यदा त्रयोदश्यां द्वादश्याः कलाद्वयं कलात्रयं वाप्युदयादुपरि संभवति॥ त
दा द्वादशीकाल एव पारणं कार्यं॥ तदुक्तं नारदीये॥ एकादश्याः कला ह्येका द्वादश्यास्तु कला
द्वये॥ द्वादशी द्वादशीं हंति त्रयोदश्यां तु पारणमिति॥ कलाद्वयं त्रयं वापि द्वादशीं न त्वति
क्रमेत्॥ पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृतेति॥ ननु द्वादश्यतिक्रमेपि नास्ति दो
षः॥ सा तिथिः सकला ज्ञेयेति साकल्याभिधानादिति चेत्॥ मैवं॥ साकल्यस्य स्नानदान
विषयत्वात्॥ वाक्यशेषे स्नानदानजपादिष्वित्यभिधानात् पारणे तु साकल्यवचनं
प्रवर्तते॥ तिथिस्तात्कालिकी भवेदिति विशेषकथकवचनात्॥ द्वादशीकाले यदा पार
णं तदा ततः प्रागेव सर्वाः क्रियाः कार्याः॥ तदुक्तं नारदीये॥ अल्पायामथ विप्रेंद्र द्वादश्याम
रुणोदये॥ स्नानार्चनक्रियाः कार्या दानहोमादिसंयुताः॥ एतस्मात्कारणाद्विप्राः प्रसू

दुं अपि रजन्मरात्रोद्भवमिति। नेदशं पावनं किंचिन्नराणां भुवि विद्यते॥ यादशं पद्मनाभस्य
दिनं पातकहानिदमिति॥ तावत्पापानि देहेस्मिन् तिष्ठंति मनुजाधिप॥ यावन्नोपवसेजंतुः
पद्मनाभदिनं शुभं॥ अश्वमेधसहस्राणि राजसूयशतानि च। एकादश्युपवासस्य कला॥
नार्हंति षोडशीं॥ एकादशेंद्रियैः पापं यत्कृतं भवति प्रभो॥ एकादश्युपवासेन तत्सर्वं वि
लयं व्रजेत्॥ एकादशीसमं किंचित्पापत्राणं न विद्यते॥ स्वर्गमोक्षप्रदा ह्येषा राज्यपुत्रप्रदा
यिनी॥ सुकलत्रप्रदा ह्येषा शरीरारोग्यदायिनी॥ न गंगा न गया भूप न काशी न च पुष्क
रं॥ न चापि कौरवं क्षेत्रं न रेवा न च देविका॥ यमुना चंद्रभागा च तुल्या भूप हरेर्दिनात्॥
अनायासेन राजेंद्र प्राप्यते वैष्णवं पदं॥ चिंतामणिसमा ह्येषा अथवापि निधेः समा॥ सं
कल्पपादपप्रख्या वेदवादोपमा तथेति। यस्यामेकादश्यां यात्युपवासप्रतिनिधिरूपा
ल्पैकभक्तनक्तयाचितदानानि तेषां प्रतिपद्युक्तेन न्यायेनोपवासतिथावेवानुष्ठानं
यानि तु तस्य तत्राल्पैकभक्तादीनि तेषां पूर्वविद्धक्रमन्यायेन मध्याह्नादिव्यापितिथि ॥त्रिवा॥
ग्रहणं प्राप्तौ दशमीविद्धा प्रतिषिध्यते॥ तथा च भविष्यपुराणे॥ द्वादशीकल्पे॥ ॥११८॥

पूर्वाह्णे विद्धां दिनार्धेन तदा पूर्णामपि त्यजेत्॥ यदि छेदात्मसंतान नियमेषु चतुर्ष्वपि॥ नोपो
षितं च नक्तं च नैकभक्तमयाचितं॥ नंदां पापूर्वविद्धां यां कुर्यादैश्वर्यमिच्छता॥ एकादशीयु
ताशास्ता द्वादश्यां समुपोषणे॥ नक्तैयाचायाचितेनित्यमेकभक्तेतथार्चने॥ नक्तं चाया
चितं तात नैकभक्तमुपाहरेत्॥ दशमीसंहितं दानं मनर्थं हरिवासरइति॥ दिनार्धेन सार्ध
सप्तमुहूर्तैरित्यर्थः॥ एतदेवाभिप्रेत्य दिक्कूपे वदशाभिश्चैस्तथैत्यक्ता हृतं॥ सार्धसप्तमुहूर्तै
स्तु वधो ये बाधते व्रतमिति च द्वतोन्यन्न वेधेतु तिथ्यंतरवन्मध्याह्नादिव्यापिनी ग्रहीत
व्या॥ ॥इत्येकादशीनिर्णयः॥ ॥अथ द्वादशी निर्णीयते॥ ॥सा च युग्मादिशास्त्रे
ण पूर्वविद्धा गृहीतव्या॥ स्कंदपुराणे॥ द्वादशी च प्रकर्तव्या एकादश्या युता विभो॥ सदा का
र्या विद्वद्भिर्विष्णुभक्तैश्च मानवैः॥ उत्तरविधौ प्रतिषेधतीवब्रह्ववसिष्ठः॥ [illegible] द्वितीया पंच
मी वेधाद्दशमी च त्रयोदशी॥ चतुर्दशी चोपवसेत् हन्युः पूर्वोत्तरे तिथि इति॥ एवं च सत्येकादश्यु
पवासो द्वादश्युपवासश्चेत्युभयमेकस्मिन्दिने प्राप्नोति तस्य चोपवासस्यान्योन्यविरो
धाभावात्सह वानुष्ठानं भविष्यति॥ न [illegible] ह्येकेसं व्रतसमाप्य व्रतांतरमनुष्ठानुशक्यं।
असमाप्ते व्रते पूर्वे नैव कुर्याद्व्रतांतरमिति। शास्त्रात् मेवं॥ इदं हि शास्त्रमेकस्य व्रतमध्ये व्रतां

माध० तरोपक्रमं निषेधति। प्रकृते तु वृतद्वयस्य सहैवोपक्रम इति तंत्रेणानुष्ठानं भविष्यति॥ नन्वस्त्वे
॥११९॥ वं तु तिथौ संपूर्णा तिथावेकादशीद्वादश्यूपवासो नैरंतर्येण प्राप्तः॥ तत्र पारणमंतरे
ण प्रथमोपवासस्य समाप्त्यभावात् द्वितीयोपवासोपक्रमो न संभवतीति चेत्। मैवं॥ अद्भिः पार
णं कृत्वा द्वितीयोपवासस्य प्रक्रंतुं शक्यत्वात्॥ तादृशं पारणमशिताऽनशितोभयात्मिकं तत्र॥ अशि
तिरूपत्वात् पूर्वोपवासं समापयति॥ अनशितरूपत्वेनोत्तरोपवासं न विहंति॥ एतच्च द्व्यात्मक
त्वं दर्शपौर्णमासप्रकरणे यजमानब्राह्मणे श्रूयते॥ यदनाश्वानुपवसेत्पितृदेवत्यः स्याद्यदश्नीया
द्रुद्रोस्य पशूनभिमन्येतापोश्नाति॥ तन्नेवाशितं नेवानशितं न क्षोधुको भवति नास्य रुद्रः पशू
नभिमन्यत इति॥ तस्मादुदकपारणेनोपवासद्वयनिर्वाहः॥ एतच्च सर्वतिथिसाधारणं प्र
कृते त्वेकादशीद्वादश्योर्दैवतैक्य॥ उदकपारणमंतरेणापि न कोपि दोषः॥ एतदेव स्मर्यते॥
एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्। न तत्र विधिलोपः स्यादुभयोर्देवतं हरिः इति॥ उपवास ति
द्वयाशक्तौ केवलद्वादश्युपवासेनोभयोः फलं सिध्यति॥ तथा च स्मृतिः॥ पूर्वोपवासजं ॥शिव॥
पुण्यं सर्वं प्राप्नोत्यसंशयमिति॥ द्वादश्यां च काम्योपवासो मार्कंडेयेन दर्शितः॥ द्वादश्या ॥११९॥

षे स्नानमात्रेवैत्॥ पितृतर्पणसंयुक्तं स्वल्पा चेद्द्वादशी यदि। महाहानिकरी ह्येषा द्वादशी
लंघिता नृणां॥ करोति धर्महरणमस्नातेव सरस्वती॥ गारुडपुराणेपि॥ यदा स्वल्पा द्वा
दशी स्यादपकर्षो भुजेर्भवेत्॥ प्रातर्माध्याह्निकस्यापि तत्र तस्यापकर्षणमिति॥ स्कंद
पुराणेपि॥ यदा भवेदर्केवाल्पा द्वादशी पारणादिने॥ उषःकाले द्वयं कुर्यात् प्रातर्माध्या
ह्निकं च तदिति॥ तत्र पारणासंभवे अद्भिः पारणं कुर्यादित्याह कात्यायनः॥ संध्यादिकर्म
वे नित्यं पारणं तु निमित्ततः॥ अद्भिस्तु पारयित्वाथ नैत्यकांते भुजिर्भवेत्॥ देवलोपि॥ संक
टे विषमे प्राप्ते द्वादश्यां पारयेत्कथं॥ अद्भिस्तु पारणं कुर्यात् पुनर्भुक्तं न दोषकृदिति॥ यदा
कलापि द्वादशी नास्ति तदा त्रयोदश्यामपि पारणं कुर्यात्॥ तदुक्तं नारदीये॥ त्रयोदश्यां तु
शुद्धायां पारणं पृथिवीफलं॥ शतयज्ञाधिकं वापि नरः प्राप्नोत्यसंशयमिति॥ पारणं
युत नैवेद्यं तुलसी[illegible]मिश्रितं कुर्यात्॥ तदुक्तं स्कंदपुराणेपि॥ नरः कृत्वोपवासं तु योऽश्ना
ति द्वादशीदिने॥ नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनमिति॥ ॥अथैकादशीमहि
मा॥ ॥तत्र वसिष्ठः॥ ॥एकादशीसमुत्थेन वह्निना पापकेंधनं॥ भस्मतां याति वि

वेधिद्वा तदाह संवर्तः ॥ कृष्णाष्टमी बृहत्तपा सावित्री वटपैतृकी ॥ अनंगत्रयोदशी रंभाउपो
ष्याः पूर्वसंयुता इति ॥ अनंगत्रयोदशी च भविष्यपुराणे दर्शिता ॥ मार्गशीर्षे मले पक्षे
इत्युपक्रम्य ॥ व्रतं विधायानंगत्रयोदशीरूपसंहारात् ॥ नन्वमले पक्ष इति शुक्लपक्ष एव त
द्व्रतं विहितं तथा च ॥ त्रयोदशी प्रकर्तव्या द्वादशीसहिते मुने ॥ अनेन सामान्यशास्त्रेणैवान
गत्रयोदश्याः पूर्वविद्धत्वं प्राप्ते ॥ बाढं ॥ तदेवानेन विशेषशास्त्रेण स्पष्टीक्रियते ॥ इति त्रयो
दशीनिर्णयः ॥ अथ चतुर्दशीनिर्णयः ॥ अत्रापि शुक्लकृष्णभेदेन व्यवस्था भवति ॥ अ
त्र युग्मशास्त्रेण शुक्लचतुर्दशी परविद्धा ग्राह्या ॥ तथा व्यासोऽपि ॥ शुक्ला चतुर्दशी ग्राह्या प
रविद्धा सदा व्रते इति ॥ पूर्वविद्धानिषेधः ॥ उक्त उत्तरविद्धाविधिश्चेत्युभयं भविष्यपुराणे प
ठ्यते ॥ सदा कार्या त्रियोदश्या न तु युक्ता चतुर्दशी ॥ पौर्णमासीयुता सा स्याच्चतुर्दश्या ॥श्री॥
च पूर्णिमेति नारदीयेऽपि ॥ तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी ॥ पूर्वविद्धा न कर्तव्या
कर्तव्या परसंयुतेति ॥ यत्तु भाद्रपदशुक्लचतुर्दश्यामनंतव्रतं भविष्योत्तरे विहितं ॥
तत्र पूर्वविद्धा परविद्धा वा मध्याह्नव्यापिनी चेति केचिदाहुः ॥ लिंगं तत्प्रमाणत्वेनो ॥१२०॥

मुपवासेन सिध्यार्थो भूप सर्वशः ॥ चक्रवर्त्तित्वमतुलं संप्राप्नोत्यतुलां श्रियमिति ॥ ॥ इति
द्वादशीनिर्णयः ॥ ॥ अथ त्रयोदशीनिर्णयते ॥ सा च शुक्लकृष्णभेदेन व्यवतिष्ठते ॥ तत्र
शुक्लत्रयोदशी पूर्वविद्धा ग्राह्या ॥ तदुक्तं ब्रह्मकैवर्ते ॥ त्रयोदशी प्रकर्त्तव्या द्वादशी सहिता मुने ॥
भूतविद्धा न कर्त्तव्या दर्शे पूर्णे कदाचनेति ॥ यद्यप्यत्र शुक्लकृष्णशब्दो नास्ति ॥ तथापि कृष्ण
त्रयोदश्याः परविद्धता यावैधनिकत्वात् ॥ पूर्वविद्धायाः शुक्लकृष्णपक्षविषयित्वं परिशिष्य
ते ॥ सायंकालीनत्रिमुहूर्त्तव्यापित्वेन पूर्वविद्धायां प्राप्तायां प्रतिपदर्वास्याप्यपराह्णसं
बंधाघोपेक्षित इति द्रष्टव्यं ॥ तदुक्तं स्कंदपुराणे ॥ त्रयोदशी प्रकर्त्तव्या याभवेदापराह्णिकीति ॥
कृष्णत्रयोदश्याः परविद्धत्वमुक्तं निगमे ॥ षष्ठ्यष्टमी तथा दर्शे कृष्णपक्षे त्रयोदशी ॥ ए
ताः परयुताः पूज्या पराः पूर्वेण संयुता इति ॥ यत्तु वृद्धवसिष्ठवचनं ॥ द्वितीया पंचमी वेधा
दशमी च त्रयोदशी ॥ चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथि इति तच्छुक्लपक्षविषयं यदा तु
२ कृष्णपक्षे परविद्धा न लभ्यते ॥ तदा पूर्वविद्धा ग्राह्या ॥ तदाह वसिष्ठः ॥ एकादशी तृतीया
च षष्ठी चैव त्रयोदशी ॥ पूर्वविद्धानुकर्त्तव्या यदि न स्यात्परेहनीति ॥ अनंगत्रयोदशी च प

माध०
॥१२१॥

धचैव कर्तव्या परविधा न कस्यचिदिति। नरकचतुर्दशी विधूदयवती ग्राह्या। तथा च स्मृ
तिः॥ आश्विन्यासिते पक्षे चतुर्दश्यां विधूदये। कर्तव्यं मंगलस्नानं नरैर्नरकभीरुभिरिति
अपराह्णव्यापित्वे तु शुक्लचतुर्दश्यापि परविद्धा ग्राह्या। तथा च स्कंदपुराणे। चतुर्दशी च
कर्तव्या त्रयोदश्या युता विभो॥ मम भक्तैर्महाबाहो भवेद्या चापराह्णिकीति॥ दर्शविधान
कर्तव्या शक्रविद्धा कदाचनेति॥ अत्र मम भक्तैरिति स्वरोक्तलिंगान्(?) शिवचतुर्दशीविषय
त्वं द्रष्टव्यं। तदेवं व्रतांतरेषु चतुर्दशी निर्णीता॥ ॥अथ शिवरात्रिव्रतं निरूप्यते।
तत्रेदं चिंत्यते॥ किमयं शिवरात्रिशब्दो रूढः किं वा योगिकः॥ उत लाक्षणिकः॥ अथ वा यो
गरूढ इति तत्र तावद्रूढ इति प्राप्तं॥ कुतः तिथिविशेषे शिवरात्रिशब्दस्य संज्ञारू
पेण श्रवणात्॥ तथा च नागरखंडे॥ माघमासस्य शेषे या प्रथमा फाल्गुनस्य च॥ कृष्णा
चतुर्दशी सा तु शिवरात्रिः प्रकीर्तितेति॥ कामिके॥ माघमासे सितपक्षे विद्यते या चतु
र्दशी॥ तद्रात्रिः शिवरात्रिः स्यात्सर्वपुण्यशुभावहेति॥ यद्यप्यत्र शिवस्य रात्रिः शि ॥शिव॥
वरात्रिरित्यवयवार्थः॥ प्रतीयते॥ तथापि योगाद्रूढेः प्रबलत्वात् योगोत्र न ग्राह्यः ॥ ॥१२१॥

प्राबल्यं चाश्वकर्णादिष्ववगम्यते। अश्वस्य कर्ण इत्यवयवार्थप्रतीतावपि तमुपेक्ष्य रूढ्या
वृक्षविशेषवाचित्वस्वीकारात्। ननु काकदंतपरीक्षासमानोऽयं विचारः। यद्ययं शिवरा
त्रिशब्दो रूढः यदि वा योगिकः। उभयथाप्यनुष्ठाने विरोधाभावात्। मैवं। अस्त्येव महा
न्विशेषः। यौगिकत्वे शिवसंबंधिव्रतजातं यस्यां रात्रौ चानुष्ठीयते सा सर्वा शिवरात्रिः स्यात्।
माघमासादिपदस्य तदानीमुपलक्षणं भवेत्। रूढिपक्षे तु माघमासादेर्विशेषणत्वात्
वसिष्ठाया एकस्या एव तिथेः शिवरात्रित्वं। अतः कर्तव्य एवायं विचारः। तत्राहीनन्यायेन रू
ढिमेवाद्रियामहे। तस्य च न्यायस्य संग्राहकौ चैतौ श्लोकौ भवतः। अहीनस्य द्वादशेति प्र
कृतोऽधिकृतावृत। नहीन इति योगेन प्रकृतो तद्विकल्प्यतां। शिष्टधीहेतुतो रूढेरहीनेऽधि
कृताविदं। उत्कृष्यतां द्वादशत्वं साह्नस्य कृतकर्मणः। अयमर्थः। ज्योतिष्टोमप्रकरणे श्रूय
ते। तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य यत्तस्य सवीर्येच्छायेति। अह्ना सह वर्तत इ
ति साह्नः एकदिननिष्पाद्यो ज्योतिष्टोमः। तस्य प्राचीनेषु त्रिषु दिनेषु अंगत्वेनानुष्ठेय
या होमा उपसद उच्यंते। तास्तिस्र उपसदो विधाय पुनरहीनशब्दवाच्यस्य कर्मणो

माध०
॥१२२॥

द्वादशोपसदो विधीयंते॥ तत्र संशयः॥ किमिदं द्वादशोपसत्त्वं द्विरात्राद्यहीनप्रकृतिभूते सा
ह्नशब्दवाच्ये प्रकृते ज्योतिष्टोमे निविशते॥ आहोस्विदहीनशब्दवाच्ये विकृतिरूपे द्विरा
त्राद्युत्कृष्यत इति तदर्थमिदं चिंत्यते॥ अहीनशब्दो यौगिको रूढो वेति तत्र नहीन इति यु
क्तेर्विस्पष्टप्रतिभासाद्यौगिकत्वायं तावदर्थश्च प्रकृतावुपपन्नः॥ सोमस्य प्रधानस्य
साक्षाद्वाचकशब्दैरेवोपदिष्टत्वेनहीनत्वाभावात्॥ विकृतौ तु विशेषण एव वाचकशब्देरु
पदिश्यते॥ इतरत्सर्वमतिदेशात्प्राप्यते॥ अतस्तु किंसंको वा द्विकृते हीनत्वं एवं सति
अहीनशब्दस्य प्रवृत्ते ज्योतिष्टोमे प्रकृतित्वसंभावात्प्रकरणानुग्रहाच्च तत्रैव द्वादशत्वं
निविशते न च पूर्ववाक्यविहितेन त्रित्वेन बाधः शंकनीयः॥ वाक्ययोः समानबलत्वे
न ब्रीहियववद्विकल्पोपपत्तेः तस्माज्ज्योतिष्टोम एव द्वादशत्वविधिरिति प्राप्ते ब्रूमः॥ वि
कृतिरूपे द्विरात्रादावेव द्वादशत्वं विधीयते॥ कुतः अहीनशब्दस्य श्रौतप्रयोगबाहुल्ये
न तत्रैव रूढत्वाद्रूढिश्च शीघ्रबुद्धिहेतुतया योगाद्बलीयसी योगे त्ववयवार्थं प्रथम
तो निश्चित्य पश्चात्समुदायार्थो निश्चेतव्य इति विलंबः॥ न चात्र प्रकरणविरोधः श ॥टीका॥ ॥१२२॥

शाहरेति॥ मध्याह्ने भोज्यवेलायां समुत्तीर्य सरितटे। ददर्श शीलसा स्त्रीणां समूहं रक्तवास
सां॥ चतुर्दश्यामर्चयंतं भक्त्या देवं जनार्दनमिति। अत्र मध्याह्ने भोज्यवेलायामिति व
चनेन मध्याह्नस्य कर्मकालत्वं प्रतीयते॥ अतस्तद्व्यापिनी तिथिर्ग्राह्या॥ नैतत्सारं यथा
विनायकव्रते मध्याह्ने पूजयेन्नृपेति। मध्याह्नः कर्मांगकालत्वेन विहितः॥ नात्र तथा विधि
रस्ति॥ उदाहृते तु लिंगमर्थवादगतत्वान्न स्वातंत्र्येण कस्यचिदर्थस्य प्रमापकं॥ किंतु
सति प्रमाणांतरे तस्योपोद्बलकं भवति न चात्र प्रमाणांतरं पश्यामः॥ ततो मध्याह्नः कर्मका
लस्तथा सति दैवे ह्यौदयिकी ग्राह्येति वचने न युग्मशास्त्रादिभिश्चोदयव्यापिनी ग्राह्या॥
सा च तिथ्यंतरवत् त्रिमुहूर्तेति मुख्यकल्पः॥ द्विमुहूर्तेत्यनुकल्पः॥ एवं च सति शिष्टाचा
रोऽप्यनुगृहीतो भवति॥ चैत्रश्रावणयोश्चतुर्दश्योः शुक्लेऽपि रात्रियोगिन्यो ग्राह्ये तथाह
बोधायनः॥ मधोः श्रावणमासस्य शुक्ले या तु चतुर्दशी॥ सा रात्रिव्यापिनी ग्राह्या परा पू
र्वाह्णगामिनीति॥ परा मासांतरानुवर्तिनी शुक्लपक्षवर्तिनी चतुर्दशी॥ कृष्णचतुर्दशी
तु पूर्वयुतैव ग्राह्या॥ तथा चापस्तंबः॥ कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी॥ पूर्ववि

च कनीयः ॥ बलीयसा वाक्येन प्रकरणस्य बाधितत्वात्तस्मादिदं द्वादशत्वं प्रकृति ज्योतिष्टो
मादावृत्तष्वविकृतिषु द्विरात्रादिषु निवेशनीयमिति । अत्र यथा सू० ७ हीनगृहसाथा शिवरात्रि
न्याशेपि सू० ८ इतीति पूर्वः पक्षः अपर आह ॥ यौगिक एवायं शिवरात्रिशब्दः कुतः संबंधमुपजीव्य त
च्छब्दस्य प्रवृत्तत्वात् ॥ तथा च स्कंदपुराणे ॥ माघस्य कृष्णपक्षे या तिथिश्चैव चतुर्दशी ॥ तस्या रात्रिः समा
ख्याता शिवरात्रिः शिवप्रिया ॥ तस्याः सर्वेषु लिंगेषु सदा संक्रमते हरः ॥ यानि कान्यत्र लिंगानि
स्थावराणि चराणि च ॥ तेषु संक्रमते देवि तस्यां रात्रौ यतो हरः ॥ शिवरात्रिस्ततः प्रोक्ता तेन सा ह
रवल्लभेति ॥ शिवरहस्ये ॥ तत्रभवत्यथेदवर्षमाघकृष्णचतुर्दशी ॥ शिवरात्रिः समाख्याता प्रियेयं
त्रिपुरद्विष इति । अवंतीखंडे ॥ माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी ॥ शिवरात्रिश्च सा
ख्याता सर्वपापप्रणाशिनीति तस्माच्छिवसंबंधिनी रात्रिः शिवरात्रिरिति यौगिकोऽर्थः ॥ प्रोक्षणी
यं न्याये न गृहीतव्यः ॥ तस्य च न्यायस्य संग्राहकावेतौ श्लोकौ भवतः ॥ संस्कारजातियोगेषु
कं वृते प्रोक्षणीरिति । संस्कारं सार्वभौमत्वाज्जातिमुद्दिश्य नोक्तितः ॥ अन्योन्याश्रयतो नाद्यो न
जातिः कल्प्यत्वाक्तितः ॥ यौगिकः कुसराद्भिस्त्वाकुर्विर्व्योः करणेक्षिता ॥ अयमर्थः ॥ दर्शपूर्णमासप्र

माध०
॥१२३॥

करणेऽश्रूयते ॥ प्रोक्षणीरासादयतीति तत्र शंकनीयः ॥ किमयं प्रोक्षणीशब्दः आसादनाभिमंत्रणा
द्युदकसंस्कारं ब्रूते । किंवा जललक्षणया तरवचिशेषं । अहोस्वित्प्रोक्षंते पात्राण्याभिरद्भिरिति योगं तत्र
संस्कारं ब्रूत इति तावत्प्राप्तं कुतः सार्वभौमत्वात् । सर्वेषु हि संस्कारविधिवाक्यादिप्रदेशेषु
प्रोक्षणीशब्दश्रूयते ॥ प्रोक्षणीरासादयेतीध्माबर्हिरुपसादयेति वाक्ये प्रोक्षणवाक्ये प्रयोगः प्रो
क्षणीरासादयतीति विधिवाक्ये एवमभिमंत्रणादिवाक्यान्यप्युदाहरणीयानि । तस्मात्संस्कारं
३ ब्रूत इत्येकपक्षः ॥ जातिं ब्रूत इति पक्षांतरं लोके हि जलकीलासु प्रोक्षणीभिरुद्वेजितास्म इत्युदक
जातौ प्रयोगो दृश्यते ॥ तत्र न तावत्संस्कारं ब्रूत इत्याद्यः पक्ष उपपद्यते ॥ कुतः अन्योन्याश्रयत्वा
त् ॥ विहितेष्वासादनादिसंस्कारेष्वनुष्ठितेषु पश्चात्संस्कृतास्वप्सु प्रोक्षणीशब्दप्रवृत्तिः ॥ तत्रैवं
वृत्तौ च सत्यां प्रोक्षणीशब्देनाप्स्वासादनादिविधिरिति । अन्योन्याश्रयः नापि जातिं ब्रू ॥क्रिया॥
त इति द्वितीयः पक्षो युक्तः उदकजातौ प्रोक्षणीशब्दस्य रूढत्वव्यवहारे पूर्वमक्लृप्तत्वेनेतरः पर
त्रालक्षः कुलिपनीयत्वप्रसंगात् । न च योगेऽपि शक्तिः कल्पनीयेति वाच्यं ॥ व्याकरणेनैव क्लृप्तत्वात् ॥ ॥१२३॥
व्याकरणे हि ॥ उक्ष सेचन इत्यस्मात् धातोः करणे ल्युट् इति प्रत्यक्ष—शब्दो व्युत्पादितः ॥ तथा

मासध० ।।१२८।।

मासरूपयोगं पूर्वपक्ष्यभिप्रेतं मतं निराकृत्य श्रौत रूढिः सिद्धांतिनास्समाश्रिता तामेव
रूढिं प्रकटयितुं वररुचिना वार्त्तिके कृतं। अतः सत्यपि प्रकृतिप्रत्ययविभागे यौगिकत्वेन
शंकितुं शक्यते।। तथा गोत्व जातौ रूढस्य गोशब्दस्यौणादिके सूत्रे षु गमेर्डो इति प्रकृ
तिप्रत्ययविभागं कृत्वा गच्छतीति गौरिति व्युत्पत्तिः प्रदर्शिता। तद्वदत्राप्यवगंतव्यं।। प्रोक्ष
णीशब्दे तु न रूढिज्ञापनाय किंचित्सूत्रं वार्त्तिकं वा विहितमस्ति किं तर्हि सर्वधातुसाधारणेना
वयवार्थव्युत्पादकेन ल्युट् प्रत्ययेन निष्पादितत्वात्।। यौगिक एवायं प्रोक्षणीशब्दः तस्मा
त्प्रोक्षणीशब्दवत् तच्छिवरात्रिशब्दो यौगिक इति द्वितीयः पक्षः अन्ये तु पुनर्मन्यंते।। लाक्ष
णिकोयं शिवरात्रिशब्दः तिथिवाचकेन तेन शब्देन तत्तिथौ क्रियमाणस्य व्रतविशेष
स्य लक्ष्यमाणत्वात्।। अत एवेशानसंहितायामुक्तं।। शिवरात्रिव्रतं नाम सर्वपापप्रणाशन
म्।। आचांडालमनुष्याणां भुक्तिमुक्तिप्रदायकं। अर्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्द
शी।। तत्तिथावेव कुर्वीत शिवरात्रिव्रतं व्रती।। शिवरात्रिव्रतं कार्यं भूतान्वितमहानिशि। ।।शिवा।
शिवरात्रिव्रतं देव करिष्ये तव सन्निधौ।। निर्विघ्नं कुरु मे देव भक्त्या ग्राह्य महेश्वरेति।।ना ।।१२८।

रदसंहितायां।। अर्धरात्रयुता यत्र माघकृष्णचतुर्दशी।। शिवरात्रिव्रतं तत्र सोश्वमेधफलं ल
भेदिति।। स्मृत्यंतरेपि।। भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा। शिवरात्रिव्रतं तत्र कु
र्याज्जागरणं तथेति।। ब्रह्मपुराणे।। अर्धरात्रादधश्चोर्ध्वं यदि युक्ता चतुर्दशी तत्तिथावेव
कुर्वीत शिवरात्रिव्रतं व्रतीति। स्कंदपुराणे।। शिवरात्रिव्रतं देव कथयस्व महेश्वरेति।। न च का
लवाचकशब्दस्य लाक्षणिकत्वमदृष्टचरमिति शंकनीयं। कालवाचकाभ्याममावा
स्यापौर्णमासीशब्दाभ्यां यागत्रयरूपयोरिष्ट्योस्तत्कालसंबंधिन्योरुपलक्षितत्वा
त्।। अत एव श्रूयते।। य एवं विद्वानमावास्यां यजत इति। स्मृतिष्वपि सर्वत्र तिथिवाचकैः
शब्दैस्तत्संबंधिनो व्रतविशेषा उपलक्ष्यंते।। स्कंदपुराणे।। जन्माष्टमी नैव कृता कदापि
कल्पायुतं पच्यते रौरवेषु।। ऋष्यशृंगोपि।। एकादशीं तु कुर्वीत क्षीयते द्वादशी यदि। एव
मन्यत्राप्युदाहार्यं। तस्माल्लाक्षणिकोयं शिवरात्रिशब्द इति तृतीयः पक्षः अथ सिद्धांतं
ब्रूमः।। योगरूढ एवायं शिवरात्रिशब्दः।। तत्र योगो द्वितीयपक्षोपन्यासेन दर्शितः। रू
ढिश्च प्रथमपक्षोपन्यासेन। तत्रैकत्वेवस्वीकारे सत्यन्यविषयं शास्त्रं तदनुग्राहकमुदा
हृतो-न्यायश्च बाध्येत न च यौगिकत्वे सति शिवव्रतोपेतेषु त्रयोदश्यादितिथ्यंतरेषु

माध०
॥१२५॥

त्रिरात्रित्वं प्रसज्यतेति वाच्यं तस्यातिप्रसंगस्य रूढ्या निवारणात्॥ यथा पंकजशब्दे पं
कात् जायत इति योगस्वीकृत्य भेकादिष्वतिप्रसंगो रूढिस्वीकारेण निवार्यते॥ तद्वद
त्रापि॥ योगरूढतायां न कोप्यतिप्रसंगः॥ नन्वमुख्ये संभवति लक्षणाश्रयणमुचितं॥ अ
थोच्यते॥ लक्षणाभावे वृत्तपरत्वं तस्यादिति॥ तन्न बहुव्रीहिस्वीकारे योगेनैव तत्सिद्धेः॥
त्रिवत्स्य त्रिरात्रिर्यस्मिन्नुतं गत्वेन विधिहिनातद्भूते त्रिवत्रा आरब्धं तस्मान्निर्मथ्यन्यायेना
त्र योगरूढः तस्य वन्यायस्य संग्राहकः एष श्लोकः॥ निर्मथ्यो यौगिको योगरूढो वा योगभास
नात्॥ यौगिको चिरजाते ल्लाग्नौ नीयते योगरूढिभाक्॥ अयमर्थः॥ इष्टकाचयने श्रूयते॥
निर्मथ्येनेष्टकाः पचंतीति तत्र संशयः किमयं निर्मथ्यशब्दो यौगिकः किं वा योगरूढ इति नि
शेषणं मंथ्यत इति योगस्य प्रतीयमानत्वात्॥ प्रोक्षणीन्यायेन यौगिक इति पूर्वपक्षः॥ अ
त्रह्वावनी धीयते॥ चिरनिर्मथितो चिरनिर्मथितश्च तत्र चयनोपक्रमात् प्रागपि विद्यमानो
गार्हपत्यो निर्मथ्यते अग्निराधानकाले मथितत्वात् चिरनिर्मथितः॥ चयनं प्रक्रम्यारण्योर्निम ॥श्रीव॥
र्मथितस्यामुखायां किंचित्कालं धारणा यस्यो निर्मथ्यते सो चिरनिर्मथितः॥ तेनेष
काः पच्यंते॥ तस्यैव प्रत्यासन्नत्वात्॥ तथा चयनस्याग्निद्वयसाधारण्येपि अचिरनि ॥१२५॥

सति प्रकर्षेणोक्ष्यक्षंते॥ अनेनेति योगेन सेचनसाधनमुदकादिकं सर्वं प्रोक्षणीशब्दवाच्यं संप
द्यते॥ प्रकृते तु स्त्रीलिंगशब्दवाच्यानामपां साधनत्वात्॥ सद्विशेषणस्य प्रोक्षणशब्दस्य ङीप्रत्य
येन तत्वेन प्रोक्षणीरिति द्वितीयाबहुवचनांतशब्दो निष्पद्यते नन्वत्र हीनाधिकरणे रूढेः प्रा
बल्यमुक्तं प्रोक्षण्यधिकरणे तु योगस्य प्राबल्यमुच्यते॥ अतः परस्परविरोधः॥ मैवं॥ लब्धा
त्मिका हि रूढिर्योगमपहरति प्रोक्षणीशब्दे रूढिर्लभ्यते॥ वृद्धव्यवहारेण ज्ञातावत्स्कसादि
तत्वात्॥ अहीनशब्दोपि द्विरात्रादिषु पूर्वैर्व्युत्पादित इति चेत्॥ न व्याकरणे व्युत्पादितत्वात्॥ अ
ह्नः खः क्रतौ इत्यनेन पाणिनिसूत्रेण वार्त्तिकेनाहन्शब्दात् खप्रत्ययमुत्पाद्य तस्येनादेशं कृत्वा क्र
तुविषयत्वं व्युत्पादितोऽहीनशब्दः॥ नन्वेवं सति घरकुटीप्रभातन्यायस्तवसंप्रसक्तयेन॥ य
तोऽहीनशब्दे योगं परिहर्तुकामेन भवता व्याकरणमुपजीव्य योगे पर्यवसानं कृतं तं॥ नायं दो
षः पूर्वपक्षिणो भिमते समासलक्षणे योगपर्यवसानस्यानभिधानात्॥ न च नञ्स
मासोपि व्याकरणे व्युत्पादित इति शंकनीये॥ तत्समासस्वीकारे सत्यपि अपलोचापषड्सौ
त्यादाविव अहीनशब्दस्याद्युदात्तत्वप्रसंगात्॥ मध्योदात्तो ह्ययं शब्द आम्नायते तस्मात् सद्द्वयस

र्मेथितेशब्दंनियंतुंरूढिराश्रयणीया॥यथानवनीतंघृतमित्यत्रनवनीतजन्यत्वयोगस्याविशे
षघृतयोरुभयोःसाधारण्येपिनूतनएवघृतेनवनीतशब्दोलोकप्रसिद्ध्यानियम्यते॥
तद्वदत्रापिद्रष्टव्यं॥तथासतिप्रतीयमानयोगस्यापरिहृत्वान्नियमेरूढिस्वीकाराच्चयोगरूढ
त्वेयंनिर्मथ्यशब्दवदितिसिद्धांतः॥अनेननिर्मथ्यन्यायेनशिवरात्रिशब्दोपियोगरूढिमाश्रि
यते॥तत्रशिवस्यरात्रिःशिवरात्रिरितितत्पुरुषसमासेनयोगेनप्रवर्तमानःशब्दोरूढ्यामा
घकृष्णचतुर्दशीरूपेकालविशेषेनियम्यते॥शिवस्यरात्रिर्यस्मिन्व्रतइतिबहुव्रीहिसमा
सयोगेनप्रवृत्तःशब्दोरूढ्याव्रतविशेषेनियम्यते॥तत्रशिवरात्रिव्रतमेकादशीजयंतीव्रत
वत्संयोगपृथक्त्वन्यायेननित्यंकाम्यंचेत्युभयविधं॥तत्रनित्यत्वमकरणेप्रत्यवायवीप्सा
भ्यांनित्यनिश्चलशब्दैश्चावगंतव्यं॥तत्राकरणेप्रत्यवायःस्कंदपुराणेपठ्यते॥परात्परतरंना
स्तिशिवरात्रिःपरात्परं॥नपूजयतिभक्त्येशंरुद्रंत्रिभुवनेश्वरं॥जंतुर्जन्मसहस्रेषुभ्र
मतेनात्रसंशयइति॥वीप्सापितत्रैवपठिता॥वर्षेवर्षेमहादेविनरोनारीपतिव्रता॥
शिवरात्रौमहादेवंकामंभक्त्याप्रपूजयेदिति॥नित्यनिश्चलशब्दौचतथैव॥माघकृष्ण

माघ०
॥१२६॥

चतुर्दश्यां प्रयः शिवं शिवरात्रौ सितव्रतः ॥ मुमुक्षुः प्रयतो नित्यं स लभेदीप्सितं फलमिति ॥ अप
र्णो वो यदि वा नुष्येत्तक्षिप्यते हिमवानपि ॥ मेरुमंदरलंका॰श्रश्रीशैलो विंध्य एव च ॥ चलंत्ये
ते कदाचिद्देवि निश्चलं हि शिवव्रतमिति ॥ काम्यं च फलश्रवणादवगंतव्यं तच्च स्कंदपुराणे ॥
पठ्यते ॥ शिवं च पूजयित्वा यो जागर्ति च चतुर्दशीं ॥ मातुः पयोधररसं स पिबेन्न कदाचन ॥
म यदिच्छेदक्षयान्भोगान्दिवि देवि मनोरमान् ॥ आगमोक्तविधिं कृत्वा प्राप्नोति परमं पदं ॥ मम भ
क्तस्तु यो देवि शिवरात्रिमुपोषकः ॥ गणत्वमक्षयं दिव्यमक्षयं शिवशासनं ॥ सर्वान्भुक्त्वा मह
हाभोगान् अमृतः संप्रजायते इति ॥ काम्यव्रतस्येशानसंहितायां वर्षसंख्यापद्यते ॥ एवमे
व व्रतं कुर्यात्प्रतिसंवत्सरं कृती द्वादशाब्दिकमेतस्य चतुर्विंशाब्दिकं तु वा ॥ सर्वान्कामानवा
प्नोति पि प्रेत्य चेह च मानवः इति ॥ नित्यकाम्यरूपस्यास्य व्रतस्य सर्वाधिकारकत्वमीशान
संहितायामुक्तं ॥ शिवरात्रिव्रतं नाम सर्वपापप्रणाशनं ॥ आचंडालमनुष्याणां भुक्तिमु
क्तिप्रदायकं ॥ अधिकारनियमः स्कंदपुराणे दर्शितः ॥ माघमासे तु कृष्णा या फाल्गुना
दौ चतुर्दशी ॥ सा च पुण्यतमा तिथिर्द्दर्या सर्वपातकनाशिनी ॥ अहिंसा सत्यमक्रोधं ब्रह्म

॥शिवा॥
॥१२६॥

माध०
॥१२७॥

सेब्रूमः॥ वैश्वानरविद्यान्याये न समुदाय एवात्रानुष्ठेयः॥ तस्य च न्यायस्य संग्राहकावेतौ
श्लोकौ भवतः॥ वैश्वानरमुपास्ते तु प्रत्येकं समुदायतः॥ विकल्पः समुदायो वा नियतो द्वि
विधात् विधेर्विकल्प इति चेन्नैवं॥ समुदायप्रशस्तितः अवयुत्यानुवादेन प्रत्येकोक्त्युप
पत्तित इति॥ अयमर्थः॥ छंदोगैराम्नायते वैश्वानरमुपास्त इति॥ द्युलोकादित्यवाय्वा
काशोदकपृथ्वीरूपैः षड्भिरवयवैरुपेतोऽवयवी सर्वात्मको विराट् पुरुषो वैश्वानरश
ब्दवाच्यः तत्र संशयः॥ किं द्युलोकाद्यवयवा अवयवी च प्रत्येकं विकल्पेनोपास्याः उतावय
वी नियमेनोपास्य इति॥ विकल्प इति तावत्प्राप्तं कुतः द्विविधस्य वेधः श्रूयमाणत्वात्
प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलोद्दालकनामभिः षड्भिर्महर्षिभिः क्रमेण द्यु
लोकादयः॥ षडवयवाः प्रत्येकमुपासिताः इति वृत्तांतकथनपरेषु वाक्येषु षण्णामवय
वानां प्रत्येकमुपास्तिविषयः फलसंहिता उपलभ्यंते॥ पुनश्च तेषां महर्षिभ्यो
श्वपतिराजा समुदायोपास्तिमवोचत अतो द्विविधविधिबलेन यथेष्टं विकल्प इति प्रा ॥त्रिका॥
से ब्रूमः॥ समुदाय एवात्र नियमेनोपासितव्यः॥ कुतः प्रशस्तत्वात्॥ अवयवोपास्ति ॥१२८॥

वाक्यानि त्ववयुत्यानुवादरूपत्वेनोपपद्यंते॥ तस्मात् समुदाय एवोपास्य इति राद्धांतः॥
अनेन न्यायेन प्रकृतेष्वुपवासादीनां त्रयाणां समुदायस्यैव व्रतस्वरूपत्वं॥ ननु क्वचिदु
पवासादित्रयं विधाय पुंसः पक्षांतररूपेणोपवासव्यतिरिक्तद्वयं पठ्यते॥ अथवा
शिवरात्रिं च पूजाजागरणैर्नयेदिति॥ नायं दोषः॥ अथ चेत्यनुकल्पोपक्रमेणानुकल्पविष
स्प योपपत्तेः॥ अत्र व्रते विहितानां त्रयाणां परस्परमंगांगिभावबोधकप्रमाणाभावात्॥
आग्नेयादिषड्यागवत् प्रत्येकं कालसंबंधविधानात्॥ तत्फलसंबंधाच्च समप्राधान्यं द्रष्ट
व्यं॥ अस्यैव व्रतोपोद्बलकं लिंगमभिधीयते॥ लुब्धकस्य भद्राश्च तन्म प्राप्तवत्॥ तो दुर्वास
सासहसंवादे पठ्यते॥ कृष्णपक्षे चतुर्दश्यां न किंचिन्मृगमाप्तवान्॥ अतएवपि प्राणयात्रा
र्थं क्षुधासंपीडितो वसन्निति॥ उपक्रम्य धनुःकोट्याहतान्येव बिल्वपत्राणि मानदापति
तानि महाराज त्वं भोः शिरसि तद्भूतले॥ तत्रैव तस्थौ राजेंद्र सर्वरात्रमतंद्रितः॥ रात्रिशे
षं स्थितो व्याधः स्तब्धं दृष्टिरनामिषः॥ प्रभाते विमले जाते दृष्ट्वा नत्वैव नौ करं॥ बिल्वपु
पत्रेन पत्रेषु कंदमूलश्च पार इति॥ एतस्मिन्यथोक्तव्रते तिथिनिर्णये तु इदं विचार्य
ते॥ किं वा वृत्तांतरेष्विवात्राप्युदयास्तसमयो वेधो आदर्तव्यः॥ किं वा प्रदोषवेधः अ

माघ॰
॥१२८॥

आहोस्विन्निशीथवेधइतितत्रपूर्वेद्युरुदयेत्रयोदशीवेधः॥परेद्युरस्तमयेदर्शवेधइतिउ
दयास्तमयेवेधधोयुक्तस्तव्रतांतरेषु कुल सत्वात्कुसस्यचाकल्प्याशालीयस्त्वात्॥मे
वं॥सामान्याद्विशेषस्यबलीयस्त्वात्॥ सामान्यरूपोह्युदयास्तमयवेधःसर्वतिथिषुस
वेव्रतेषुप्रवर्त्तमानत्वात्॥विशेषरूपोप्रदोषनिशीथवेधोकृष्णचतुर्दशीलक्षणेतिथि
विशेषेशिवरात्र्याख्यव्रतविशेषमुपजीव्यप्रवृत्तत्वात्॥एतदेवाभिप्रेत्यईशान
संहितायामुक्तं॥उदयेत्विताकविद्धाया कुविदस्तमयन्विताः॥व्रतिभिस्तिथयोयत्न
त्वाद्धर्जयेत्वाव्रतंहिदमिति॥अस्मिंस्तुव्रतेप्रदोषवेधोवायुपुराणेदर्शितः॥त्रयोदश्य
स्तगेसूर्येचतस्यक्षेवनाडिषु॥भूतविद्धानुमात्रेतेशिवरात्रिव्रतंचरेदिति स्मृत्यंतरेपि॥
प्रदोषव्यापिनीग्राह्या शिवरात्रिचतुर्दशी॥रात्रौजागरणं यस्मात्तस्मात्तांसमुपो
षयेदिति॥कामिके॥आदित्यास्तमयेकाले अस्तिचेद्याचतुर्दशी॥तद्रात्रिःशिव
रात्रिस्यात्साभवेदुत्तमोत्तमेति॥निशीथवेधोनारदीयसंहितायांदर्शितः॥अर्ध ॥शिव॥
रात्रयुतायत्रमाघकृष्णाचतुर्दशी॥शिवरात्रिव्रतंतत्रसोश्वमेधफलंलभेदिति स्मृत्यंत ॥१२८॥

वर्यदयाक्षमाशांतात्माक्रोधहीनश्च तपस्वीह्यनसूयकः॥ तस्मैदेयमिदंदेवि गुरुपादानु
गोयदि॥अन्यथायोददातीदंत्यतदानरकंव्रजेदिति॥उक्ताधिकारिणानुष्ठेय॥व्रतस्वरूपंत्रिवि
धं॥उपवासोजागरणंपूजाच॥तदुक्तंनागरखंडे॥उपवासप्रभावेनबलादपिचजागरात्॥
शिवरात्रेस्तथातस्यलिंगस्यापिप्रपूजया॥अक्षयाँल्लभतेलोकान्शिवसायुज्यमाप्नुयादिति॥
सह्यखंडे॥स्वयंचलिंगमभ्यर्च्यसोपवासःसजागरः॥अजानन्नपिनिष्पापो निषादोगणतांगत
इति॥अत्रेदंविचार्यते॥किमेतानुपवासजागरणपूजाव्रतस्वरूपेविकल्प्यंतेउतसमुच्चीयंतइति॥
तत्रविकल्पंतइति॥तावद्प्राप्तं एकस्यैवेतरनिरपेक्षतयाविधानात्॥तथाहि स्कंदपुराणे॥के
वलोपवासरूपविधिर्नोक्तः॥पठ्यते अखंडितव्रतोयो हि शिवरात्रिमुपोषयेत्॥सर्वान्कामानवा
प्नोतिरुद्रेणसहमोदतइति॥तथाकेवलजागरणंपठ्यते॥कश्चित्पुण्यविशेषेणव्रतहीनो
पियःपुमान्॥जागरंकुरुतेतत्रसरुद्रसमतांव्रजेदिति॥तथाकेवलपूजापठ्यते॥यःपूजयति
भक्त्येशमनेकफलतांलभेदिति॥तस्मादुपवासादयस्त्रयोविकल्प्यंतेयद्विनागरखंडेसह्यस
खंडयोःसमुच्चयोवेधरस्तीत्युच्यते॥तद्धिप्रत्येकंवासमुदायोवायथेष्टमनुष्ठीयतामितिप्रा

रपि ॥ भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा ॥ शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति ॥
ईशानसंहितायां ॥ माघकृष्णचतुर्दश्यां आदिदेवो महानिशि ॥ शिवलिंगे तथोद्भूतः को
टिसूर्यसमप्रभः ॥ तत्कालव्यापिनी ग्राह्या ॥ शिवरात्रिव्रते तिथिः ॥ अर्धरात्रादधश्चोर्ध्व
र्ध्वं युक्ता यत्र चतुर्दशी ॥ तत्तिथावेव कुर्वीत शिवरात्रिव्रतं व्रती ॥ नार्धरात्रादधश्चोर्ध्वं
युक्ता यत्र चतुर्दशी ॥ नैव तत्र व्रतं कुर्यात् आयुरैश्वर्यहानिदा ॥ व्याप्यार्धरात्रं यस्यां तु ल
भ्यते सा चतुर्दशी ॥ तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः ॥ पूर्वेद्युरपरेद्युर्वा महानिशा
चतुर्दशी ॥ व्याप्ता या दृश्यते यस्यां तस्यां कुर्याद्व्रतं नरः ॥ लिंगाविर्भावकाले तु व्याप्ता ग्रा
ह्या चतुर्दशी ॥ तदूर्ध्वाधोऽन्विता भूता सा कार्या व्रतिभिः सदा ॥ मम प्रियकरी ह्येषा मा
घकृष्णचतुर्दशी ॥ महानिशान्विता यत्र तत्र कुर्यादिदं व्रतमिति ॥ एवं च पूर्वेद्युरेव वापरेद्यु
रेव वा यत्र प्रदोषनिशीथोभयव्याप्तिस्तत्र व्रतमाचरणीयं ॥ पूर्वेद्युरेवोभ[illegible]यव्या
प्तौ स्कंदपुराणे पठ्यते ॥ त्रयोदशी यदा देवि दिनभुक्तिप्रमाणतः ॥ जागरे शिवरात्रिः
स्यान्निशि पूर्णा चतुर्दशी ॥ इति ॥ दिनभुक्तिरस्तमयः ॥ परेद्युरेवोभयव्याप्तौ कामिके प

माघ०

॥१२९॥

व्यते॥ निशाद्वये चतुर्दश्यां पूर्वोत्तरव्याप्त्या पराह्नशुभेति॥ दिनद्वये प्युभयव्याप्तिस्तु न संभा
व्यते॥ यामद्वयवृद्धेरभावात्॥ दिनद्वये प्युभयव्याप्त्यभावोपि न संभाव्यते॥ यामद्वयक्ष
याभावात्॥ एकैकस्मिन् दिन एकैकव्याप्तौ कथमिति चेत्॥ उच्यते साम्य - वृद्धे प्रस
ज्यते पूर्वेद्युर्निशीथैकदेशव्याप्तिः परेद्युः प्रदोषव्याप्तिर्भवति॥ तत्रैकव्याप्तिर्दिनद्वये
समानत्वेपि जयायोगस्य प्रशस्तत्वात्॥ दर्शयोगस्य निंदितत्वाच्च पूर्वेद्युरेवोपवासः॥
जयायोगप्राशस्त्यं चानेकवचनैरादृतत्वादवगम्यते॥ तथा च स्कंदपुराणे पठ्यते॥
कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी॥ एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवे
त्॥ जन्माष्टमी रोहिणी च शिवरात्रिश्चतुर्दशी॥ पूर्वविद्धैव कर्तव्या तिथिभांते च पा
रणं॥ श्रावणी दुर्गनवमी तथा दूर्वाष्टमी च या॥ पूर्वविद्धा तु कर्तव्या शिवरात्रिर्बले
र्दिनं॥ जयंती शिवरात्रिश्च कार्ये भद्राजयान्विते॥ नागरखंडे॥ माघफाल्गुन ॥शिवा॥
योर्मध्ये असिता या चतुर्दशी॥ अनंगेन समायुक्ता कर्तव्या सा सुमुखी सदा तिथिरिति॥
पुराणेपि॥ अर्धरात्रात्पुरस्तात्तु जयायोगो यदा भवेत्॥ पूर्वविद्धैव कर्तव्या शिवरा ॥१२९॥

माघ०

॥१३०॥

त्रौ च संबंधे साधारणे सत्यप्यहर्वैयर्थ्यमुपेक्ष्य प्रदोषनिशीथयोरेव कुतः शास्त्राणां प
क्षपात इति चेत् । रात्रेरत्र प्रधानत्वादिति ब्रूमः । तत्प्राधान्ये चोपपत्तिः स्कंदपुराणे
स्मर्यते ॥ निशि भ्रमंति भूतानि शक्तयः शूलभृद्यतः ॥ अतो रात्रौ चतुर्दश्यां सत्यां तत्पू
जनं भवेदिति चेत् रात्रेरत्र प्रधानत्वादिति ब्रूमः । तत्प्राधान्ये ॥ अस्यां त्रयोदश्यामि
ति व्यधिकरणे सप्तम्यौ तथा चायमर्थः । संपद्यते ॥ त्रयोदशीनिशीथे तस्यां चतुर्द
श्यां विद्यमानायां शिवपूजनमिति । नागरखंडे ॥ माघमासस्य कृष्णायां चतुर्द
श्यां सुरेश्वर । अहं यास्यामि भूपृष्ठे रात्रौ नैव दिवा कलौ ॥ लिंगेषु च समस्तेषु चरेषु स्था
वरेषु च ॥ संक्रमिष्याम्यसंदिग्धं वर्षपापविशुद्धये ॥ तस्यां रात्रौ हि मे पूजां यः करि
ष्यति मानवः । मंत्रैरेभिः सुरश्रेष्ठ विपाप्मा स भविष्यतीति ॥ सा च शिवरात्रिचतु
र्दशी त्रिविधा भवति एकतिथ्यात्मिका तिथिद्वयात्मिका तिथित्रयात्मिका चेति तत्र
सूर्योदयमारभ्य प्रवृत्ता परदिनोदयपर्यंतं तत एकतिथ्यात्मिका सा च वेधाभावा ॥शिव॥
त् प्रशस्ता तिथिद्वयात्मकं त्वेवं द्विधा भवति जयायोगेन दर्शयोगेन च तत्र जयायोग ॥१३०॥

द्वयमेकैकस्मिन्विषये प्रशस्तं ॥ स च विषयविशेषः पूर्वमेवोदाहृतः तिथित्रयात्मकं च
प्रतिथि प्रशस्तं ॥ एतदेवाभिप्रेत्य पुराणे पठ्यते ॥ त्रयोदशी कलाप्येका मध्ये चैव चतुर्दशी ॥
अंते चैव सिनीवाली त्रिस्पृशां शिवमर्चयेदिति । तथा त्रिस्पृशा प्रशस्ता । तथा वारविशेषेणायो
गविशेषेण च प्रशस्ता भवति ॥ तथा स्कंदपुराणे पठ्यते ॥ माघकृष्णचतुर्दश्यां रविवारो यदा
भवेत् । भौमो वाथ भवेद्देवि कर्तव्यं व्रतमुत्तमं ॥ शिवयोगस्य योगे वै तद्भवेदुत्तमोत्त
ममिति । शिवरात्रिव्रते देवि तद्भवेदुत्तमोत्तममिति ननु यदा पूर्वविद्धायामुपवासः त
दापरेद्युः किं तिथ्यंते पारणमुत तिथिमध्ये शास्त्रं तु पक्षद्वये समानं ॥ तत्र तिथ्यंते पार
णावचनानि पूर्वमुदाहृतानि तिथिमध्यपारणवचनं तु स्कंदपुराणे पठ्यते ॥ उपोष्यैव चतु
र्दश्यां चतुर्दश्यां तु पारणं । कृतैः सुकृतलक्षैश्च लभ्यते वाथवा न वा ॥ ब्रह्मा स्वयं चतुर्वक्त्रैः पं
चवक्त्रस्तथाप्यहं ॥ शिवरात्रिफलं तस्य शक्तो वक्तुं न पार्वति ॥ ब्रह्मांडोदरमध्ये तु यानि तीर्था
नि संति वै ॥ संस्थितानि भवंतीह भूतायां पारणे कृते ॥ तिथीनामेव सर्वासामुपवासव्रतादि
षु ॥ तिथ्यंते पारणं कुर्यात् विना शिवचतुर्दशीमिति । बाढमस्ति द्विविधशास्त्रं ॥ तस्य चाद्विवि
धशास्त्रस्य प्रतिपत्करणे कर्मन्यायेन व्यवस्था द्रष्टव्या ॥ यदा यामत्रयादर्वागेव चतुर्दशी समा

धं०

॥१३१॥

प्यते तदा तिथ्यंते पारणं ॥ यदा तु चतुर्दशी याम त्रयमतिक्रामति तदा चतुर्दश्यामध्ये पूर्वाह्णे पार
णं कुर्यात् ॥ यामत्रयोर्ध्वयुक्तायां पूर्वाह्णे पारणं स्मृतं ॥ पूर्वाह्णपारणे मुख्यं अपराह्णे तु मध्यमं
सायाह्ने पारणं नित्यं सदा रात्रौ तु वर्जयेदिति ॥ ॥ इति शिवरात्रिनिर्णयः ॥ ॥ अथ पर्वद
र्शीनिर्णय उच्यते ॥ ॥ सा च द्विविधा ॥ पौर्णिमास्यमावास्या च ॥ तत्र पौर्णिमास्यां परस्परवि
रुद्धवचनान्युपलभ्यंते ॥ तत्र परविद्धाया ग्राह्यत्वं कश्चित्स्मर्यते ॥ एकादश्यष्टमी षष्ठी पौर्णि
मासी चतुर्दशी ॥ अमावास्या तृतीया च ता उपोष्याः परान्विता इति ॥ युग्मशास्त्रेण पूर्ववि
द्धाग्राह्यत्वं प्रतीयते ॥ पद्मपुराणे ॥ पूर्वविद्धा तु कर्तव्या सप्तमी व्रतिभिर्नरैः ॥ पौर्णमासीप्र
हिपालपुराणे निश्चयगते ॥ एवं परस्परविरोधे सति या व्यवस्था वृद्धकैवर्त्ते दर्शिता ॥ भूतवि
द्धा न कर्तव्या अमावास्या च पौर्णिमा ॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति ॥ सा
वित्र्या राजकन्यया चीर्णं सावित्रीव्रतं च भविष्योत्तरे दर्शितं ॥ कथयामि कुलस्त्रीणां महिम्नो
वर्धनं परं ॥ यथा चीर्णं व्रतं पूर्वं सावित्र्या राजकन्ययेति ॥ एतच्च पौर्णमास्याममावास्यायां ॥शिवा॥
च विहितं ॥ तस्मिन्व्रते पूर्वविद्धा ग्राह्या व्रतान्तरे पूर्वविद्धा न कर्तव्या ॥ किंतु परविद्धा न कर्तव्या
या इति परस्परविरुद्धस्य शास्त्रद्वयस्य व्यवस्था ॥ यदा चतुर्दश्यष्टादश नाडी भवति तदा ॥१३१८॥

त्रिः शिवप्रिये इति ॥ ब्रह्मकैवर्ते ॥ रुद्रव्रतेषु सर्वेषु कर्तव्या संमुखी तिथिः ॥ अन्येषु व्रतकल्पेषु प
रेयुक्तामुपावसेदिति ॥ दशयोगानि दशा च स्कंदपुराणे दर्शिता ॥ महतामपि पापानां दृष्टा वै नि
ष्कृतिः पुरा ॥ न दृष्टा कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवामिति ॥ अन्यान्यपि यानि कानिचिद्दशयो
गभिन्नवचनानि तत्र स्मर्यंते तानि सर्वाण्यस्मिन्विषये योजितव्यानि ॥ यदा पूर्वेद्युर्निशी
थादूर्ध्वं प्रवृत्ता चतुर्दशी परेद्युः क्षयवशान्निशीथादर्वागेव समाप्ता तदा पूर्वेद्युः निशीथप्रदो
षनिशीथव्याप्त्या उभयोरप्यसंभवात्परेद्युः प्रदोषव्याप्तेरेकस्यासद्भावाच्च परविद्धैव ग्राह्या
तदेवाभिप्रेत्य स्मर्यते ॥ माघासिते भूतदिने हि राजन्नुपैति योगे यदि पंचदश्याः ॥ जयाप्रयु
क्तां न तु जातु कुर्याच्छिवस्य रात्रिं प्रियकृच्छिवस्येति ॥ यदा पूर्वेद्युः प्रदोषादूर्ध्वं प्रवृत्ता परेद्युः क्ष
यवशात्प्रदोषादर्वागेव समाप्ता परेद्युः द्व्याप्तिसिद्ध्याभावात् जयायोगाच्च पूर्वेद्युरेवोपवासः
अत्रायं विवेकः संपन्नः दिनद्वयेपि निशीथव्याप्तौ तदाव्याप्तौ च प्रदोषव्याप्ति नियामिका
तथा दिनद्वयेपि प्रदोषव्याप्तौ तदव्याप्तौ च निशीथव्याप्तिर्नियामिका एकैकस्मिन् दिने
एकैकव्याप्तौ जयायोगो नियामक इति नन्वस्य शिवरात्रिव्रतस्याहोरात्रसाध्यत्वेनाहनिरा

सावित्रीव्रतमपि तत्र परित्याज्यं ॥ भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति श्रूयते ॥ यो
यं पौर्णमासीनिर्णयः ॥ स एवामावास्यायामप्यवगंतव्यः । तत्रापि सावित्रीव्रतं पूर्वदिने कर्तव्यं
व्रतोत्तरा एव तु उत्तरदिने ॥ अस्यां च व्यवस्थायां ब्रह्मकैवर्तपुराणवचो मुदाहृतं । स्कंदपुराणेपि ॥ भूत
विद्धा ह्यमावास्या न कर्तव्या कदाचन । वर्जयित्वा तु सावित्रीव्रतं च शिखिवाहनेति । पद्मपु
राणेपि ॥ भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत् । वर्जयित्वा तु सावित्रीव्रतं तु शिखिवाहने
ति एवं च सति युग्मशास्त्रं सावित्रीव्रतव्यतिरिक्तेषु द्रष्टव्यं । तथा च प्रचेता अपि । नागवि
द्धा तु या षष्ठी सप्तम्या च तथाष्टमी । दशम्येकादशी विद्धा त्रयोदश्या चतुर्दशी ॥ ॥ भूत
विद्धाप्यमावास्या न ग्राह्या मुनिपुंगवैः ॥ उत्तरोत्तरविद्धास्ताः कर्तव्याः कालकौस्तुतिरिति । पद्म
पुराणेपि । षष्ठ्यष्टमी तथा दर्शः कृष्णपक्षे त्रयोदशी । एताः परयुताः पूज्याः पराः पूर्वेण सं
युता इति । यत्तु नारदीयपुराणे ॥ दर्शं च पौर्णमासं च पितुः सांवत्सरं दिनं । पूर्वविद्धमकुर्वा
णो नरकं प्रतिपद्यत इति । तत्सावित्रीव्रतविषयं श्राद्धविषयं वा ॥ अमावास्यायां पौर्णमा
मास्यामपि श्राद्धं विहितं । तथा च पितामहः । अमावास्या व्यतीपात पूर्णिमास्वष्टकासु च

माध०
॥१३२॥

विद्वान्श्राद्धमकुर्वाणः प्रायश्चित्तीयते ॥ हिंसः ॥ इति व्यासोपि ॥ इंदुक्षये मासि मासि प्रमीतपि-
तृको द्विजः ॥ इंदुक्षये मासि मासि प्रायश्चित्तीयते हिंसइति ॥ अस्य चामावास्याश्राद्धस्य पार्व-
णरूपत्वमपराह्णस्पर्शस्य च तत्कर्मकालत्वं कुतपस्य प्रारंभकालत्वमित्येतत्त्रयं प्रतिपत्प्रकरणे प्र-
त्याब्दिकनिर्णये प्रपंचितं ॥ तथा सत्यपराह्णस्य मुख्यकर्मकालत्वात् पूर्वेद्युरेव वा परेद्युर्वा अपरा-
ह्णव्यापिन्यमावास्या ग्रहीतव्या ॥ तत्रापराह्णव्यापिन्याः पूर्वतिथेः ग्राह्यतामाह हारीतः ॥ यस्या-
सेधागतः सोमो मृणालमिव दृश्यते ॥ अपराह्णे तु या तस्यां पिंडानां करणं ध्रुवमिति ॥ यत्तु कार्ष्णाजि-
निनोक्तं ॥ भूतविद्धाममावास्यां मोहादज्ञानतोपि वा ॥ श्राद्धकर्मणि ये कुर्युस्तेषामायुः प्रहीयत इ-
ति तत् ॥ अपराह्णव्याप्त्यभावविषयं द्रष्टव्यं ॥ अपराह्णव्यापिन्या उत्तरतिथेर्ग्राह्यतामाह हारीतः ॥
अपराह्णे पितृणां तु या भवेदापराह्णिकी ॥ सा ग्राह्या पितृकार्ये तु न पूर्वास्तानुयायिनीति ॥ उभय-
त्रापराह्णव्याप्तित्वं द्वेधा भिद्यते ॥ एकदेशेन कार्त्स्न्येन चेति ॥ एकदेशव्याप्तिर्द्वेधा भिद्यते ॥ साम्येन ॥श्रीः॥
वैषम्येण चेति ॥ तत्र वैषम्येणैकदेशव्याप्तौ महत्त्वेन निर्णेतव्या ॥ तथा च स्मृतिः ॥ अपराह्णद्व- ॥१३२॥
यव्यापिन्यमावास्या यदा भवेत् ॥ तत्राल्पत्वमहत्त्वाभ्यां निर्णयः पितृकर्मणीति ॥ महत्त्वे च

यौसाप्यपि च परास्मृतेति॥ स्मृत्यंतरेपि॥ तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूर्मता॥ सा
प्यपि च कुहूर्ज्ञेया वेदवेदांगवेदिभिरिति॥ चतुर्दशीमिश्रा सिनीवाली प्रतिपन्मिश्रा कुहूः॥
तथा च व्यासः॥ दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूः स्मृतेति॥ कस्यैनोभयत्रापराह्णव्या
प्तावपि तिथिवृद्धौ कुहूरेव ग्राह्या॥ यदा दर्शो दिनद्वयेप्यपराह्णं स्पृशति तदा साग्निकान
ग्निकभेदेन व्यवस्था द्रष्टव्या॥ तथाह जाबालिः॥ अपराह्णद्वयव्यापी यदा दर्शस्तिथिक्षये
आहिताग्नेः सिनीवाली नीरनग्नादेः कुहूर्मतेति॥ आदिशब्दात्स्त्रीशूद्रयोर्ग्रहणं॥ त
था च लोगाक्षिः॥ सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि॥ स्त्रीभिः शूद्रैः कुहूर्ज्ञेया त
था चानग्निकैर्द्विजैरिति॥ एवं शास्त्रार्थे स्थिते सति यानि बहुविधानि वचनानि तानि सर्व
णि प्रोक्तेष्वमावास्याभेदेष्वन्यतमविषयत्वेन योजनीयानि॥ तथाहि तत्र तावद्बौधाय
न आह॥ मध्याह्नापरतो यत्र चतुर्दश्यनुवर्तते॥ सिनीवाली तिसा ज्ञेया पितृकार्येति निष्फलेति॥ ॥शिवा॥
बृहस्पतिरपि॥ मध्याह्नाद्यात्ममावास्यापरस्तात्साप्रवर्तते॥ भूतविद्धा तु सा ज्ञेया
न सा पंचदशी भवेदिति॥ अन्यत्र मध्याह्नाद्ध्वमपराह्णमिति क्रमस्य परस्तादमावास्य॥ ॥१३३॥

स्याप्रवर्तत इति व्याख्येयं॥ तदेतद्वचनद्वयं परेद्युरेवापराह्णव्याप्तौ योजनीयं॥ यत्तु का
त्यायनवचनं॥ पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते॥ वासरस्य तृतीयांशे नातिसं
ध्यासमीपत इति॥ पिंडपितृयज्ञांगभूतानामनुपश्चाद्दीयत इति पिंडान्वाहार्यकममा
वास्याश्राद्धं तत्क्षीणे राजनि चंद्रे कर्तव्यं॥ वासरस्य तृतीयेंशे त्रेधा विभक्तेहनि तृतीये भागे अपराह्णे सा
याह्नसहिते विधीयते॥ तत्र नातिसंध्यासमीपत इति सायाह्नस्य प्रतिषेधे सत्यपराह्णः
कर्मकालत्वेन परिशिष्यते॥ तथा च कर्मकालव्यापिनी तिथिर्ग्राह्येत्युक्तं॥ तत्रेंदुक्षयस्य
चतुर्दश्याष्टमप्रहरे प्रारंभः॥ अमावास्यायाः सप्तमप्रहरे समाप्तिस्तदेतदुभयं कात्याय
न आह॥ प्रथमेंशे चतुर्दश्याः क्षीणो भवति चंद्रमाः॥ अमावास्याष्टमांशे च पुनः किल
भवेदणुरिति॥ यत्तु जाबालिनोक्तं॥ प्रतिपत्स्वप्यमावास्या पूर्वाह्णव्यापिनी यदि॥ भू
तविद्धैव सा कार्या पित्र्ये कर्मणि सर्वदेति॥ अत्र पूर्वाह्णव्याप्ति तिथिविशेषकथनेन
परेद्युरपराह्णव्यापित्वं नास्तीत्यवगम्यते॥ ता दृशी द्विविधा॥ पूर्वेद्युरपराह्णव्यापि
नी तद्रहिता च आद्यपक्षे सर्वैरपि भूतविद्धा कार्या द्वितीयपक्षे साग्निकैरेव भूत

माध० ॥१३४॥ विद्धा कार्या। यत्तु हारीतेनोक्तं॥ पूर्वाह्णे चेदमावास्या अपराह्णे न चेत्तु सा॥ प्रतिपद्यपि कर्तव्या श्रा
द्धं श्राद्धविदो विदुरिति। तद्दिनद्वयेऽप्यपराह्णव्याप्त्यभावे साग्निनिरग्निकविषयं॥ य
दपि हारीतेनैवोक्तं॥ भूतविद्धाप्यमावास्या प्रतिपन्मिश्रितापि वा॥ पित्र्ये कर्मणि विद्वद्भि
र्ग्राह्या कुतपकालिकी यदि॥ तदेकोद्दिष्टविषयं॥ एकोद्दिष्टस्य कुतुपप्राधान्यं॥ प्रतिपत्कैर स
ण प्रपञ्चितं॥ यद्वा प्रतिपन्मिश्रा या अपराह्णव्याप्त्यभावे निरग्निकैरपि हेयत्वा। न्नैका
यां ग्राह्यत्वे कुतुपव्याप्तिहेतुत्वेनाभिधीयते॥ अपराह्णव्याप्तिः पार्वणे मुख्यः कल्पः कुतुपव्या
प्तिरनुकल्पः तथा च मुख्यासंभवे तु कल्पस्योपादेयत्वान्निरग्निकैः प्रतिपन्मिश्रा ग्रहीतुं श
क्या भूतविद्धायाः कुतुपकालिकत्वे सत्यपराह्णिकत्वमर्थासिद्धं॥ तथा च सति मुख्यानुक
ल्पयोरुभयोरपि संग्रहो वा कुतपस्य प्रारंभकालत्वाच्चतुर्मुख्याह्निकप्रकरणोदाहृतदेवस्वामि
वचनानुसारेण कर्मोपक्रमोपसंहारकालव्याप्तिर्दर्शिता भवति। तच्च अदृष्टत्वेनो ॥शिव॥
पन्यस्यते॥ यथा कुतपव्यापिनी भूतविद्धोपादेया॥ तथा प्रतिपदपि कुतपव्याप्त्योपादे
या भवति॥ तच्च वैधापनआह॥ घटिकैकाप्यमावास्या प्रतिपत्सु न चेद्यदा॥ भूतविद्धा ॥१३४॥

ग्राह्येत्यभिप्रायः॥ सर्वशिवराघवसंवादे विस्पष्टमभिहितः॥ अल्पापराह्णेऽप्यमावास्या ग्राह्यास्या
दधिका भवेद्यदि॥ साम्येनैकदेशव्याप्तौ खर्वादिन्यायेन निर्णयः॥ साम्येनोभयत्रैकदेशव्या
प्तिश्च तिथिगतैर्वृद्धिक्षयसाम्यैस्त्रिधाभिद्यते तथा हि। पूर्वेद्युरपराह्णस्य द्वितीयघटि
कामारभ्य परेद्युरपराह्णस्य पंचघटिकासु यदा तिथिर्वर्तते॥ तदा पूर्वापराह्णस्य प्रथमघ
टिकां द्वितीयापराह्णस्य चरमघटिकां च विहाय अवशिष्टासु पंचघटिकासु वर्तमानत्वात्
साम्येनैकदेशव्याप्तिर्भवति। तिथिश्च तदा घटिकाचतुष्टयेन वर्धते॥ यदा तु पूर्वापराह्णस्य
चरमघटिकायामुत्तरापराह्णस्य प्रथमघटिकायां च वर्तते तदापि साम्येनैकदेशव्याप्तिर्भ
वति घटिकाचतुष्टयेन तिथिः क्षीयते यदा पूर्वापराह्णस्य चरमघटिकात्रये द्वितीयाप
राह्णस्य प्रथमघटिकात्रये तदा साम्येनैकदेशव्याप्तिर्भवति तदवस्था तिथिस्तु न वर्धते न
क्षीयते किंतु समैव॥ ईदृशे विषये खर्वदर्पकवाक्यान्निर्णयः तच्च खर्वादिवाक्यं सर्वतिथी
साधारण्येन प्रवृत्तं कुहूममावास्यायामपि प्रवर्तते तथापि॥ प्रवर्ते तथाप्यमावास्यायामेव विशेषेण शि
वराघवसंवादे सारार्थो दर्शितः॥ अमावास्या तु याऽह्णि स्यादपराह्णद्वये समा॥ क्षये पूर्वापराव्

प्रकर्त्तव्या दैवे पित्र्ये च कर्मणीति। प्रतिपत्स्वघटिकैकापि कर्मकासंबंनीय दिनस्यात्तदित्यर्थः॥
तदेतद्वचनं पूर्वेद्युरेवापराह्णव्याप्तौ द्रष्टव्यं॥ अस्मिन्नेव विषये जाबालिः राहप्रतिपत्स्हप्य
मावास्या पूर्वाह्णव्यापिनी यदि। भूतविद्धैव सा ग्राह्या पित्र्ये कर्मणि सर्वदेति॥ यत्तु हारीत
वचनं॥ कन्यामकरमीनेषु तुलायां मिथुने तथा॥ भूतविद्धापि सर्वेषां पूज्या भवति यत्नत
इति॥ तद्वद्भूतविषयं॥ तथा च जाबालिः॥ तुलायां मकरे मीने कन्यायां मिथुने यमा॥ भूत
विद्धा व्रते ग्राह्या शेषेषु प्रतिपद्युतेति॥ ॥ इति पञ्चदशीनिर्णयः॥ ॥ अथेष्टिकालो
निर्णीयते॥ न चेष्टि प्रतिपदि कर्तव्यतया पूर्वप्रकरण एव कुतो नाभिहित इति शंकनीयं॥ पर्वच
तुर्थांशस्यापि प्रतिपद एवेष्टिकालत्वात्॥ पर्वप्रतिपत्संधिसापेक्षत्वाच्च॥ अतः पर्वनिर्णया
नंतरमस्यावसर इति। इदानीं निर्णीयते॥ अत्रेदं चिंत्यते किं पर्वप्रतिपदोः संधिः इष्टिका
ल उत संधेरूर्ध्वं याग्श्चेति॥ तदर्थं प्रथमं संधिस्वरूपं निरूपणीयं॥ निरूपणं च पर्वभेदा
धीनं। अतो भेदो निरूप्यते॥ पर्व च द्विविधं पौर्णमास्यामावास्या चेति॥ ननु प्रतिपदमारभ्य
चतुर्दश्यंतानां तिथीनां शुक्लकृष्णपक्षयोर्नास्ति नामभेदः॥ पंचदश्यां तु किमर्थोयं॥ नामधे

मा॰ध॰ इतिचेत्। तयोरुभयोस्स्वभावख्यापनायेतिब्रूमः। प्रथमद्वितीयादीनांचंद्रकलानांमध्येयत्संख्या
॥१३५॥ कलांवर्धतेतत्संख्ययाशुक्लपक्षेतिथिर्व्यवह्रियते॥ कृष्णपक्षेपिक्षीयमाणयायास्तस्याःक
लायानाम्नातिथिव्यवहारः। तेनन्यायेनैत्यतिथेरपिपक्षद्वयेपंचदशीत्येवव्यवहारः॥
तत्रशुक्लायांपंचदश्यांचंद्रमंडलंस्वकलाभिःसर्वात्मनापूर्यतेसोयंमंडलपूर्तिःपूर्णि
मेत्युच्यते॥ तेननाम्नाख्यायते॥ तदुक्तंब्रह्मांडमत्स्यपुराणयोः॥ भयाक्षयेव्यतिक्रांतेदि
वापूर्णौपरस्परं॥ चंद्रादित्यौपराह्णेतुपूर्णत्वात्पूर्णिमास्मृतेति॥ अह्नःपरोभागःपरा
ह्णस्तस्मिन्समयकालइत्यर्थः। तत्रयथादित्यःसंपूर्णमंडलःसन्नस्तमेतितथोत्तरक्ष
णेचंद्रःसंपूर्णमंडलःसन्नुदेतीतिदृष्टांतदर्शनिकभावविवक्षितत्वात्द्वयोरादित्य
चंद्रयोरूपन्यासः यथापूर्णमंडलविवक्षयापूर्णिमाशब्दःप्रयुक्तःतथामाससंपू
र्तिविवक्षयापौर्णमास्यांसीशब्दःप्रयुज्यते॥ तदुक्तंभविष्योत्तरे॥ पौर्णमासीमहारा ॥श्रिवा॥
जसोमस्यदयितातिथिः॥ पूर्णिमासोभवेद्यस्मात्पौर्णमासीततस्मृतेति। पौर्णमा
स्यमावास्ययोर्वैकल्पेनमासांतत्वमासप्रस्तावेदर्शितं॥ अमावास्येत्यनेनवाम्नाबहवो ॥१३५॥

माघ०
॥१३६॥

र्थः शतपथब्राह्मणे श्रूयते ॥ एष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स यत्रैष एतां रात्रिं पुर
स्तान्न पश्चाद्ददृशे तदिमं लोकमागच्छति । तदद्भः यश्चौषधीरनुप्रविशति । स वै देवानां व
स्वन्नं देवेषां तद्यदेषतां रात्रिं इहामावसति तस्मादमावास्या नामेति ॥ तथा बृहदारण्य
एय केपि । स्वं द्रप्स रूप्यपद्यते ॥ सोमावास्यां रात्रिमेतया षोडश्या कलया सर्वमिदं प्राण
भृदनुप्रविश्य ततः प्रातर्जायत इति ॥ ॥अमावसुशब्दौ यदा कन्यापितृवाचिनौ तदानीमे
वं निर्वक्तव्यं ॥ अमावसुमैच्छत् अमां वसुर्नैच्छद्यस्यां रात्राविति अमावास्या । अमाशब्दाभिधे
या काचित्कन्या कामातुरा सती तस्यां रात्रौ वसुनामानं पितरं वव्रे स च पिता धर्मलोपाद्भीतः
संस्तां कन्यां नैच्छत् । सोयमितिहासः पद्मपुराणेवगन्तव्यः ॥ अमावसुशब्दौ यदा सूर्य
रश्मिनिवासवाचिनौ तदानुसारेण निर्वचनं ॥ स्कांदे नागरखंडे पठ्यते । अमा नाम
रवे रश्मिः सहस्रप्रमुखः स्मृतः । यस्याः स्वतेजसा सूर्यः प्रोक्तस्त्रैलोक्यदीपकः ॥ त
स्मिन्वसति येनेंदुरमावास्या ततः स्मृतेति ब्रह्मांडपुराणेपि । अमा नाम रवे र ॥श्रीव॥
श्मिश्चंद्रलोके प्रतिष्ठिता । यस्मात्सोमो वसेत्तस्यां अमावास्या ततः स्मृतेति । अमा ॥१३६॥

वसुशब्दयोः सहभावनिवासवाचित्वमाश्रित्य तत्स्वायुर्ब्रह्मांडेषु निर्वचनीयस्तं ॥
अमा वसेतां ऋक्षेतु यदा चंद्रदिवाकरौ ॥ एकां पंचदशीं रात्रिममावास्या ततः स्मृतेति ॥
अमाशब्दस्य चंद्रकलावाचित्वं स्कांदे दर्शितं ॥ अमा षोडशभागेन देवि प्रो
क्ता महाकलेति ॥ तां कलामुपजीव्य निर्वचनं भागवतीपुराणे दर्शितं । कला वशिष्टेति
क्षीणः प्रविष्टः सूर्यमंडलं ॥ अमायां वितराते यस्मादमावास्यां ततः स्मृतेति । अमावा
स्या शब्दपर्यायो दर्शशब्दोपि द्वेधा निरूप्यते ॥ सूर्यचंद्रमसौ परस्परं पश्यतोत्रेति
दर्शः ॥ तदुक्तं मत्स्य वायु [redacted] पुराणयोः ॥ आश्रित्य ताममावा
स्यां पश्यतः सुसमागतौ । अन्योन्यं चंद्रसूर्यौ तौ यदा तं दर्श उच्यते तिन दृश्यते । चंद्रो
त्रेति द्वितीये निर्वचनं यद्यपि तदानीमदर्श इति वक्तव्यं ॥ तथापि विपरीतलक्ष
णया दर्शनं इत्युच्यते ॥ तदेतद्गृह्यकारैरुक्तं ॥ शरेकाः तरश्च दर्शदिति । चंद्रादर्शनं
च शतपथावाक्ये पूर्वमुदाहृतं ॥ स यत्रैष एतां रात्रिं न पुरस्तान्न पश्चाद्ददृशे इति ॥
अदर्शने च कारणं सूर्यचंद्रमसोरत्यंतसन्निकर्षः सति च तस्मिन्सन्निकर्षे महतासौ

माध०

॥१३७॥

रेण तेजसा चांद्रं तेजोऽभिभूयते अत एव पौर्णिमास्यामत्यंतविप्रकर्षे सति अनभिभूतत्वाच्चंद्र
मंडलं संपूर्णविषयं दृश्यते॥ तावेतौ सन्निकर्षविप्रकर्षौ गोभिलआह॥ यः परो विप्रकर्षः सूर्याचंद्रमसोः सा पौर्णिमासी। यः परः सन्निकर्षः सामावास्येति तदेवं भिद्या यापंच
दशरूपाः पौर्णिमादिनामनिर्वचनेन स्वभावविशेषः॥ तापितो भवति चेत् पौर्णमास्या
अमावास्ये प्रत्येकं द्विविधे॥ तच्च पुराणे दर्शितं॥ राका चानुमतिश्चैव पौर्णमासी द्विधा
स्मृता॥ सिनीवाली कुहू दृश्येवं [redacted] ममावास्या द्विधेव स्थिति। एतासां च तत्त्व
एं स्वरूपं कठशाखायां विस्पष्टं॥ श्रूयते॥ या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा
राका। या पूर्वामावास्या सिनीवाली योत्तरा सा कुहूरिति॥ वृधवसिष्ठोपि॥ राका चानु
मतिश्चैव पौर्णमासी। द्वयं विदुः॥ दृः॥ राका संपूर्ण चंद्रास्यात् कलोनानुमतिः स्मृता॥
पौर्णमासी दिवा दृष्टे रात्रावन्यनुमतिः स्मृता॥ रात्रिदृष्टे पुनस्तस्मि
न् सेवराकेति कीर्तिते॥ मत्स्यब्रह्मांडपुराणयोः॥ यस्मात्तामनुमन्यते पितरो देवतैः
सह॥ तस्मादनुमति नाम पौर्णिमा प्रथमा स्मृतेति। अत्यर्थं राजैजते यस्मात्सौर्ण ॥श्री॥ ॥१३७॥

र्थः प्राप्यते॥ तत्रामाशब्दस्य चत्वारोऽर्थाः। सहभावः कन्या। सूर्यरश्मिश्चंद्रकला चेति। वसुश
ब्दस्यापि चत्वारोऽर्थाः इंद्रश्चंद्रः पितृपितरो षो निवासश्चेति॥ तत्र सहभाववाचिनममाश
ब्दमिंद्रवाचिनं वसुशब्दं चोररीकृत्य निर्वचनमेवं प्रवर्तते। अमा वसुरथेत्यमावास्या अ
यमर्थः। वृत्रवधानंतरं प्रोषितेंद्रसमागमे संतुष्टा देवताः परस्परमवोचंत॥ अद्यास्मा
भिः सह यमिंद्रो निवसतीति। अतस्तस्यैस्य दिनस्यामावास्यात्वमिति सोयमर्थः॥ शत
पथब्राह्मणे दर्शपौर्णमासप्रकरणे श्रूयते ते देवा अब्रुवन्मावै नो द्य वसुर्वसति यो नः
प्रवासीदिति तैत्तिरीय ब्राह्मणेऽपि विस्पष्टमयमेवार्थः श्रूयते॥ इंद्रो वै वृत्रं हत्वा परां
परावतमगच्छदपराधमिति मन्यमानस्तं देवताः प्रैषमैच्छन्नि सारभ्य पद्यते सोमावा
स्या प्रत्यागच्छत्तं देवा अभिसमगच्छंतामावै नो द्य वसुर्वसतीति इंद्रो हि देवानां वसु
तदमावास्यायां अमावास्यत्वमिति। परंपरावर्तं असंतदूरप्रवेशमित्यर्थः अपर
थेंद्रो हमकार्षं। यदा वसुशब्दश्चेंद्रवाचीत दाप्यमाशब्दस्य सहभावमेवोररीकृत्य ए
वं निर्वक्तव्यं। यश्चौषधीभिः सह चंद्रो वसस्समावास्यो रात्राविसमावास्यासेयम

मास्यां निशाकरः॥ जनाच्चैव चंद्रस्याः राकेति कवयो विदुरिति॥ बृहद्वसिष्ठः॥ दृष्ट
चंद्रामसावास्यां सिनीवालीं प्रचक्षते॥ एतामेव कुहूमाहुर्नष्टचंद्रां महर्षय इति॥
तदेवं चत्वारः पर्वभेदा उक्ताः॥ तेषु कुहूव्यतिरिक्तानां त्रयाणां भेदानां लघ्वक्ष
रोच्चारणपरिमितः कालः संधिरित्युच्यते॥ कुहूस्तु लक्षरद्वयपरिमितः कालः॥ तदु
क्तं भगवतीपुराणे॥ अनुमत्याश्च राकायाः सिनीवाल्याः कुहूं विना॥ एतासां द्विलवः
कालः कुहूमात्रा कुहूः स्मृतेति॥ कुहूरिति कोकिलेनोक्ते यावता कालः समाप्यते॥ तत्का
लसंज्ञिता चैषा अमावास्या कुहूः स्मृता॥ इत्येष एव संधीनां कालो द्विविधः स्मृत इति
एवं संधौ निरूपिते सति योयं प्रक्रांतो विचारस्तत्र संधिरेव विषिः काल इति तावद्यासं सं
धीयते तेति श्रुतेः॥ मैवं॥ संधेरतिसूक्ष्मत्वात् तत्र यागानुष्ठानानुपपत्तेः का तर्हि
श्रुतेर्गतिः पार्श्वद्वयलक्षणेति ब्रूमः॥ यथा गंगायां घोष इत्यत्र गंगाशब्दः प्रवाहेनु
पपन्नस्तत्समीपस्थं तीरं लक्षयति॥ तथा संधिशब्दोपि पार्श्वद्वयं लक्षयति॥ अत एव

माध०
॥१३८॥

श्रुत्येतरं संधिमभितो यजेतेति ॥ बौधायनोपि ॥ सूक्ष्मत्वात्संधिकालस्य संधिविषयउ
च्यते ॥ सामीप्यं विषयं प्राहुः पूर्वेणापरेण चेति ॥ अत्र पूर्वापरशब्दाभ्यां संधेः प्राचीनं
पर्वदिनं प्रतीचीनं प्राचीनं प्रतिपद्दिनं चाभिधीयते ॥ तत्र पूर्वस्मिन्पर्वदिने यागप्रारंभ उ
त्तरस्मिन्प्रतिपद्दिने यागसमाप्तिः अन्वाधानमिध्माबर्हिः संपादनमग्निपरिग्रहः उप
स्तरणं चेत्येवमादिप्रयोगः प्रारंभः स च पूर्वेद्युरनुष्ठेयः ॥ तथा च तैत्तिरीयब्राह्मणे
श्रूयते ॥ पूर्वेद्युरिध्माबर्हिः करोति यज्ञमेवारभ्य गृहीत्वोपवसतीति ॥ शतपथब्राह्मणे
पि ॥ पूर्वेद्युरग्निं गृह्णाति उत्तरमहर्यजंतेति तत्राग्निग्रहणं नामाध्वर्युणा आहवनीय
गार्हपत्यदक्षिणाग्निषु ममाग्ने वर्च इत्यादिभिस्त्रिभिः समिदाधानलक्षणेन्वाधा
ने क्रियमाणे पार्श्ववर्तिना यजमानेनाग्निं गृह्णामीत्यादिनाम मन्त्राणां पठनं तदिदं
न क्रियते ॥ प्रतिपद्दिने पि कर्मणे वां देवेभ्य इत्यादिभिर्मन्त्रैरध्वर्युर्हस्तप्रक्षालनं तं ॥शिवा॥
डुलनिर्वापपुरोडाशप्रदानादिलक्षणं प्रयोगं करोतीति तदिदं यजनं एतदेवाभि ॥१३८॥

माध० गः प्रतिपदः क्वचित् ॥ रक्षांसि तद्विलुंपंति श्रुतिरेषा तनातनीति ॥ तदेवं पर्वण्यन्वाधानादिकं प्रतिप
॥१३९॥ द्यिष्टिरिति पार्श्वयोरुभयोः प्रारंभसमाप्ती व्यवस्थिते ॥ यदा पर्व प्रतिपद उदयमारभ्य संपूर्
णे तिथी भवतस्तदा नकोपि संदेहः ॥ यदा तु खंडे तिथी तदा निर्णयोभिधीयते तत्र गोभि
लः ॥ आवर्तने यदा संधिः पर्वप्रतिपदोर्भवेत् ॥ तदहर्याग इष्येत परतश्चेत्परेहनि ॥ पर्वप्र
तिपदोः संधिरर्वागावर्तनाद्यदि ॥ तस्मिन्नहनि यष्टव्यं पूर्वेद्युस्तदुपक्रमः ॥ आवर्तनात्स
रः संधिर्यदि तस्मिन्नुपक्रमः ॥ परेद्युरिष्टिरित्येष पर्वद्वयविनिश्चयः इति ॥ लोगाक्षिरपि
पूर्वाह्णे वाथ मध्याह्ने यदि पर्व समाप्यते ॥ उपोष्यस्तत्र पूर्वेद्युस्तदहर्याग इष्यते ॥ अ
पराह्णे थवा रात्रौ यदि पर्व समाप्यते ॥ उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यत इति ॥ ए
तेषु वचनेषु मध्याह्नादिशब्दा ह्यायोभिकानुपर्व त्रिधाभागमाश्रित्य प्रवृत्ताः ॥ तथ
था सत्यह्नो मध्यमं मध्याह्न इति मुख्यस्तेनावर्तनं मध्याह्नशब्देनाभिधीयते ॥ अत एव गोभि
लेनावर्तनशब्दः संप्रयुक्तः ॥ आपस्तंबेनापि मध्यमशब्दः प्रयुक्तः पूर्वाह्णे मध्यमे वावा ॥शिवा॥
पि यदि पर्व समाप्यते ॥ तदोपवासः पूर्वेद्युस्तदहर्याग इष्यते ॥ अह्नः पूर्वभागः पूर्वाह्णः ॥ ॥१३९॥
अह्नः परो भागः पराह्णः ॥ अतस्ताभ्यां शब्दाभ्यामाव

र्तनात्पूर्वोत्तरभागावभिधीयेते ॥ वाजसनेयिनां तु विशेषमाह ॥ भाष्यसंग्रहकारः ॥ मध्यंदिना
स्यादहनि यस्मिन्प्राक्कर्मण्याः संधिरियं तृतीया ॥ सार्वविकी वाजसनेयिमते तस्यामुपोष्य
थ परेद्युरिष्टिरिति ॥ आवर्तनादूर्ध्वमस्तमयादर्वाक् यदा संधिर्भवति तदा संधिमती ति
थिः प्रथमा रात्रौ संधिश्चेत् संधिमती तिथिर्द्वितीया ॥ ते उभे अपेक्ष्य पूर्वाह्णे संधिमती पर्वति
थिः तृतीया भवति तस्यां तृतीयतिथौ पर्वकालस्याल्पत्वात् सार्वविकेत्युच्यते ॥ शाखां
तराध्यायिनां इतरा पूर्वेद्युरन्वाधानादिकं संधितिथावेवेष्टिः ॥ वाजसनेयिनां तु संधि
तिथावन्वाधानं उत्तरतिथावेष्टिः एवं च सति वाजसनेयिनां न कापि संधिनाहः पूर्वेद्युर
न्वाधानादिकमस्ति सोयं विशेषः ॥ आवर्तने ततः पुरा वा यदा संधिर्भवति तदा वाजस
नेयिव्यतिरिक्तानां चतुर्थांशे दृष्टिः प्राप्नोति तत्र विशेषमाह गार्ग्यः ॥ प्रतिपद्यप्रतिष्ठ
यां यदि त्वेष्टिः समाप्यते ॥ पुनः प्रणीय कृत्स्नेष्टिः कर्तव्या यागवित्तमैरिति ॥ पर्वणश्चतुर्थां
शः प्रतिपदस्त्रयोंशाश्चैव यागकालत्वेन विहिताः ॥ तत्र पर्वचतुर्थांशस्य विषय उदाहृतः ॥
प्रतिपदंशानां विषय उदाह्रियते ॥ उषःकाले संधौ प्रतिपदः प्रथमांशो यागकालः ॥ निशी
थसंधौ द्वितीयोंशः रात्रिप्रारंभे संधौ तृतीयोंशः ॥ नन्वनेन न्यायेनापराह्णे संधौ प्रति

माघ॰
॥१४०॥

यच्चतुर्थ्यंशस्य यागकालत्वं प्राप्नोति तच्च प्रतिषिध्यते ॥ न यष्टव्यं चतुर्थांश इति स्मृतेः। अतस्तादृशो
विषये याग एव लुप्येतेति चेत् ॥ मैवं ॥ वक्ष्यमाणातपेन प्रतिप्रसवाभिधानात्। संधिर्यद्यपरा
ह्णस्यात्तदा यागं ॥ प्रातः परेऽहनि ॥ कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दुष्यतीति ॥ एवं तर्हि प्रतिपच्चतुर्थां
शनिषेधो निर्विषयः स्यादिति चेत् ॥ मैवं ॥ सद्यःकालविषये चरितार्थत्वात्। तद्विषयं दर्श
यति कात्यायनः। संधिश्चेत्संगवादूर्ध्वं प्राक्पर्यावर्त्तनाद्रवेः ॥ पौर्णमासीति विज्ञेया सद्यःकाल
विधौ तिथिरिति भाष्यार्थसंग्रहकारोऽपि ॥ अन्वाहितिश्च स्तरणोपवासः पूर्वेद्युरेते खलु
पौर्णमास्यां आवर्त्तनात्प्राग्यदि पर्वसंधिः सद्यस्तदा क्रियते समस्तमिति ॥ आपस्तंबोऽपि
पौर्णमास्यां त्वन्वाधानपरिस्तरणोपवासाः सद्यो वा सद्यस्कालायां सर्वे क्रियंत इति। संगवा
वर्त्तनयोर्मध्ये पौर्णमासीप्रतिपदोः संधौ सति पूर्वोदाहृतैर्वचनैः संधिदिनात्पूर्वेद्युरन्वाधा
नादिकं प्राप्तं। तच्च सद्यःकालवाक्यैः संधिदिन उत्कृष्यते ॥ न त्वीदृशे विषये संधिदिनात्पर
दिने याग उत्कृष्यते तथा सत्युपराह्णक्लिष्टं चान्वाधानयागयोर्दिनभेदो भविष्यति। अ ॥त्रिव॥
स्ति चात्र दृष्टांतः। वाजसनेयिनामीदृशे विषये अन्वाधानोत्कर्षे सति यागस्याप्युत्कृष्टत्वा
त् ॥ मैवं ॥ अन्वयव्यतिरेकरूपाभ्यां द्वि ॥१४०॥

प्रेत्य गोभिल आह ॥ पक्षांता उपवस्तव्याः पक्षादयोऽभियष्टव्या इति ॥ अत्रोपवासशब्दे
नाग्न्युपस्तरणादिर्विवक्षितस्तस्मिन् क्रियमाणे यजमानसमीपे देवतानां निवासः ॥
उपास्मिन्श्वो यक्ष्यमाणे देवता वसंति य एवं विद्वानग्निमुपस्तृणातीति ॥ उपवासश
ब्दाभिधेयस्य पर्वदिनकर्त्तव्यस्यान्वाधानादेः पर्वणि चतुरंशा भवंति आद्यास्त्रयों
शा विहिताः कालाः न तु चतुर्थोंऽशः। यागशब्दाभिधेयस्य तु पुरोडाशप्रदानादेः पू
र्वोक्तपर्वचतुर्थांशः प्रतिपदंशास्त्रयश्च विहितः कालः न तु प्रतिपदश्चतुर्थोंऽशः तदे
तदाह लौगाक्षिः ॥ त्रीनंशानुपवसतस्य यागस्य चतुरो विदुः ॥ द्वावंशानुत्सृजेदं
त्यौ यागे च व्रतकर्मणीति ॥ तमेतं यागकालं यत्नपार्श्वोऽप्याह ॥ पंचदश्याः परः पाद
प्रक्षादेः प्रथमास्त्रयः। कालः पार्वणयागे स्यादन्यथा ते तु न विद्यत इति वक्ष्यमाणातपोऽपि
पि ॥ पर्वणो यश्चतुर्थांश आद्याः प्रतिपदस्त्रयः। यागकाल स विज्ञेयः प्रातरुक्तो मनीषि
भिरिति। अत्र प्रातरिति विशेषणात् ॥ सूर्योदयास्योपरि मुहूर्तत्रयं यागकालः
इत्युक्तं भवति। प्रतिषेधश्चतुर्थांशे निषेधति कात्यायनः। न यष्टव्यं चतुर्थेंऽशे या

धिनिषेधाभ्यामस्याः शेषकालानिवारितत्वात्॥ तत्र सद्यस्कालविधये। चयरूपा प्रतिप
च्चतुर्थांशे प्रतिषेधो ऽतिरेकरूपः एवं च सति प्रतिषेधवाक्यं सावकाशं भवति॥ अमा
वास्यायां विशेषमाह लघुशातातपः॥ द्वितीयां त्रिमुहूर्तां चेत्प्रतिपद्यापराह्णिकी॥ अ
न्वाधानं चतुर्दश्यां परतः सोमदर्शनात्॥ सोऽयं विशेषो नाश्वलायनापस्तम्बादिविष
यः किंतु बौधायनवचनात् तच्छाखिविषयः॥ अत एव बौधायनः॥ द्वितीयां त्रिमुहूर्तां
चेत्प्रतिपद्यपराह्णिकी॥ अन्वाधानं चतुर्दश्यां परतः सोमदर्शनात्॥ चतुर्दशी चतुर्
यामे अमावास्या न दृश्यते॥ श्वो भूते प्रतिपच्चेत् स्यात् पूर्वा तत्रैव कारयेत्॥ चतुर्दशी च
संपूर्णा द्वितीयाक्षयकारिणी॥ चतुर्दिष्टिरमावास्यां स्यान्न भूते कव्यादिकी क्रियेति॥
एतेषां वचनानामयमर्थः॥ अद्वि यचतुर्दशी संपूर्णा अस्तमयादूर्ध्वं गमावास्या
स्वल्पा अत एवापराह्णव्याप्त्यभावाद्धाधायवन्वाधानाय गौपूर्वेणकरीत्याय यद्यपि भि
मिन्नभावेन भज्यते तथापि प्रतिपद्द्वितीयायां सत्यां भवंस्य दृश्यमानत्वात् तद्दिन
स्य चेष्टो निषिद्धत्वात् प्रतिपद्युतायाममा। मावास्यायामिष्टिः स्वल्पामावास्यापेता

माध०
॥१४१॥

यां चतुर्दश्यां श्राद्धाद्यन्वाधानादिकं कर्त्तव्यमिति ॥ एतदेवाभिप्रेत्य स्मृत्यंतरे ॥ आदित्ये स्तमिते
चंद्रः प्रतीच्यामुदयाद्यदा ॥ प्रतिपद्यतिपत्तिः स्यात् पूर्ववद्दर्शो यजेत्तदेति ॥ बृहद्वसिष्ठोपि ॥
इंदोर्निरूप्ते पूर्य्यसि पुरस्तादुदिते विधौ ॥ यदि गुण्यं कृतं तस्मिन् पश्चादपि हितं दूवेत्तध्दति ॥
अस्यायमर्थः ॥ संपूर्णायां तु दर्श्यामविचारेणामावास्याबुद्धिं कृत्वान्वाधानादिकं कृत्वा हविर्नि
र्वापं करोति ॥ कृते तस्मिन्नुषःकाले पूर्वस्यां दिशि चंद्रमा उदेति तदा न दर्शकर्म भवितुम
र्हति दर्शकालस्याप्राप्तत्वात् किंतु कालापराधनिमित्तीकृत्य दर्शदेवता अपनीय दात्राद्दि
गुणविशिष्टान्यग्न्यादिदेवतांतराण्युद्दिश्य हविःप्रक्षेपो विहितः ॥ तदेव दत्तैत्तिरीयब्रा
ह्मणे श्रूयते यस्य हविर्निरूप्तं पुरस्ताच्चंद्रमा अभ्युदेति त्रेधा तंडुलान्विभजेत् ये मध्य
माः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात् ये स्थविष्ठास्तानिंद्राय प्रदात्रे
दधंश्चरुं ये क्षोदिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमिति ॥ सोयं दृष्टांतः ॥ हविषि नि ॥श्रीव५
रूप्ते सति तदूर्ध्वं पूर्वस्यां दिशि चंद्रउदिते सति दर्शकर्म विधेयं द्वैगुण्यमुक्तेनीत्या
वस्थितं तदेव वैगुण्यं हामदिने पश्चिमदिशि चंद्रोदये भवतीति ॥ एतदेव बौधायन ॥१४१॥

माध०
॥१४२॥

दृश्यां कर्तव्येः। तथा च बौधायनेनोक्तं॥ यदा चतुर्दशी यामं तुरीयमनुपूरयेत्। अमावास्या
स्याक्षीयमाणा तदैव श्राद्धमाचरेत्॥ चतुर्दश्यां चतुर्यामे अमा यत्र न दृश्यते। श्वोभूते प्र
तिपद्यत्र भूते कुर्यादिकां क्रियेति॥ चतुर्थे यामे अमावास्या न दृश्यते। किं त्ववसाने स्व
तिपद्यत्र भूते कुर्यादिकां क्रियेति॥ ... ननु चंद्रदर्शनोपेतायां प्रतिप
द्यासा च परदिने क्षीयते तदानी चतुर्दश्यां श्राद्धमाचरेत्॥ ननु चंद्रदर्शनोपेतायां प्रतिप
दि इष्टिः समाम्नाता॥ तथा च शतपथब्राह्मणं॥ यदहः पश्चाच्चंद्रमा अभ्युदेति तदहर्यजे
न्नमालोकानभ्युदेतीति॥ तैत्तिरीयब्राह्मणेपि॥ एषवै सुमनानामेष्टिर्यमद्यजौ जानन्नप
श्चाच्चंद्रमा अभ्युदेत्यस्मिन्नेवास्मिँल्लोके ऋध्नोति ... भवतीति॥ अयमर्थः॥ येयमिष्टि
श्चंद्रदर्शनोपेते दिने क्रियते सेयमिष्टिः सुमनःशब्दवाच्यानादृशीमिष्टिं कृतवते यजमाने
मभिलक्ष्य तस्मिन् दिने पश्चाच्चंद्रमा उदेति तस्मिन् यजमानाय अस्मिन् लोके समृद्धि
र्भवतीति बाढं॥ तदेतत् श्रुतिद्वयं बोधायनमतानुसारि व्यतिरिक्तानामपि चंद्रदर्शनोप
९ यागमात्रविषयं॥ तदेतदभिप्रेत्य प्रतिपच्चतुर्थ्यां श्राद्धमुदाहृतः। ननु बोधायनव्य ॥श्रीः॥
तिरिक्तानामपि चंद्रदर्शनयोग्यद्वितीयायुत प्रतिपद्दिनं प्रतिपद्दिनमिष्टेर्निषिद्धं॥ तथा ॥१४२॥
तिरिक्तानामपि चंद्रदर्शने न योग्या द्वितीयायुत प्रतिपद्दिनं प्रतिपद्दिनमिष्टौ निषिद्धं॥ तथा

यष्टव्यं तु द्विजातिभिः॥

च स्मृतिः॥ पर्वणो यो द्वितीये तु कार्यो विधिर्द्विजोत्तमैः॥ द्वितीया सहितं यस्माद् दृष्टव्यं त्वाप्य
यनाइति॥ बाढं॥ तदेतदावर्तनात्पूर्वकालयोः संधौ सति द्रष्टव्यं अपराह्णादिसंधिषु प
र्वचतुर्थांशस्येष्टाव प्राप्तत्वात् तदेवं प्रकृतिरूपायाः इष्टेः कालो निरूपितः॥ इदानीं तु विकृते
स्तत्कालो निरूप्यते॥ आवर्तनात्प्राग्यदि पर्वसंधिः कृत्वा तु तस्मिन् प्रकृतिं विकृसाः॥ तत्रे
व यागः॥ परतो यदि स्यात्तस्मिन्वि कृत्याः प्रकृतेः परे युरिति॥ आवर्तनेन ततः पुरा
वा पर्वसंधौ तस्मिन् दिने प्रथमं प्रकृतियागं कृत्वा पश्चाद्विकृतिसंबंधी यागः कर्तव्यः॥
यद्यावर्तनात्परतः संधिस्तदा केवलं विकृतियागः संधिदिने कर्तव्यः॥ प्रकृतियागस्तु सं
धिदिनात्परेद्युरनुष्ठेय इत्यर्थः॥ आवर्तनेन ततः पूर्वकाले ततः परकाले वा संधिरित्येतेषु
त्रिष्वपि पक्षेषु संधिदिन एव विकृतेरनुष्ठानं प्रकृतेस्तु पुनस्त्वा संधिदिनात्परेद्युः प्रा
नुष्ठानं व्यवतिष्ठते इष्टिनो च सर्वासां दर्शपूर्णमासौ प्रकृतिः ऐंद्राग्नमेकादशकपालं निर्वपेत्प्रजा
कामइत्यादयः काम्यतपठिताः काम्येष्टयो विकृतयः ततः प्रकृतिवद्विकृतिः कर्तव्येति। न्यायेन
विकृतीनामपि संधिदिनात्परेद्युः कदाचिदनुष्ठानं प्रसक्तं तदेतदुदाहृते न वचनेन नियीयते इष्टि

माध०
॥१४३॥

विकृतिन्यायः पशुविकृतिसोमविकृत्योरपि द्रष्टव्यः ॥ पशूनां सर्वेषामग्नीषोमीयपशुः प्रकृ
तिः वायव्यं श्वेतमालभेत भूतिकाम इत्यादयः कण्डिकान्तरपठिताः काम्यपशवो विकृतयः सो
मयागानां सर्वेषामग्निष्टोमः प्रकृतिः उक्थ्यषोडश्यतिरात्रादयो विकृतयः त्रिविधानामपि प
शुसोमविकृतीनां पर्वैव कालः ॥ तदेतदापस्तंब आह ॥ यदीष्ट्या यदि पशुना यदि सोमेन यजेता
मावास्यायां वैव पौर्णमास्यां वा यजेतेति ॥ अत्रापि पूर्ववत्प्रतिपदि कदाचिद्विधिप्राप्तौ तस्या
वृत्तये पुनः कालो विधीयते तस्माद्विकृतीनां पर्वैव काल इति स्थितं ॥ ननु प्रकृते यथोक्तकाला का
लान्तरं कपिल स्मर्यते ॥ षोडशेऽहन्युत्तमेष्टिर्मध्या पंचदशेऽहनि ॥ चतुर्दशे जघन्येष्टिः पापा
त्मसदृशेऽहनीति अयमर्थः ॥ पूर्वत्वे प्रतिपद्दिनमारभ्य गणनायामागामिप्रतिपद्दिनं षोडशं
भवति तत्रेष्टिरभीष्टा उत्तमा ततः पूर्वस्मिन् पंचदशेऽहनि मध्यमा ॥ ततः पूर्वस्मिन् चतु ॥श्रिव॥
र्दशेऽहनि जघन्या तदेवं कालत्रयं विहितं उत्तमकालो योऽजत्रादिनादूर्ध्वं वर्तितिसप्तम्यो
दिने प्रतिपत्स्यात् तत्रोत्तममध्यमपक्षौ शास्त्रीयौ तिथीनां वृद्धिक्षयौ याभावे सत्यवगमः ॥ ॥१४३॥

मन्तमुपोद्बलयति श्रुतिः ॥ यस्मिन्नहनि पुरस्तात्पश्चात्सोमो न दृश्यते तदाहर्यजेतेति ॥
अयमर्थः ॥ सिनीवाल्यां पुरस्ताच्चंद्रदर्शनं भवतीति द्वितीयायुक्तायां प्रतिपदि पश्चाच्चंद्रो
दृश्यते तयोरुभयोर्मध्ये वर्तिन्यां कुह्वां द्विविधमपि चंद्रदर्शनं नास्ति अतस्तस्मिन्दिने
यष्टव्यमिति चंद्रदर्शनोपेतायां तु प्रतिपदि यागानुष्ठाने प्रायश्चित्तमाह कात्यायनः ॥ य
जनीयेऽह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते ॥ तत्र व्याहृतिभिर्हुत्वा दंडं दद्याद्द्विजातय इति ॥
चंद्रदर्शनराहित्यमेवाभिप्रेत्य बौधायनकारिकासु पठ्यते ॥ इष्टेन तु प्रतिपदा दिनाद्यः
सप्ताष्ट वा यत्र भवति तस्य क्षीणासु नाडीषु दिनपूर्वकेऽथ वृद्धौ च भवेद्द्वितीय इति ॥
अयमर्थः ॥ अमावास्यातिथेः संबंधिनीषु नाडीषु क्षीणासु सतीषु तस्मिन्दिनेऽस्तमयात्पू
र्वं प्रतिपत्संबंधिन्यो नाड्यः सप्ताष्ट वा वृद्धिर्भवति तद्दिनमिष्टेरलं योग्यं सोऽयमेकः पक्षः ॥
य अमावास्याप्रतिपदोर्यदा वर्धेते तदा द्वितीयः कल्पो भवेत् ॥ अमावास्यायामन्वाधाय
सोमदर्शनरहिते प्रतिपद्दिने यागः कर्तव्य इति ॥ स्मृत्यंतरेपि ॥ अर्वागस्तमयाद्यत्र द्विती
यानुप्रसूयते ॥ तत्र यागं न कुर्वीत विद्धे देवाः पराङ्मुखा इति ॥ बौधायनमतानुसारिणा
मन्वाधानं चतुर्दश्यामपि स्वल्पामावास्यापेतायां वृद्धे

पक्षप्राप्नोति एकस्मिन्दिने क्षीणे ॥ सति मध्यमः पक्षः प्राप्नोति जघन्यपक्षस्य न शा
स्त्रीयः दिनद्वयक्षयाभावात् अतो जघन्यत्वेनोक्तो निषेधविवक्षया प्रयुक्तः ॥ ननु स्वीकार्य
पक्षांतरविवक्षया ॥ ननु तिथिवृध्या विशेषस्य दर्शतिथिः तत्कथं पापसप्तदशोहनीति प्रति
षेधः ॥ नायं दोषः ॥ अत्र तिथिवृध्यो यदा षोडशदिने अमावास्या दशघटिका सप्तदशादिने प्र
तिपद्वर्धते तदानीं प्रतिपच्चतुर्थांशस्य त्रिकालव्यापित्वात् अनुष्ठानप्रसक्तावनेन वचनेन नि
वार्यते तत्र त्र्याव्यंपूर्वाह्णसंध्युपेतदिन एवेष्टिः कर्तव्यत्तया निर्णीतत्वात् ॥ यदा तु महत्यां वृ
द्धौ अमावास्या संपूर्णा सप्तदशादिने प्रतिपत्संपूर्णा तदा न प्रतिषिध्यते ॥ ननु बौधायने नत्र
यो दशसप्तदशादिनयोरन्वाधानं प्रतिषिध्यते ॥ यत्रोपवसथकर्म यजनीयत्र यो दशं
भवेत्सप्तदशं वापि तत्प्रयत्नेन वर्जयेदिति अत्र यजनीयं प्रतिपद्दिनमारभ्य पंचदशादि
नमौपवसथस्य मुख्यः कालः तिथिक्षये तु दशादिनं तिथिवृद्धौ षोडशादिनं तथा सति त्रयो
दशसप्तदशयोः प्रसक्तिरेव नास्ति तत्कथं प्रतिषिध्यत इति चेत् ॥ एवं तर्हि प्रतिषेधो नि

माध०
॥१४४॥

त्यानुवादो स्य अस्ति चाप्रसक्तिप्रतिषेधरूपो नित्यानुवादो वेदेनुपश्यं यां नांतरिक्षेनदिव्य
यग्निश्चेतव्य इति श्रूयते ॥ पर्वत्र पर्वप्रतिपदोः संधिमुपजीव्यान्वाधाने ष्टिकालौ व्यवस्थापि
तौ तत्र तिथिक्षय वृद्ध्योः संधिविषये किंचिद्विशेषमाह कात्यायनः ॥ परेद्युर्घटिकान्यूनास्त
थैवाभ्यधिकाभ्ययाः तदर्धं क्षयप्रपूर्वस्मिन्ह्रासवृद्धीप्रकल्पयेदिति ॥ [illegible] लोगाक्षिर
पि ॥ तिथेः परस्यां स्या घटिकास्तु थास्युर्न्यूनास्तथैवाभ्यधिकास्तु स्तु तासां ॥ उ अर्धं वि
याज्यं च तथा प्रथैयौ याज्यं ह्रासेच वृद्धौ प्रथमे दिने तदिति ॥ पूर्वेद्युरमावास्या पंचदश घटि
का परेद्युः प्रतिपद्दिनावती तदा यथान्वितमेवोपजीव्य संधिर्विहितं ॥ यदातु प्रतिपत् षड्
घटिका क्षीयते तदा घटिकात्रयक्षयो मावास्यायां वियोजनीयः ॥ तस्मिन्वियोजि
ते द्वादश घटिकामावास्या भवति ततआवर्त्तनात्पूर्वसंधिः संपद्यते ॥ अनेन एव न्यायेन
येन घटिकात्रय वृद्धौ योजितायाम् ष्टादश घटिकामावास्या भवति तथा सत्यूर्ध्वसंधि ॥शिका॥
भवति ॥ तदेवं संधिं विज्ञाय तदनुसारेण ॥ न्वाधानेष्टी अनुष्ठातव्ये ॥ ॥ इति इष्टिनिर्णयः ॥
नन्विष्टिकालवद्ग्रहणकालोप्यत्र निर्णेतव्यः ॥ पर्वप्रतिपत्संध्युपजीवने नप्रवृत्तत्वात् ॥ ॥१४४॥

माध०
॥१४५॥

पवासः॥ तथा सति प्रातः संकल्पकालेन नक्षत्रसद्भावोपलभ्यते॥ निशीथे राशिना युक्तेयं
तदत्यत्र ज्योतिःशास्त्रप्रसिद्धस्य राशियोगस्याविवक्षितत्वात् नक्षत्रसद्भावमात्रमभिधी
यते। अत्यवगंतव्यं दिनद्वयेप्यस्तमययोगाभावे निशीथयोगेन पूर्वेद्युरुपवासः तदाह सु
मंतुः। यदार्धरात्रादर्वाक्तु नक्षत्रं प्राप्यते तिथौ॥ तन्नक्षत्रव्रतं कुर्यात् दितेपारणं भवेदिति॥
अत्र तिथिवद्वैकभक्तेनक्तयोः मध्याह्नप्रदोषव्याप्तिभ्यां न निर्णयः किंतूपवासनक्षत्र
एवतदुभयं कर्तव्यं॥ तदुक्तं स्कंदपुराणे॥ तत्रैवोपवसेदृक्षे यन्निशीथादधो भवेत्॥ उपवा
सेयदृक्षं स्यात् तद्दिने नैकभक्तयोः॥ यत्तु विष्णुधर्मोत्तरे॥ सा तिथिस्तच्च नक्षत्रं यस्याम
भ्युदितो रविः॥ वर्धमानस्य पक्षस्य हानौ त्वस्तमयं प्रति। इति पित्र्यकार्यविषयं॥ यदपि
मार्कंडेयेनोक्तं॥ तन्नक्षत्रमहोरात्रं यस्मिन्नस्तमितो रविः॥ यस्मिन्नुदेति सविता तन्न
क्षत्रं दिनं भवेदिति॥ अस्यायमर्थः॥ द्विविधो नक्षत्रसंबंधी कालविशेषः अहोरात्रो दिनं॥
अनुष्ठेयं कर्मापि द्विविधं अहोरात्रसाध्यं दिनसाध्यं चेति॥ उपवासैकभक्तादिकमहो
रात्रसाध्यं॥ यद्यप्यल्पकालनिष्पाद्यं भोजनमेकभक्तादेः स्वरूपं तथापि तस्मिन्नहो ॥शिव॥

॥१४५॥

रात्रे भोजनांतरस्यैकभक्तादिनियमघातित्वे तयोर्भोजनांतरपरित्यागसहितस्यैव भोज
नस्य एकभक्तादिस्वरूपत्वादहोरात्रसाध्यत्वमविरुद्धं॥ दानव्रतश्राद्धेनामहन्येव क
र्तव्यतया दानादिकं दिनसाध्यं॥ तत्रोपवासादौ नाक्षत्राहोरात्रो ग्रहीतव्यः व्रतादौ तु नाक्षत्रं
दिनं ग्रहीतव्यं अहोरात्रस्य नाक्षत्रं सूर्यास्तमयकालेन नक्षत्रव्याप्त्या संपद्यते॥ दिनस्य
नाक्षत्रत्वं सूर्योदयव्याप्त्या भवतीति यद्यप्यस्मिन्नुदेति सवितेत्यत्र सूर्योदयकालेन नक्ष
त्रसद्भावमात्रं प्रतीयते॥ न तु परिणामविशेषः। तथापि त्रिमुहूर्तपरिणामसाम्यं तिथि
कृत्सत्वात्तदेवानुसंधेयं॥ ननु दानव्रतश्राद्धेपि नाक्षत्रदिनस्वीकारे प्रातःकालमात्रव्या
प्तिनक्षत्रेपि श्राद्धं प्रसज्येत॥ मैवं॥ अपराह्णस्य पार्वणश्राद्धकालत्वेन तद्व्याप्तेरपेक्षितत्वा
त्॥ तथा च स्मृतिः॥ नक्षत्रेण खंडेयेन व्याप्तः कालस्तु कर्मणः नक्षत्रकार्येष्वत्रैव तिथि
कर्म तथैव चेति॥ न चानेन न्यायेन एकभक्ते मध्याह्नव्यापिनक्षत्रं ग्राह्यमिति शंक
नीयं उपवासनक्षत्रस्यैवैकभक्ते प्रतिपदोक्तत्वात्॥ यदपि श्रुतिवचनं॥ तिथिर्नाम तिमो
भागस्तिथि कर्मसु पूजितः॥ ऋक्षाणां पूर्वभागस्तु ऋक्षकर्मसु पूज्यत इति तत्र

माध० ॥१४८॥

तिथ्यंतपूज्यत्वं दानव्रतविषयं॥ नक्षत्रपूर्वभागभपूज्यत्वमुपवासादिविषयं॥ उपवासा
दिव्यतिरिक्तेतु दैवे कर्मणि नक्षत्रस्याप्यंत्यभागे पूज्यत्वं द्रष्टव्यं॥ नक्षत्रविशेषेषु पूर्व
स्वरूपस्य लिंगस्य पूर्वेद्युर्निशीथमात्रव्याप्तिं प्रत्यसूचकत्वात्॥ यदि योगः पूर्वेद्युर्नि
शीथमात्रं व्याप्नुयात् तदा परेद्युरहनि पारणं न प्राप्नुयात् रात्रौ पारणस्य निषिद्धत्वा
त्॥ अतो हन्येव व्यतीपातांते पारणं ब्रुवद्वाक्यं पूर्वेद्युर्दिवसे सायंकालादियोगं प्रयो
जकं सूचयति तस्माद्विष्णुश्राद्धयोग उपवासादौ पूर्वविद्धो ग्रहीतव्यः दानव्रतयोरु
दयव्यापी ग्राह्यः॥ श्राद्धस्य तु कर्मकालव्यापीति निर्णेतव्यं॥ ॥इति नक्षत्रयोगनिर्ण
यः॥ ॥अथ करणं॥ बवबालवादिकरणानां तिथ्यर्धपरिमितत्वेन दिनद्वय॥ व्या
प्तित्वसंदेहो नास्ति तदुदये स्तमये वा यस्मिन् दिने करणसद्भावः तस्मिन्नेव दिने तत्क
र्मानुष्ठेयं यदा तु संध्यामारभ्य परेद्युरुदयात् प्रागेव प्रकरणं समाप्यते तदा कथमिति ॥त्रिव॥
चेत् भद्राकर्णन्यायेन सर्वकरणेषु निर्णय इति ब्रूमः॥ भद्राकरणे च न्यायो भविष्योत्त
रे भद्राव्रते पठ्यते॥ यस्मिन् दिने भवेद्भद्रा तस्मिन्नहनि भारत॥ उपवासस्य नियमं ॥१४८॥

तथा च वृद्धगार्ग्यः॥ पूर्णिमाप्रतिपत्संधौ राहुः संपूर्णमंडलं॥ ग्रसते चंद्रमर्कं वा दर्शप्रति
पदंतरे इति ब्रह्मसिद्धांते यावत्॥ कालः पार्वणी तेता वा प्रतिपदादिमः॥ रवींदुग्रहणं नेहा
संपूर्णे मिश्र वर्णाद्भवेदिति॥ अनेहा कालः॥ बाढं॥ अपद्यप्यस्ति संधूपजीवनं॥ तथा
पि निर्णेतव्यस्यांशस्य तिथिविषयत्वाभावत्॥ नास्मिन्प्रकरणे तद्योग्यं कर्तव्यविशेष
स्तु परिस्तने प्रकरणे निरूपयिष्यते॥ इति श्रीमाधवीये कालनिर्णये द्वितीया द्वितिथिनि
र्णयाख्यं चतुर्थप्रकरणं॥ ॥ तृतीयचतुर्थाभ्यां प्रकरणाभ्यां प्रतिपदाद्याः पंचद
श्यंताः सर्वास्तिथयो निर्णीताः॥ अथ प्रकीर्णकरूपे पंचमप्रकरणे नक्षत्रयोगादयः का
लविशेषेषु कर्तव्यविशेषाश्च संक्षेपेण निरूप्यंते॥ अत्रापि तिथिवत्संपूर्णनक्षत्रसंदे
हाभावात् खंडनक्षत्रे निर्णयोपेक्षते॥ स च निर्णयो दर्शितो विष्णुधर्मोत्तरे॥ उपोषित
व्यं नक्षत्रं यस्मिन्नस्तमियाद्रविः॥ युज्यते यत्र वा रात्रिर्निशीथे शशिना सहेति॥ अस्त
मययोगो मुख्यः कल्पः निशीथयोगोऽनुकल्पः योगद्वये सत्यनुष्ठानं प्रशस्तं॥ यदा पूर्वे
द्युः केवलो निशीथयोगः परेद्युः केवलोऽस्तमययोगः तदा मुख्यकल्पानुसारेण परेद्यो

कुर्यान्नारी नरोऽपि वा ॥ यदि रात्रौ भवेद्विष्टिरेकभक्तं दिनद्वये ॥ कार्यं तेनोपवासः स्या
द्विष्टिपौराणिको विधिः ॥ प्रहरस्योपरि यदा स्याद्विष्टिः प्रहरत्रयं ॥ उपवासस्तदा का
र्य एकभक्तं ततोऽन्यथेति ॥ सूर्योदयादारभ्य यावदस्तमयपर्यंतं विष्टिसत्तायां ना
स्त्युपवासे संदेहः यदा तु प्रहरमात्रं विष्टिर्नोस्तितस्योपरि प्रहरत्रयं विष्टिर्भवति तत्स
कृत्स्नं दिनं व्याप्तिभद्राया अभावेऽप्येकदेशव्याप्तेः सद्भावादुपवासोऽनुष्ठेयः ॥ अन्यथेत्य
नेन एकदेशव्याप्तेरप्यभावो विवक्षितः ॥ तस्मिन्पक्षे समनंतरतीतवचनोक्तं दिनद्व
येऽप्येकभक्तं कार्यं ॥ यस्तु भद्राव्रतं संकल्प्याहोरात्रमुपोषितं न तत्कुर्यात् असौ भद्रायुक्त
घटिकासु भोजनं परित्यजेत् तद्भद्रारहितकाले भुक्त्वाप्युपवासान्न हीयते ॥ तथा च भ
विष्योत्तरे पठ्यते ॥ स्नातः संपूज्य तामेवं ब्राह्मणांश्च स्वशक्तितः ॥ ततो भुंजीत राजेंद्र या
वद्भद्रा न जायते ॥ अथ वांतेऽपि भद्रायाः काम्यतो वाप्यतः शुचिः ॥ न किंचिद्भक्षयेत्तावद्या
वद्भद्रा प्रवर्तत इति ॥ अह्नश्चरमभागे यदा भद्राप्रवेशः तदानीमेकदेशे भद्रायोगतो
दिनस्य तद्युक्तत्वादशक्तस्य भद्राप्रवेशात्प्रागेव भो

माध०
॥१४७॥ द्व

जनेप्राप्तेसति॥अभुक्तेनपूजादेरनुष्ठेयत्वाद्भद्रारहितेपिकालेपूजादिकंनविरुध्यतेय
दानुभद्राया अंतेभुंक्तेतदाकर्मकालव्याप्तिशास्त्राक्षेपेतत्कालत्वेपूजादिकंकर्त्तव्यं॥
पक्षद्वयेपिभद्रायुक्तघटिकासुनकिंचिद्भक्षयेत्॥तावताभद्रोपवासःपूर्यते॥बवादिकर
णेषुकस्यापिविशेषस्यशास्त्रेणादृष्टत्वाद्भद्रायांकुसस्यन्यायस्यातिक्रमेकारणाभावाच्च
यंनिर्णयप्रकारःसर्वोपपियोजनीयः॥नवतिथिनीनांनक्षत्रयोगकरणानांपंचांगांतःपा
तिनांनिर्णयंकृत्वांतर्दतःपातियशास्त्रीयकर्मोपियोगीवारःकुतउपेक्ष्यत्यतइतिज्ञाकनी
यं॥अहोरात्रपरिमितत्वनियमेनवारेसंदेहाभावात्तदेवंनक्षत्रयोगकरणानिनिर्णी
तानि॥ ॥अथसंक्रांतिर्निर्णयते॥ ॥मेषादिषुद्वादशराशिषुक्रमेणसंचरतःसूर्ये
स्यपूर्वस्माद्राशेरुत्तरराशौसंक्रमणंप्रवेशःसंक्रांतिः॥अतस्तत्तद्राशिनामपुरस्सरेवा
संक्रांतिरितिव्यपदिश्यते॥राशयश्चमेषवृषभमिथुनकर्कटकसिंहकन्यातुलावृ ॥शिवा॥
श्चिकधनुर्मकरकुंभनामकास्तेषुद्वादशसुचत्वारित्रिकाणिसंभवंति॥तत्रैकैक
स्मिन्त्रिकेचरस्थिरद्विस्वभावास्त्रयोराशयः॥तथाचतुर्ष्वत्रिकेषुयेमध्यमावृषभसिं ॥१४७॥

माघ॰ ॥१४८॥

सौम्यर्के सूर्ये इति भ भ भराद्वान्योराशिः। स्थिरराशौ तो सूर्ये सति विष्णुपदं भवति॥
द्विस्वभावराशौ सूर्ये स्थिते सति षडशीतिमुखं भवति। तुलामेषद्वये सूर्ये स्थिते सति वि
षुवं भवति॥ सूर्ये कर्कटके दक्षिणायनं भवति। मृगे मकरसौम्यर्के सौम्यदिक्गमर्के
उत्तरायणं तेरेतेः संताभेदे नानायोऽप्यवधार्यं तेत द्वादशसंबंधा संक्रांतिनामपितान्येव ना
मानि। तासु बसंक्रांतिसुबसंक्रांतिषु होमस्नानादिकमन्वयव्यतिरेकरूपाभ्यां वचनाभ्यां
माहशातातपः। संक्रांतौ यानि दत्तानि हव्यकव्यानि दातृभिः। तानि नित्यं ददात्यर्कः पुनर्ज
न्मनि जन्मनि। रविसंक्रमणे पुण्ये न स्नायाद्यदि मानवः॥ स सप्तजन्मसु रोगी स्याद् दुः
खभागी हि जायते इति। स्नानदानाद्यंगभूते संक्रांतिकाले मुख्यकल्पस्यासंभवाद्दनु
कल्प एवादर्त्तव्यः॥ तदाह देवलः॥ संक्रांतिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः तद्योगा
द्धधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिता इति। दशाव्यवधानराहित्ये न अत्यंतसंश्लिष्टयोः
पूर्वोत्तरराश्योर्मध्ये सूर्यः पूर्वराशिं परित्यज्य यावता कालेनोत्तरराशिं प्रश ॥त्रि॰वा॰॥
तिसलेशायोगदृष्टिर्विना मांसदृष्ट्या दुर्भेक्ष्यः। अतोनुष्ठाने मुख्यसंक्रांतिकाला संभ
वात्तत्संक्रांतिसंबंधिनो ॥१४८॥

पूर्वोत्तरकाले ग्रहीतव्यौ। संक्रांतेः पूर्वोत्तरकालयोरेकैकस्मिन् त्रिंशद्घटिकाः पुण्या
इति सामान्येनोक्तं। तत्र विशेषमाह वृद्धवसिष्ठः॥ अतीतानागते पुण्ये द्वे उदग्दक्षिणा
यने। त्रिंशत्कर्कटके नाड्यो मकरे विंशतिः स्मृता इति। उदगयनमतीतं सत् पुण्यं च
भवति। दक्षिणायनमागतं पुण्यं त्रिंशदित्यादिना तदेव स्पष्टीक्रियते॥ कर्कटाख्या
द्दक्षिणायनात्प्राचीनास्त्रिंशत्घटिकाः पुण्याः मकराख्यादुत्तरायणादूर्ध्वकाली
ना विंशतिघटिकाः पुण्याः बृहस्पतिरपि। अयने विंशतिः पूर्वा मकरे विंशतिः परा॥
वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश इति। न चात्र त्रिंशत्घटिकादिना सामान्यन्य
वचने न विरोधः शंकनीयः सामान्यवचनस्याप्यतुलापरत्वात्। तद्विशेषवचनोक्तो
घटिकासंकोचत्वप्रदर्शनार्थत्वात्। या याः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृता
इति देवलेनोक्तत्वात्केनापि निमित्तेन सन्निहितघटिकास्वनुष्ठानासंभवे त्रिंशत्
घटिकाः परमावधित्वेनाभ्यनुज्ञायंते। षडशीतितोपि दीर्घकालमाह वसिष्ठः॥ ष
डशीत्यामतीतायां षष्टिरुक्तास्तु नाडिका इति॥ विष्णुपद्यां प्रशस्तकाले स एवाह॥ वि

माध०
॥१४९॥

सुपद्यां तु पुण्यायां प्राक्पश्चादपि षोडशेति ॥ ॥ संक्रान्तिनां पूर्वोत्तरकालौ निर्णीतौ ॥
ताश्च संक्रान्तयः कदाचिद्दिवा भवन्ति कदाचिद्रात्रौ तद्विदादनुष्ठानप्रदेशमाह वसिष्ठः ॥ अ
ह्नि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितं ॥ रात्रौ संक्रमणे भानोर्दिनार्धं स्नानदानयोः ॥ अ
र्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया ॥ ऊर्ध्वं संक्रमणे चार्ध्वमुदयात्प्रहरद्वयं ॥ पूर्णे
तथार्धरात्रे रात्रेर्यदा संक्रमते रविः ॥ प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ ॥ इति ॥ अ
ह्नि क्रियदा संक्रान्तिर्भवति तदा कृत्स्नस्याह्नः पुण्यत्वं विदधता वचनेन रात्रौ स्नानादि
कं प्रतिषिध्यते ॥ एवं सत्युदयानन्तरभाविनि दक्षिणायने पूर्वभागप्राशस्त्यं बाधित्वो
त्तरभागेनुष्ठानं भवति ॥ अस्तमयप्राचीनक्षणभाविन्युत्तरायणे चोत्तरभागप्र
शस्त्यं च बाधित्वा पूर्वभागेनुष्ठातव्यं उत्तरभागप्राशस्त्यविषये मध्याह्नादिसंक्रमण
विषयं तत्राहस्येव हेयोपादेययोः पूर्वोत्तरभागयोः संभवात् ॥ अनेन न्यायेन क
र्कटेपि मध्याह्नभाविनि पूर्वभागप्राशस्त्यं सार्थकं ॥ अस्तमयप्राचीनभाविषु षडशीति ॥ द्विव५
मुखेष्वपि उत्तरभागप्राशस्त्यं बाधित्वा मकरन्यायेन पूर्वभागप्राशस्त्यं बोधितव्यं ॥ उदया ॥१४९॥

हवृश्चिककुंभनामकाः स्थिरराशयश्चत्वारः तेषां विष्णुपदं नाम स्मृतिषु प्रसिद्धं ॥ ये
त्वितिमा मिथुनकन्याधनुर्मीननामकाः द्विस्वभावराशयः ते षडशीतिमुखसंज्ञकाः ॥
ये पुनः प्रथमा मेषकर्कटकतुलामकररूपाश्चरराशयस्तेषु मेषतुले विषुवसंज्ञके
कर्कटमकरावयनसंज्ञकौ ॥ तदेतत्सर्वं वृद्धवसिष्ठ आह ॥ अयने विषुवे द्वे च चत्वा
रः षडशीतयः ॥ चतस्रो विष्णुपद्यश्च संक्रान्त्यो द्वादश स्मृताः ॥ मेषकर्कटसंक्रान्ती द्वे तू
दग्दक्षिणायने ॥ विषुवे तु तुलामेषौ गोलमध्ये ततोपरः ॥ कन्यायां मिथुने मीने धनुष्य
पि रवेर्गतिः ॥ षडशीतिमुखं प्रोक्तं षडशीतिगुणैः फलैः ॥ वृषवृश्चिककुंभेषु सिंहे
चैव रवेर्गतिः ॥ एतद्विष्णुपदं नाम विषुवादधिकं फलं ॥ इति ॥ विषुवाभ्यामयनाभ्यां च युक्तौ रा
शी चक्रं गोल इत्यभिधीयते ॥ तत्र मेषाख्यस्य विषुवस्य कर्कटाख्यस्यायनस्य च मध्ये
विष्णुपदसंज्ञको वृषभः ॥ षडशीतिमुखसंज्ञकं मिथुनं तिष्ठति ॥ तथा च कर्कटाय
नस्य तुलाविषुवस्य च मध्ये सिंहे कन्ये स्थिते एवमन्यदप्युदाहार्यं यथोक्ते गोलबोध्या
हस्थिरभे विष्णुपदं षडशीतिमुखं द्विभमुखे ॥ तुलामेषे विषुवं चतुर्थे दक्षिणायनम्या

नंतराभाविषु मध्याह्नभाविषु वचनानां तराविरोधेनोत्तरएवानुष्ठानसंभवात्॥ तद्विरुद्ध
पूर्वभागप्राशस्त्यं नविधीयते॥ उभयभागप्राशस्त्योपेतेषु विषुवद्विष्णुपदेषु मध्या
ह्नभाविषु पूर्वमुत्तरत्र वानुष्ठातव्यं॥ उदयानंतरभाविषु पूर्वप्राशस्त्यं बाध्यते॥
अस्तमयप्राक्कालीनेषु उत्तरभागप्राशस्त्यं बाध्यत इति विवेकः॥ एतद्वचनानुसारेण
यस्यैव स्पर्शवचनेस्य यस्मिन्यत्र भागेनुष्ठानं तस्मिन्नेव भागे व्यवहिता नाड्यः पुण्याः
दुपत्संनिहिताः॥ अत्यंतसंनिहिताः पुण्यतमा दृष्टव्याः॥ यदा रात्रौ रवेः संक्रमणं भव
ति तदा सर्वरात्रेः पूर्वस्योत्तरस्य वा दिनस्यार्धप्रहरद्वयं स्नानदानयोः पुण्यं॥ कुत्र पूर्वदि
नं कुत्रोत्तरदिनमिति विवक्षायां तदुभयधर्मरात्रादित्यनेन वचनेन व्यवस्थाप्यते॥
रात्रेरर्धं अर्धरात्रं द्वितीयप्रहरस्य चरमघटिका तृतीयप्रहरस्य प्रथमघटिका
तस्मादर्धरात्रादित्यनेन संक्रमणे सति पूर्वदिनमध्याह्नस्योपरि प्रहरद्वये क्रि
या कार्या॥ अर्धरात्रादूर्ध्वं संक्रमणे सति उत्तरकाले उदयादूर्ध्वं प्रहरद्वयं पुण्यं॥

माध०

॥१५०॥

पूर्वार्धरात्रे यथोक्तघटिकाद्वये संक्रांतो पूर्वोत्तरदिनद्वयं कृत्स्नं पुण्यं ॥ तदुक्तं भविष्योत्तरपुरा
णे ॥ संक्रमस्तु निशीथे स्यात् षड्यामाः पूर्वपश्चिमाः संक्रांतिकालो विज्ञेयस्तत्र दानादि
कं चरेत् ॥ अत्रेयं व्यवस्था अर्धरात्रे यदा षडशीतिः स्यात् तदानीमेतद्वचनानुसारेण
पूर्वोत्तरदिनद्वयस्य पुण्यत्वात् यद्यप्यैच्छिको विकल्पः प्राप्नोति तथाप्युत्तरदिने प्रा
शस्त्यप्रतिपादकप्रातिस्विकवचनानुग्रहलाभात्तत्रैवानुष्ठातव्यं ॥ विषुवयोर्विष्णु
पदेषु च प्रातिस्विकवचनानां न नियामकं ॥ तस्य वचनस्य पूर्वोत्तरभागयोः साम्येन
प्राशस्त्यप्रतिपादकत्वात् ॥ प्रकृतवचनेन पूर्वोत्तरदिने साम्येन विधत्ते ॥ तस्मात् पूर्व
स्मिन्नुत्तरस्मिन्वा स्वेच्छयानुष्ठानमिति विकल्पते ॥ अनयोस्तु प्रकारांतरं वक्ष्यते ॥
अयनव्यतिरिक्तासु दशसु संक्रांतिषु मध्यरात्रादूर्ध्वं प्रवृत्तासु परेद्युरनुष्ठानमि
त्यत्र न कोपि संदेहः ॥ अर्धरात्रात्पूर्वं प्रवृत्तासु तासु दशसु मध्ये षडशीतिव्यतिरि
क्तानां षण्णां पूर्वदिनेनुष्ठानमित्यत्रापि नास्ति संदेहः ॥ षडशीत्यां तु प्रकृतवचनेन

॥शिव५

॥१५०॥

माध०
॥१५९१॥

त्तिप्रसक्तिसंभवात् सूर्यइवदिवसेति भास्करशब्देन त्वयः तस्यापि मासं प्रति अधिकरणका
रत्वात्॥ तस्मिन् भास्करे दिवसे विषमानं प्रमाणं प्रहरचतुष्टयं तस्यार्धं प्रहरद्वयं आदि
त्यास्तमये स्यापरितम आगामि सूर्योदयात् प्राचीनः कालो रात्रिः उदयस्यापि येस्तमया
त्प्राचीनः कालो दिनं उदयास्तमयकालो संधिरूपतया पूर्वोक्तयो रात्रिदिवसायोः पृ
थगित्येकोरेखामात्रस्यापि सूर्यमंडलांशस्य दृश्यमानतया दिवसांतःपातित्वात् विस्त
रे सर्वथापि रात्रौ तयोरनंतर्भावः॥ सा च रात्रिस्त्रेधाभिधीयते॥ मध्यवर्त्तिघटिकाद्वय
मेको भागः तस्मात् पूर्वोत्तरौ द्वौ भागौ॥ तत्र पूर्वभागे संपूर्णे अर्धरात्रे इत्यनेन विवक्षितेत
स्मिन् यदा संक्रांतिः तदानीं भाविसूर्योदयासमयं प्रत्यासन्नं यत्पूर्वदिनस्योत्तरा
र्धं तत्पुण्यं॥ अपूर्णे शर्वरीदल इत्यनेनार्धरात्रानंतरभागि रात्रिभागो विवक्षितः॥
पूर्वोत्तरयोर्निशादलयोरेकस्या घटिकाया अर्धरात्रकालार्थं पृथक्कृत्वा तत्र संपूर्णे
रित्यवगंतव्यः॥ तस्मिन् घटिकासूनपरभागे यदा संक्रांतिस्तदानीं भाविसूर्योदयप्र
त्यासन्नं दिनार्धं पुण्यं॥ अयमेवार्थो द्वितीयश्लोके प्रपञ्च्यते॥ घटिकोऽन्यूना संपूर्णेषु ॥शिव॥

॥१५९२॥

र्धरात्रे पूर्वभागे यदा संक्रमणं भवति तदा यद्यपि दिवा संक्रमणं अनागतं तथापि त
स्या दिवसस्योत्तरार्धं पुण्यं॥ संपूर्णे र्धरात्रे घटिकाद्वयात्मिके निशीथे संक्रमणं भवत्
तदानीं पूर्वोत्तरयोरुभयोर्दिनयोः पुण्यं ज्ञेयं॥ अतिरिक्ते परभागे संक्रांतौ परेह्नि पू
र्वार्धं पुण्यं॥ आसन्नसंक्रमं पुण्यं दिनार्धं स्नानदानयोः॥ रात्रौ संक्रमणे भानो विषुवत्स
यने दिवे वेति॥ रात्रौ भानोः संक्रमणे विषुवन्नामके जाते सति संक्रमणप्रत्यासन्ने दिनो
र्धं पुण्यं॥ पूर्वरात्रसंक्रमणे पूर्वदिनस्योत्तरार्धं पुण्यं॥ अपररात्रसंक्रमणे अपरदिन
स्यार्धमित्यवगंतव्यं॥ अयनं नामके भानोः संक्रमणे दिवा जाते यथायोगं दिनार्धपु
ण्यं द्रष्टव्यं॥ कर्कटके पूर्वार्धपुण्यं मकरे तूत्तरार्धं॥ एतच्च मध्यंदिनायनविषयं॥ उद
यास्तमयप्रत्यासन्ने त्वयने पूर्वोत्तरभागप्राप्तस्य बाधया कृत्स्नदिवसपुण्यत्वनिर्णयः
पूर्वमेवोक्तः॥ अयनव्यतिरिक्तेषु द्वादशसु संक्रमणेषु रात्रिगतेषु यो निर्णयः॥ तत्सर्वमप्युद
सितु तद्वचनत्रोषं॥ मुक्त्वा मकरकर्कटौ विषुवति वलीति॥ यथासन्निहिता नाड्यस्तास्ताः
सामान्यवचनेन सर्वेषु रात्रिसंक्रमणेषु रात्रावे
पुण्यतमाः स्मृताः॥ इत्युक्तत्वेन

माघ०

॥१५२॥

वानुष्ठानप्रसक्तं तदपोद्य दर्शासु संक्रांतिषु दिवानुष्ठानं विधाय मकरकर्कटयोस्तत्पर्युदासे सति
पूर्वप्रसक्तं रात्र्यनुष्ठानमेव पर्यवस्यति एवं च सति रात्रौ संक्रांतिस्नानमभ्युपगच्छतो याज्ञ
वल्क्यवचनस्यापि कश्चिद्विषयः संपद्यते ॥ तथा च याज्ञवल्क्यः राहुदर्शनसंक्रांतिविवा
हात्ययवृद्धिषु ॥ स्नानदानादिकं कार्यं निशि काम्यव्रतेषु चेति । सुमंतुरपि । रात्रौ स्नानं न कुर्वी
त दानं चैव विशेषतः ॥ नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रिषु ॥ यस्ते विवाहे यात्रायां । यात्तथै
वोत्सवं वाचने स्ते तानि शस्तानि रात्रौ ॥ देवलोपि । ग्रहणोद्वाहसंक्रांतियात्रार्थे प्रसवेषु च ॥
श्रवणे चेतिहासस्य रात्रौ दानं प्रशस्यत इति ॥ ननु यैः पयोक्तपर्युदासानुगृहीतैः पुण्या
तमत्वादिवदेव लयाज्ञवल्क्यसुमंतुवचनैर्मकरकर्कटयोर्निश्यनुष्ठानप्रापणं शास्त्रोत्तर
विरुद्धं ॥ तथा च भविष्योत्तरे । मिथुनात्कर्कसंक्रांतिर्यदि स्यादंशुमालिनः ॥ प्रभाते
वा निशीथे वा कुर्यादहनि पूर्वतः ॥ कार्मुकं तु परित्यज्य झषं संक्रमते रविः ॥ प्रदोषे वा
र्धरात्रे वा स्नानं दानं परेहनि इति वृद्धगार्ग्योपि । यदास्तमयवेलायां मकरं याति भा
स्करः ॥ प्रदोषे वार्धरात्रे वा स्नानं दानं परेहनीति । अर्धरात्रे तदूर्ध्वं या संक्रांतो दक्षिणाय ॥शि का॥

॥१५२॥

पूर्वेद्युरनुष्ठानं प्राप्तं ॥ षष्टिघटिकाप्राक्त्वस्य प्रतिपादकप्रातिस्विककवचनेन परेद्युः
प्राप्नोति अतः संदेहे सति पूर्वेद्युरनुष्ठानमिति । द्रष्टव्यो निर्णयः ॥ कुतः ॥ विष्णुप
यां धनुर्मकरे तु कन्यावैयदा ॥ पूर्वोत्तरगतं रात्रौ भानोः संक्रमणं भवेत् ॥ पूर्वा
ह्णे पंचनाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः ॥ अपराह्णे तु पंचैव वक्ष्यंते स्मात्तेव क्रमेणा
ह्णु हु पूर्वभागगतं विष्णुपदीष उत्तीति संक्रमणं भवेत्तदा पूर्वपराह्णु
ति सृजेः ॥ यदा रात्रौ पूर्वभागगते संक्रमणे परेद्युः पूर्वाह्णे पंचनाड्यः पुण्याः ॥ तथैव
पंचनाड्यः पुण्याः उत्तरभागगते संक्रमणे परेद्युः पूर्वाह्णे पंचनाड्यः पुण्याः ॥ तथैव
पंचनाड्यः पुण्याः उत्तरभागगते संक्रमे पंचनोर्ध्व कावचने पुण्यातिशयस्य विव
सति प्रहरद्वयं पुण्यत्वविरोध इति वाच्यं ॥ पंचनोर्ध्व कावचने पुण्यातिशयस्य विव
क्षितत्वात् । अतः प्रहरद्वयवाक्ये पुण्यमात्राभिप्रायं । एतस्मिन्न विषये देवीपुराणे
परठ्यते ॥ असंपूर्णे धरात्रे च उदयास्तमयेपि च ॥ मानार्धं भास्करे पुण्यमपूर्णे
वरीदले । अर्धरात्रे त्वसंपूर्णे द्विवापुण्यमनागतं ॥ संपूर्णे मुभयोर्हीपयमपि
केपरेहनीति । अत्र भास्करशब्देन सूर्ययुक्ते दिनमुपलक्ष्यते ॥ यद्वा भास्कर
शब्देन सूर्ये रूढः किंतु भासं करोतीप

ते॥ पूर्वमेव दिनं यावत्स यावन्नोदयते रविरिति। मैवं॥ भविष्योत्तरे वक्ष्यमाणवच
नेषु रात्र्यनुष्ठानप्रतिषेधस्याप्रतीतेर्दिवानुष्ठानविरोधे नैवार्थाद्रात्र्यनुष्ठानप्रतिषे
धकल्पने पर्युदासानुगृहीतवचनेनानामानर्थक्यं प्राप्नोति॥ तस्माच्छास्त्रद्वयेन वि
कल्पप्राप्तौ तत्र देशप्रसिद्धिशिष्टाचारेणाव्यवस्था द्रष्टव्या॥ ॥यथोक्तानां द्वादशसंक्रांती
नां यथोक्तेषु पुण्यकालेषु मंदामंदादिसंज्ञोपजीवनेन कश्चिद्विशेषो भवतिसवि
शेषो देवीपुराणे दर्शितः। द्वादशैकसमाख्याताः समासंक्रांतिकल्पनाः॥ सप्तधा तु प्रबो
धव्याएकैकैव यथा शृणु॥ मंदा मंदाकिनी ध्वांक्षा घोरा चैव महोदरी॥ राक्षसी च मिश्रि
ता प्रोक्ता संक्रांतिः सप्तधा नृप। मंदा ध्रुवेषु विज्ञेया मृदौ मंदाकिनी तथा। क्षिप्रे ध्वांक्षे
ति जानीयादुग्रे घोरा प्रकीर्तिता॥ चरे महोदरी ज्ञेया क्रूरऋक्षे तु राक्षसी। मिश्रिता चैव
विज्ञेया मिश्रे ऋक्षे तु संक्रमो। द्विचतुःपंचसप्तदनवद्वादश एव च। क्रमेण प [illegible] ताद्युता
स्तसंपुण्यं पारमार्थिकमिति। अत्र समारूढः संवत्सरवाची समासंधिन्यः संक्रांतिकल्पना

माध० मेषादिमीनांता द्वादशैव समाख्याताः॥ तासु द्वादशसु संक्रांतिषु एकैकामंदाभिः सप्तभिः स
प्तभिर्नामभिर्विविच्य व्यवहार्या॥ तानि च नामानि नक्षत्रविशेषोपजीवनेन प्रवृत्तानि॥ तद्यथा॥ ध्रु
॥१५३॥ वेषु नक्षत्रेषु प्रारब्धसंक्रांतिर्मंदा॥ एवमेव मृदुक्षिप्रादिषु प्रारब्धा संक्रांतिः क्रमेण मंदा नंदि
नी ध्वांक्ष्यादिनाम भाग्भवति॥ रोहिण्युत्तरात्रयं चेत्येतानि चत्वारि नक्षत्राणि ध्रुवाणि॥
रेवती चित्रानुराधा मृगशीर्षाणि चत्वारि मृदूनि॥ हस्ताश्विनी पुष्याभिजिन्नक्षत्राणि चत्वा
रि क्षिप्राणि॥ भरणी पूर्वात्रयं मघा॥ घा चेत्येतानि पंचोग्राणि॥ श्रवणपुनर्वसुस्वातिशतभिषध
निष्ठाख्यास्ताख्यानि पंच चराणि॥ आश्लेषा मूलार्द्राज्येष्ठाख्यानि चत्वारि क्रूराणि॥ कृत्तिका
विशाखाख्यानि मिश्राणि॥ सेयं सप्तधा नक्षत्रव्यवस्था ज्योतिर्ग्रंथेषु मुहूर्तसारे पठिता॥ क्षि
प्रध्रुवस्थिरमृदूग्रचरदारुणाः सप्तभेदाः प्रकीर्तिताः॥ करादित्वनी वाक्यानि भतथाभिजिल्लघूनि पु
ष्यानि मतानि विभूषणेऽहिरण्यगभाधिपश्रुतरात्रयं ध्रुवाख्यमेतद्धि दधीत चायुना॥ म्रतेभर ॥त्रिव॥
ण्यासहपूर्विकात्रयं मघान्वितं मघानयोग्राख्यमिदं ध्रुवपंचकं॥ भुजंगभं ... क्रूरनमेन्द्राभिं
द्रभं भवति तानि क्षणानि तासर्वदा॥ चरापंचकं श्रवणः पुनर्वसुर्जलेशभवासवमानिलं तथा॥ मृदु ॥१५३॥

दानं तथा जपं॥ यः करोति च पुण्यात्मा तस्यास्याद्क्षयं च तत्॥ अयने विषुवे चैव चंद्रसूर्य
ग्रहे तथा॥ कृतोपवासः सुस्नातः सर्वैः पापैः प्रमुच्यत इति वसिष्ठोपि॥ उपोष्यैव तु संक्रांत्यां
स्नातो योभ्यर्च्य यद्धरिं॥ प्रातः पंचोपचारेण सकाम्यं फलमश्नुते॥ अयने विषुवे चैव त्रि
रात्रोपोषितो नरः॥ स्नात्वा यः पूजयेद्देवं सर्वान् कामानवाप्नुयात्॥ सप्तोपोष्य रवेर्वाराना
दौ स्नात्वा तु संक्रमे॥ अर्कमभ्यर्च्य चैव यस्तु सो दुःखी सुखमश्नुते॥ शातातपः॥ अयनादौ
सदा देयं द्रव्यं नित्यं यदिष्टं च यत्॥ षडशीतिमुखे चैव विमोक्षे च द्रसूर्ययोरिति॥ उक्तस्य स्ना
नादिकर्तव्यस्य संक्रांतिविशेषमुपजीव्य कालविशेषमाह शातातपः कुर्यात्सप्तयनेम
ध्ये विष्णुपद्यां विषुवति॥ षडशीत्यामत्यभागे स्नानादिनाविधिरिति॥ गालवोपि॥ मध्ये
विषुवति दानं दक्षिणायने विष्णुपदे चादौ॥ षडशीतिमुखे तेन तथोदगयने च भूरि
फलं स्यादिति॥ अयनादिषु यत्र यावान् पुण्यकालः पूर्वं निर्णीतस्तत्र तावंतं कालं त्रेधा वि
भज्य मध्ये विष्णुपद्यादिषु वगंतव्यं तस्मिन्नपि मध्यभागे सन्निहितनाडीनां प्रवेदिह ॥श्रीय॥ ॥१५४॥

हि तद्वचनेन पुण्यतमत्वं द्रष्टव्यं॥ संक्रांतिषु फलमाह भरद्वाजः॥ षडशीत्यां तु
यद्दानं यद्दानं विषुवद्द्वये॥ दृश्यते सागरस्यांतस्यांतो नैव दृश्यत इति वृद्धवसिष्ठः॥
अयने कोटिपुण्यं च सहस्रं विषुवे फलं॥ षडशीत्यां सहस्रं तु फलं विष्णुपदे तु चेति॥
मेषादिसंक्रांतयो यस्मिन् दिने भवति तस्माद्दिनात्पूर्वेभ्य एकादशादिनेभ्यः प्राचीने दि
ने मेषायनं वृषभायनमित्येवं तत्र तत्संक्रांतिनामांकितमयनं भवति तस्मिन्नयने
स्नानादिषु पुण्यकालमाह जाबालिः॥ संक्रांतिषु यथा कालस्तदीयेष्वयने तथा॥ अयने
विंशतिः पूर्वा मकरे विंशतिः परा इति॥ मकरव्यतिरिक्तैकादशसंक्रांतिसंबंधिष्वयने
षु तत्संक्रांतिवत्पुण्यकालोवगंतव्यः॥ मकरसंक्रांतिसंबंधिन्ययने संक्रांतिवैलक्ष
ण्यं॥ तद्यथा॥ मकरायने प्राचीना घटिकाः पुण्याः मकरसंक्रांतौ तु आद्या विंशतिघ
टिकाः पुण्याः॥ न केवलमादित्यस्यैव संक्रमायतने पुण्यः कालः किंतु सर्वेषामपि ग्र
हाणां नक्षत्रराशिसंक्रमपुण्यकालो भवति॥ तदुक्तं ज्योतिःशास्त्रे नक्षत्रराश्यो
रविसंक्रमे स्युरर्वाक्परस्ताद्द्वरनंदुनाड्यः पुण्यास्तथैं

माघ०
१९५५

द्वेस्त्रिंशत्पले पुण्ये प्रोक्ते च नाडि मुनिभिः शुभोक्ता। कुजस्य बुधस्यातिस्त्रः फल विद्वद्युक्ताः।
अध्यर्धनाड्यः पलसप्तयुक्ता गुरोश्चतस्रः सपला शुक्रेः॥ द्विनागनाड्यः पलसप्तयुक्ताः शना
नैश्चरस्याभिहितास्तु पुण्याः॥ आद्यंतमध्ये जप होम दानं कुर्वन्न वाप्नोति सुरेंद्रधानीमि
ति। अयमर्थः॥ आदित्यस्य राशि नक्षत्र गमने अर्वाक्परतश्च षोडश घटिका कालः पुण्य
कालः॥ तथा चंद्रस्यापि घटिकैकापलानि त्रयोदश अर्वाक्परतश्च पुण्यकालः एवं मंग
लस्यापि घटिकाश्चतस्रः पुण्यकालः पदमेकं च॥ तथा बुधस्यातिस्रो घटिकाश्चतुर्दशपला
नि पुण्यकालः बृहस्पतेरपि सार्धं चतस्रो घटिकाः सप्तपलानि पुण्यकालः शुक्रस्य
चतस्रो घटिकाः पलमेकं च पुण्यकालः। शनैश्चरस्यापि षडशीति घटिकाः पलानि सप्त च
पुण्यकाल इति। स्कांदे नागरखंडे। एकांते लेमया प्रोक्ताः कालाः संक्रांतिपूर्वकाः॥ नैतेषु वि
द्यते विप्र यतस्था संततिः॥ अश्रद्धयापि यद्दत्तं कुपात्रेभ्योपि भानवे॥ अकालेपि हितं सर्वं
नित्यमक्षयतां तां व्रजेत् क्षितौ। इति संक्रांतिनिर्णयः॥ अथ ग्रहणनिर्णयः पले॥ तत्र वृद्ध ॥शिव॥
गार्ग्यः॥ पूर्णिमा प्रतिपत्संधौ राहुः संपूर्णमंडलं॥ ग्रसते चंद्रमर्कं च दर्शप्रतिपदंतरेति। त ॥१९५५॥

द्विनिपोऽसं सुख वर्धकीश्वरं तथानुराधामतरात्रिमदैवतं॥ हुताशान क्षेण सहद्विदैवं मुहूर्तां
तिसाधारणासेहमस्मिन्निति। यथोक्तनक्षत्र विशेषोपादाने न प्रवृत्ते मंदादिभिः सप्त
नामभिः युक्ता यां मेषसंक्रमेण। द्विचतुरित्यादि सप्त संख्यानाड्य इति यत्तत्र पुण्यं तत्र
नास्ति संदेहः। इत्यस्मिन्नर्थे पारमार्थिक राद्धः प्रयुक्ते मंदायां प्रत्यासन्न घटिका द्वयं
पुण्यं॥ मंदाकिन्यां घटिकाचतुष्टयं॥ ध्वांक्ष्यां पंचकं॥ घोरायां सप्तकं॥ महोदर्यामष्टकं॥
राक्षस्यां नवकं। मिश्रितायां द्वादशकं। मेषसंक्रांतानुदाहृतः सायं प्रकारो वृषभादिष्वे
कादशासु संक्रांतिष्वनुसंधेयः। देवीपुराणोदाहरणात्। प्राचीनेन तत्संक्रांतिषु यः
पुण्यकालो निराइतः तस्मिन्काले देवीपुराणोक्तो द्विज चतुरित्यादिकः पुण्यातिशय
प्रतिपादको विशेषो द्रष्टव्यः। निर्णीतेषु संक्रांति पुण्यकालेषु यत्कर्तव्यं स्नानदाना
दिकं तत्सर्वं शातातपवचन द्वयेनोदाहृतं॥ ब्रह्मपुराणेपि नित्यं दयो रयनयोस्तथा
विषुवयोर्द्वयोः॥ चंद्रार्कयोर्ग्रहणयोर्व्यतीपातेषु सर्वेषु। अहोरात्रे षितः स्नानम र्घ्यं

त्रपर्वणोंतिमो भागस्पर्शकालः॥ प्रतिपदआद्यो भागो मोक्षकालः॥ तदुक्तंब्रह्मसि
द्धांते॥ यावत्कालः पर्वणोंते तावत्प्रतिपदादिमः॥ रवींदुग्रहणानेहा संपूर्णामिति
णांदुवेक्षितिग्रहणानेहाग्रहणकालः॥ तत्र कर्तव्यमाह॥ वृद्धवसिष्ठः॥ गंगातोयेतु
संप्रासेइंदोः को॥ टिरवेर्दश॥ गवां कोटिप्रदानेन सम्यग्दत्तेन यत्फलं॥ गंगास्नानेन तत्फ
लं स्याद्राहुग्रहस्ते निशाकरे पुनस्तत्र दशसंख्यमुदाहृतमिति॥ अस्य श्लोकद्वयस्य
प्रथमार्धमपेक्षितपदाध्याहारेणा योजनीयं॥ इंदोर्ग्रहणे संप्राप्ते संक्रि॥ गंगातोये अ
वगाहनं गोदानकोटिसंभवति॥ रवेर्ग्रहणे ततो दशगुणं फलं॥ अयमेवार्थ उपरितने
नार्धेनायेण स्पष्टीकृतः॥ व्यासो पि॥ इंदोर्लक्षगुणं ततः॥ गंगातोये संप्रासे इंदोः को
टिरवेर्दश॥ गवां कोटिसहस्रस्य यत्फलं लभते नरः॥ तत्फलं ताद्दशी स्नाने राहुग्रस्ते
निशाकरे॥ दिवाकरे तु स्नातस्य दशसंख्यमुदाहृतं॥ चंद्रसूर्यग्रहे चैव गाहेत जाह्नवी॥
सस्नातः सर्वतीर्थेषु किमर्थमटते महीं॥ गंगाव्यतिरिक्तमहानदीतोयेत्वत्र लक्षगु
णत्वं॥ गंगातोये तु कोटिगुण दशकोटिगुणत्वं॥ ब्रह्मपुराणेति॥ तिस्रो नद्यो महापु

माध०
॥१५६॥

एषा गोदा च जाह्नवी ॥ गौ हरीशांघ्रिका सा गंगा गा इति ह कीर्त्यते हि ॥ श्रीश्च ईशश्च हरीशौ ॥ अंघ्रिः
पादः ॥ अंघ्रिश्च अंकश्च अंघ्रिकं हरीशयोः अंघ्रिकं हरीशांघ्रिकं हरेः पादादीशस्य च शिरस
श्च गां भूमिं प्राप्ता गंगा ॥ यद्यपि जाह्नव्येव तावद्दीशानुगोदावेण ॥ तथा पिछत्रिलोग
छंतीति न्यायेन जाह्नव्या सहनिस्यव्ययोस्तयोरपि गंगात्वमविरुद्धं ॥ यद्यपि जाह्नवीज
लामेव केनचिन्निमित्तेन ब्रह्मा गिरिशायुगिरयोरुद्धृतमिति कृत्वा तयोरपि मुख्यमेव गं
गात्वासु गंगासु स्नानं मुख्यं तदसंभवेन द्यंरषु स्नायते ॥ तदुक्तं महाभारते गंगास्नानं
प्रकुर्वन्न गृहणे चंद्रसूर्ययोः ॥ महानदीषु चान्यासु स्नानं कुर्याद्यथाविधीति ॥ मह
नद्यो ब्रह्मपुराणे प्रदर्शिताः ॥ भागीरथी नर्मदा च कालिंदी च सरस्वती ॥ विशोका च वि
तस्ता च गौतमी कृष्णवेणिका ॥ तुंगभद्रा भीमरथी तापी वैव पयोष्णिका ॥ द्वादशैता पूता
महानद्यः पापिनः पावयंतिया ॥ तदुक्तं ब्रह्माण्डपुराणे ॥ एकयोजनादिद्वयष्टयोजन ॥श्री व॥
गाताः सरितः कुल्यास्ततो द्वादशयोजनं ताः अल्पनद्यस्ततस्तु चतुर्विंशतिगोतान
द्यः ॥ चतुर्विंशतियोजनाधिका महानद्यः समुद्रगाश्च महानद्यः यत्र महानद्यः यत्रम ॥१५६॥

माध०
॥१५७॥

मिश्रकमुधृता पुण्यं ततः प्रस्रवणोदकं ॥ ततो पिसारसं पुण्यं ततः पुण्यं नदीजलं ॥ तीर्थतो
यं तथः ततः पुण्यं महानद्यं बुधायनं ॥ ततस्तेभ्योपि गंगाद्यं पुण्यं पुण्यं ततो बुधैरिति ॥ मास
विशेषेण नदीविशेषो देवीपुराणे दर्शितः ॥ कार्तिके ग्रहणं श्रेष्ठं गंगायमुनसंगमे ॥ मा
र्गे तु ग्रहणं प्रोक्तं देविकायां महामुने ॥ पौषे तु नर्मदा पुण्या माघे संनिहिता शुभा ॥ फा
ल्गुने वरुणा पुण्या चैत्रेषु पुण्या सरस्वती ॥ वैशाखे तु महापुण्या चंद्रभागे तु गंडकी ॥
आश्विने सरयूः पुण्या तथा पुण्या तु नर्मदेति ॥ ग्रहणविशेषेण नदीविशेषा पुस्तत्रैवाभि
हितः ॥ गोदावरी महापुण्या चंद्रराहुसमन्विते ॥ सूर्ये च राहुणा ग्रस्ते तमोभूते महा
मुने ॥ नर्मदातोयसंस्पर्शे कृतकृत्या भवंति हि स्मानवतस्मरणादिष्टपि पुण्यमाह ॥ स्म
रणात् क्रतुफलं दृष्ट्वा क्रतुसहस्रजं ॥ स्पृष्ट्वा गोमेधपुण्यं तु पीत्वा सौत्रामणीं लभेत् ॥
स्नात्वा वाजिमखे चैवं पुण्यं प्राप्नुयाद्विचारतः ॥ रविचंद्रोपरागे च अयने चोत्तरे तथेति ॥ क्षे
त्रविशेषानाह ॥ गंगा कनखले पुण्या प्रयागः पुष्करं गया ॥ कुरुक्षेत्रं तथा पुण्यं राहुग्रस्ते ॥शिव॥
दिवाकर इति ॥ ग्रहणे श्राद्धं विहितं लिंगपुराणे व्यतीपाते क्षयाया रात्रौ चंद्रसूर्यग्रह ॥१५७॥

क्षणे ॥ गजच्छायां तु सौ प्रोक्तास्विति तत्र दत्तमक्षयमिति ॥ महाभारतेपि ॥ सर्वस्वेनापि
कर्तव्यं श्राद्धं वै राहुदर्शने ॥ अकुर्वाणस्तु नास्तिक्यात् पंके गौरिव सीदतीति ॥ ऋष्यशृंगो
पि ॥ चंद्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत् ॥ तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे इति ॥
विष्णुरपि ॥ राहुदर्शने दत्तं हि श्राद्धमाचंद्रतारकं ॥ गुणवत्सर्वकामीयं पितॄणामुपतिष्ठत इति ॥
शातातपः ॥ स्नानं दानं तपः श्राद्धमनंतं राहुदर्शने ॥ आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्जये
दिति ॥ देवलः ॥ यथा स्नानं च दानं च सूर्यस्य चैव ग्रहणोदये ॥ वा ॥ सोमस्यापि तथा रात्रौ स्ना
नं दानं विधीयत इति ॥ श्राद्धप्रकृत्य कूर्मपुराणे ॥ नैमित्तिकं तु कर्तव्यं ग्रहणे चंद्रसूर्ययोः ॥
बांधवानां च मरणे नारकी स्यादन्यथा ॥ काम्यानि चैव श्राद्धानि शस्यंते ग्रहणादिषु इति ॥
वारविशेषयोगे कालातिशयमाह व्यासः ॥ रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा ॥ चू
डामणिरिति ख्यातस्तत्र तत्र दत्तं महाफलं ॥ वारेष्वन्येषु यत्पुण्यं ग्रहणे चंद्रसूर्ययोः ॥
तत्पुण्यं कोटिगुणितं ग्रासे चूडामणौ मतमिति ॥ अतिथिप्राप्त्यादिवत् ग्रहणस्यापि श्रा
द्धकालत्वमाह मार्कंडेयः ॥ विशिष्टग्रहणे प्राप्ते सूर्येंदुग्रहणे दिने ॥ जन्मर्क्षे ग्रहपीडासु श्रा

माध०

॥१५८॥

श्राद्धं कुर्याद्यथेच्छयेति॥ अत्र यथेच्छयेति। अत्र श्राद्धं तु नान्नेन किं तु हेमादिना तदाह बौधायनः।
अन्नाभावे प्रवासे पुत्रजन्मनि। हेमश्राद्धं संग्रहे च कुर्याद्बुधः सदैव हीति॥ शातातपः॥ आ
पद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा॥ आमश्राद्धं द्विजो दद्यात्सदैव हीति। एतदेवाभिप्रे
त्य व्याघ्रपादः॥ स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके॥ श्रौतकर्म तात्काले स्नात्वा शुद्धि
मवाप्नुयादिति॥ यत्तु ग्रहणनिमित्तमाशौचं तत्स्नानेन निवर्त्तते॥ तदुक्तं ब्रह्मांडपुराणे॥ आ
शौचं मरणे नूनं ग्रहणे चंद्रसूर्ययोः॥ राहुस्पर्शेति यो स्नात्वा दानादौ कल्पते नर इति॥ ष
ट्त्रिंशन्मतेपि॥ सर्वेषामेव वर्णानां सूतके राहुदर्शने स्नात्वा कर्माणि कुर्वीत शृतमन्नं विव
र्जयेदिति॥ अथैतयोः स्नानं विहितं स्मृत्यंतरे॥ ग्रहसमाने भवेत्स्नानं ग्रस्ते होमो विधीयते॥ मुच्य
माने भवेद्दानं मुक्ते स्नानं विधीयत इति॥ होमदानदेवार्चनमपि स्नानद्वयमध्ये कार्यं॥ तदुक्तं वृद्ध
कैवर्ते॥ स्नानं स्यादुपरागादौ मध्ये होमः सुरार्चनमिति॥ तत्काले स्वापादिकं न कुर्यात्तदुक्तं नार
दीये॥ सूर्येंदुग्रहणं यावत्तावत्कुर्याज्जपादिकं॥ न स्वपेन्न च भुंजीत स्नात्वा भुंजीत मुक्तयोरिति॥ ॥द्वि०॥
मोक्षानंतरभावि यत्स्नानं तस्य शुध्यर्थतया तत्सचेलं विधीयते तदाह वृद्धवसिष्ठः॥ सर्वेषामेव ॥१५८॥

हानदीसंगमो स्नातीति महानद्यः॥ तथा च॥ गोदावरी भीमरथी तुंगभद्रा च वेणिका॥ तापी
पयोष्णी विंध्यस्य दक्षिणे तु प्रकीर्तिताः॥ भागीरथी नर्मदा च यमुना च सरस्वती॥ वि
शोका च वितस्ता च विंध्यस्योत्तरतः स्थिताः तथेति॥ महानद्यसंभवे कस्यां तत्राप्याह श
ख:॥ महानदीष्वप्यन्यासु तीर्थेष्वपि होदधौ गंगासमेत तटाकादौ स्नानं कुर्याद्यथावि
धि॥ तथा च॥ महानदीषु पूर्वोक्तासु तीर्थेषु ब्रह्मांडोक्तप्रभृतिषु महोदधौ समुद्रे॥ अ
न्यासु स्वल्पनद्यादिषु वा स्नानं कुर्यात्॥ तथा च॥ वापीकूपतटाकेषु गिरिप्रस्रवणेष्वपि वा॥ न
द्यां नदे देवखाते सरसीषूद्धृतांबुनि॥ उष्णोदके वा स्नायीत ग्रहणे चंद्रसूर्ययोरिति॥ ए
तत्सर्वमतिप्रत्याह व्यासः॥ सर्वं गंगासमं तोयं सर्वे ब्रह्मसमा द्विजाः॥ सर्वं भूमिसमं दा
नं ग्रहणे चंद्रसूर्ययोः॥ उष्णोदकस्य तु विषये व्याघ्रपाद आह॥ आदित्यकिरणैः पू
तं त्ववह्निना॥ अतो व्याध्याद्यातुरः स्नायाद्ग्रहणेप्युष्णवारिणेति॥ गंगातोयमारभ्यो
ष्णोदकं तेषूत्तरोत्तरस्यानुकल्पत्वमुक्तं॥ तैरेतदेवाभिप्रेत्योष्णोदकादिषु समुद्रजलांते
तेषूत्तरस्योत्तरस्य प्राशस्त्यमाह मार्कंडेयः॥ शीतमुष्णोदकात्पुण्यमपारक्यं परोदकात्॥ भू

वृर्णीनां त्रिभिर्नं राहुदर्शने ॥ सचैलं तु भवेत्स्नानं सूतकान्नं विवर्जयेदिति ॥ ग्रहणकाले तत्तत्पू
र्वं चाय सकृत् तत्सूतकान्नं तत्पश्चादपि न भुंजीत ॥ आदिमध्यावसानेषु यद्यद्धि हितं तत्स्यत्तस्य
फलातिशयमुक्तो ब्रह्मांडपुराणे ॥ उपमर्दे लक्षगुणं ग्रहणे चंद्रसूर्ययोः ॥ पुण्यं कोटिगुणं म
ध्ये मुक्तिकाले त्वनंतं तत्फलमिति ॥ अत्र ग्रहणे यद्दानं तत्सत्पात्रे कर्त्तव्यं ॥ तदुक्तं महाभारते ॥
अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः ॥ पात्रभूताय विप्राय भूमिं दद्यात्स दक्षिणामिति ॥ अ
त्र पात्रलक्षणमाह याज्ञवल्क्यः ॥ न विद्यया केवलया तपसा वापि पात्रता ॥ यत्र वृत्तमि
मे चोभे तद्धि पात्रं प्रकीर्तितमिति ॥ पात्रे मुख्यानुकल्पावाह बौधायनः ॥ श्रोत्रियो श्रोत्रियो
वापि पात्रं वापात्रमेव वा ॥ ५ स्वरधो वापि युक्तो विप्रो ग्रहणे दानमर्हतीति ॥ अत्र भूमिवद्वन्दी वा
न्यपि देयानि ॥ तदुक्तं महाभारते ॥ भूमिर्गावः सुवर्णं वा धान्यं वा यद्यदीप्सितं ॥ तत्सर्वं ग्रहणे
देयमात्मनः श्रेय इच्छतेति ॥ प्रतिग्रहीतृभेदेन फलतारतम्यं दक्षेणोक्तं ॥ सममब्राह्म
णे दानं द्विगुणं ब्राह्मणे धृते ॥ श्रोत्रिये शतसाहस्रं पात्रे त्वानंत्यमश्नुत इति ॥ अह्नि सूर्यग्रह
णे रात्रौ चंद्र ॥ ग्रहणे चेत्येवं प्रसिद्धिः सार्वजनीना ॥ तादृशग्रहणाय हर्तव्यं ॥ यत्तु कालविप

माध०

॥१५९॥

यसेन प्राप्यमाणं ज्योतिःशास्त्रप्रसिद्धं तत्र स्नानादिकं न कर्तव्यं ॥ तदुक्तं कौर्मे त्रैमासनिगमे ॥ सूर्यग्र
हो यदा रात्रौ दिवा चंद्रग्रहस्तथा ॥ तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति ॥ यस्मास्तमये ता
वलिराह ॥ संक्रांतौ पुण्यकालेषु षोडशोभयतः कलाः ॥ चंद्रसूर्योपरागे तु यावद्दर्शनगोचर इति
ग्रस्तस्यास्तमनपर्यंतं दर्शनगोचरत्वात्तावानपुण्यकालो भवति ॥ ग्रहणाभोजनमहं हे मे
त्यवस्थामाह मनुः ॥ चंद्रसूर्यग्रहे नाद्यादद्यात्स्नात्वा विमुक्तयोः ॥ अमुक्तयोरस्तगयोर्दृष्ट्वा स्ना
त्वापरेहनीति ॥ ग्रहे ग्रहणकाले स्पर्शमारभ्य मोक्षपर्यंतो ग्रहणकालः तस्मिन्काले न भुं
विमुक्तयोः जीत किंतु राहुणा चंद्रसूर्ययोः स तोः पश्चात्स्नात्वा भुंजीत ॥ यदा तु ग्रस्तास्तमयस्तदा परेद्यु
र्विमुक्ते तो दृष्ट्वा भुंजीत न केवलं ग्रहणकाले भोजनाभावः किंतु ग्रहणात्पूर्वमपि ॥ तदाह व्या
सः ॥ नाद्यात्सूर्यग्रहात्पूर्वमह्नि सायं शशिग्रहात् ॥ ग्रहकाले च नाश्नीयात्स्नात्वाश्नीयाच्च मुक्त
योः ॥ मुक्ते शशिनि भुंजीत यदि न स्यान्महानिशा ॥ अमुक्तयोरस्तगयोरद्यात् दृष्ट्वा परेहनी
ति ॥ पूर्वकालभोजननिषेधो विशेषमहाव्यवसिष्ठः ॥ ग्रहणं तु भवेदिंदोः प्रथमादधियामतः ॥ किंच ॥
ताव मतः भुंजीत सत्ता सूर्वं पश्चिमे प्रहरादधः रवेस्वापूर्वत्र दृष्टे दूर्ध्वग इति तः ॥ चतुर्थे प्रहरस्यै
यो ऽर्द्धे – – प्रहरादधइति ॥ रात्रौ प्रथमास्सर्वे ॥१५९॥

माघ० ॥१६०॥ तद्धिने चाक्षुषं दर्शनं भवतीति चेत्॥ न दर्शनशब्देन शास्त्रज्ञानस्य विवक्षितत्वात्॥ तदाह वृद्ध
गौतमः॥ चंद्रसूर्यग्रहे नाद्यात् तस्मिन्नहनि पूर्वतः॥ राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजन
मिति॥ एवं तर्हि परेद्युरुदयात् प्रागपि शास्त्रविज्ञानसंभवात् तदैव भोजनं प्रसज्येत॥ तन्न
तयोः पूर्वेद्युरुदये व्यवहरेत् अहोरात्रं न भोक्तव्यमिति वचनद्वयेन तत्प्रसक्तेः॥ यत्तु स्कं
दपुराणे॥ यदा चंद्रग्रहस्तात निशीथात्परतो भवेत्॥ भोक्तव्यं तात पूर्वाह्णे नापराह्णे कथंचन॥
पूर्वनिशीथाद्ग्रहणं॥ यदा चंद्रस्य वेधे वेले भवेत्॥ तदा दिवा न कर्तव्यं भोजनं शशिवाहुनेति॥
तद्विदं यामत्र याभिप्रायं॥ चंद्रग्रहे तु यामान् त्रीनिति विशेषस्य वृद्धगौतमेनाभिधा
त्॥ पापक्षयकामो ग्रहणादिनमुपवसेत्॥ तदाह दक्षः॥ अयने विषुवे चैव चंद्रसूर्यग्र
हे तथा॥ अहोरात्रोषितः स्नातः सर्वैः पापैः प्रमुच्यत इति॥ पुत्री तु नोपवसेत्॥ तदाह नार
दः॥ संक्रांत्यामुपवासे च कृष्णैकादशीवासरे॥ चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृही
ति॥ ग्रहस्नानसमये तु पुत्रिणि त्रिणो प्युपवासमाह स एव॥ अहोरात्रं न भोक्तव्यमिति भो
जननिषेधात्॥ स्नाने कालप्रशस्तिमाह व्यासः॥ त्रिदशाः स्पर्शसमये तृप्यंति पि ॥शिव॥
तरस्तथा॥ मनुष्या मध्यकाले तु मोक्षकाले तु ॥१६०॥

राक्षसाः॥ अत एते त्रयः कालाः श्रेष्ठमध्यमकन्यसाः॥ राहुस्पर्शकालः श्रेष्ठः मध्यकालो मध्य
मः मोक्षकालः कन्यसः कनीयान् कनिष्ठ इत्यर्थः॥ नाड्यः षोडश पूर्वेण संक्रांते स्युः परस्य च॥ राहो
स्तु दर्शनं यावत् पुण्यकाल उदाहृत इति मत्स्यवचनेन ग्रहणकालस्य पुण्यत्वं प्रतीयते॥ शावेदि
नेन सत्यमुक्तममध्यमकनिष्ठत्वमुच्यत इति न विरोधः॥ ग्रहणकाले अस्नाने दोषः स्यात् त
दाह वृद्धवसिष्ठः॥ ग्रहणे संक्रमे वापि न स्नायाद्यदि मानवः॥ सप्तजन्मनि कुष्ठी स्याद् दुःखभागी
च जायत इति॥ दोषोऽस्नाने स्नानदाने कुर्याद् आशौचवानपि॥ स्नानाकर्मधिकारी स्यान्न ग्र
हणसूतके॥ दोष अस्नाने तस्मात् आशौचवानपि स्नानदानं कुर्यात् जन्ममरणनिमि
त्ताशौचवानपि स्नानदानादिकं कुर्यात्॥ तदुक्तं वसिष्ठस्मृतौ लिंगपुराणे च॥ चंद्रसूर्यग्र
हे स्नायात् मृतके सूतकेपि वा॥ अस्नायी मृत्युमाप्नोति स्नाती मर्त्ये न विंदति॥ सूतके मृतके
चैव न दोषो राहुदर्शने॥ तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यत इति॥ अत्र पूर्ववचनं स्नान
परं दानपरं श्राद्धपरं॥ न नूत्तरवचनं स्यादेवं यदि स्मृत्यंतरवचनं। दृष्टांतदमेव स्वाभि

माध०

॥१६१॥

स्नानमेव अतो वैयर्थ्यादिपरिहारोत्तरवचनस्य दानश्राद्धपरत्वं वाच्चरीयते॥ ननु यथा पूर्वपक्षे
आभ्यः साहचर्याद् श्टंगं हन्तीति वदस्य यागपरत्वं तथात्रापि स्नानपरं। पूर्ववचनसाहच
र्यात् उत्तरवचनस्यापि स्नानपरत्वमस्तु॥ मैवं॥ स्नानपरत्वे शुद्धिके कर्मकृत्के स्नानं विधे
यं। शुद्धौ च प्रमाणाभावात् नैतद्विधानं पार्यते। अथेदमेव वचनं शुद्धावपि प्रमाणमिति
चेत्। न। अर्थद्वयपरत्वे वाक्यभेदापत्तेः। यथा॥ यदाग्नेयोष्टाकपाल इति वद्विशिष्टविधौ
न वाक्यभेददोष इति चेत्॥ न॥ गत्यंतरासंभवे गौरवस्वीकारस्यापि युक्तत्वात्। अस्मत् र
सक्षे तु मृतसूतकग्रहणनिमित्ताशौचिनो दानाध्ययनादिकृतास्यापूर्ववचनोक्तस्नाना
यादितन्शुद्धिमतोऽधिकृतस्य दानादि विधीयत इति न वाक्यभेदो नापि गौरवं॥ ननु दाना
दिस अत्रोत्तरद्वारमित्यत्र विचारणादिविधिवदध्याहरिष्यामो दानादि॥ ननु दानस्ये
वाध्याहारः इति कथं तरसवर्णे सूतके पीत्यांगिरसवचने स्नानस्य दानादि विहितमि ॥श्रीव॥
ति तदेवाध्याहरिष्यामः अतः सूतके मृतके राहुदर्शने दानश्राद्धादौ कृतेपि दोषाभा ॥१६१॥

यहणं चेदावर्तनात् मध्याह्ना सर्वं भुंजीत॥ रात्रिपश्चिमयामे चेत् रात्रिप्रथमयामादर्वा
क् भुंजीत॥ अह्नश्चतुर्थप्रहरे रविग्रहणं चेत् रात्रेश्चतुर्थप्रहरादधो भुंजीतेत्यर्थः। निशीथोम
ध्यरात्रः॥ रात्रिग्रहणे यात्रमस्य वध्यानमपेक्षितं सूर्यग्रहे तु यामचतुष्टयमिति तात्पर्या
र्थः॥ तथाच वृद्धगौतमः॥ सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयं। चंद्रग्रहे तु यामान्
त्रीन् बालवृद्धातुरैर्विनेति॥ बालवृद्धातुरविषयमस्य॥ अपराह्णेन मध्याह्ने मध्या
ह्नेन तु संगवे वेलायां च एवं भुजिमाचरेदिति॥ समर्थस्य भोजने तु प्रायश्चित्तमुक्तं कात्या
यनेन॥ चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति॥ तस्मिन्नेवादिने भुक्त्वा त्रिरात्रेण व शुध्य
तीति॥ रात्रिग्रहणे यामत्रयस्यापवादमाह वृद्धवसिष्ठः॥ ग्रस्तोदये विधोः पूर्वं नाहर्भोज
नमाचरेत्॥ ग्रस्तास्तमयेविशेषमाह भृगुः॥ ग्रस्तावेवास्तमानं तु रवींदू प्राप्नुतो यदि त
योः परेद्युरुदये स्नात्वाभ्यवहरेन्नर इति॥ वृद्धगार्ग्योपि॥ संध्याकाले यदा राहुः ग्रसते रा
त्रिभास्करौ॥ तदहर्नैव भुंजीत रात्रावपि कदाचनेति॥ विष्णुधर्मोत्तरेपि॥ अहोरात्रं न भुंजी
जीत चंद्रसूर्यग्रहो यदा॥ मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति॥ ननु मेघाद्य

श्रीमन्महागणाधिपतये नमः ॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ॥ यं नत्वा कृतकृत्याः
स्युस्तं नमामि गजाननं ॥ १ ॥ सोहं प्राप्य वविवेकतीर्थपदवीमाम्नायतीर्थे परं मज्जन्सज्जन
संगपुण्यतीर्थे निपुणः सद्वृत्ततीर्थं श्रयन् ॥ लब्ध्वामाकलयन्प्रभावलहरीं श्रीभारती
तीर्थतो विद्यातीर्थमुपाश्रयन् हृदि भजे कंठमव्याहतं ॥ २ ॥ सत्यैकव्रतपालको द्विगुण
धीस्स्थैर्ये चतुर्वेदिता पंचस्कंधसहः षडूतीपुडन्वयेदृढः सप्तांगसर्वंसहः ॥ अष्टव्य
क्तिकलाधरो नवनिधिः पुष्यद्दश प्रत्ययः स्मार्त्तोद्धारधुरंधरो विजयते श्रीबुक्कणक्ष्मा
पतिः ॥ ३ ॥ व्याख्याय माधवाचार्यो धर्मान्पाराशरानथ ॥ तदनुष्ठानकालस्य
निर्णयं वक्तुमुद्यतः ॥ ४ ॥ व्यामूढानामिह तनुभृतां जाह्नवीतीर्थमेकं विद्यातीर्थं
प्रकृतिविमले सद्विवेकोदयानां ॥ सर्वेषां तत्प्रथमसुखदं भारतीतीर्थमाहुस्तद्द्वावा
न्नविपुलमनसो निर्णये त्वाक्रिरस्ति ॥ ५ ॥ अर्थेनुकम्प्यते श्लोके निखिलो निर्णिनीषि
तः ॥ तावतैवानुतिष्ठासुर्निःसंदेहः प्रवर्त्तते ॥ ६ ॥ ततो मीमांसशिस्तस्य समाधाना

कालमाधवानुक्रमः

माध० भावाकर्तव्यमिति वचनार्थः ॥ अंगिरसोपि ॥ सर्वेवर्णाः स्वतकेपिमृतके राहुदर्शने स्नात्वा
॥१६२॥ श्राद्धं प्रकुर्वत दानं शाठ्य विवर्जित इति ॥ छ ॥ ॥ इति ग्रहणनिर्णयः ॥ ॥ इति श्री
महाराजाधिराजपरमेश्वर वैदिकमार्गप्रवर्तक श्री विरक्क भूपाल साम्राज्य धुरंधर
स्य माधवामात्यस्य माधवीय कालनिर्णय कृतौ पंचम प्रकरणं समाप्तं ॥ श्री कृष्णार्पणमस्तु ॥
शके १६६२ वर्षे प्रभव संवत्सर मार्गशीर्ष वाद्य दशमी भौमवासरे चित्रा नक्षत्रे अतिगंड नाम
योगे गरजी करणे सायंकाले इदं पुस्तकं समाप्तं ॥ गोविंद माधव मुकुंद हरे मुरारे शंभो शिवेश ॥०॥
॥ श्री ॥ ॥ शिवायनमः ॥ ॥ सांबायनमः ॥ ॥ आलुरजोयि शिगोविंदेन लिखितं ॥ ॥
॥ शिव ॥ ॥ हर ॥ ॥ छ ॥ ॥ श्री ॥ ॥ शिव ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ शिव ॥
॥१६२॥